# श्रीचित्रापुर-स्तुतिमञ्जरी

२०१९



# ॥ सभा–प्रारम्भ–प्रार्थना ॥

दक्षिणास्यसमारम्भा शङ्कराचार्यमध्यमा ।
अस्मदाचार्यपर्यन्ता स्मर्या गुरुपरम्परा ॥१॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादं शङ्करँल्लोकशङ्करम् ॥२॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥३॥

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥४॥

परिज्ञानाश्रम श्रीगुरुशङ्कर परिज्ञानाश्रम शङ्करसद्गुरु ।
केशव वामन कृष्ण पाण्डुरङ्ग आनन्द परिज्ञानगुरु ।
सद्योजात शङ्करसद्गुरु ॥५॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः ॥६॥

ॐ सह नाववतु । सह नौ भुनक्तु । सहवीर्यं करवावहै ॥
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥
॥ ॐ शान्तिः शान्तिः शान्तिः ॥७॥





# श्रीचित्रापुर-स्तुतिमञ्जरी

## २०१९

# SHRĪ CHITRĀPUR STUTIMAÑJARĪ
# 2019

*Published by:*


**Shrī Chitrāpur Maṭh**
Shirālī, Uttara Kannaḍa Dist., 581354.
Karnāṭaka, India.
E-mail: scmath@sancharnet.in
Website: www.chitrapurmath.net

| | |
|---|---|
| First Edition | 2004 (1000 Copies) |
| Revised 2nd Edition | 2006 (1000 Copies) |
| Revised 3rd Edition | 2008 (1000 Copies) |
| Revised 4th Edition | 2011 (1000 Copies) |
| Reprint of 4th Edition | 2012 (500 Copies) |
| Reprint of 4th Edition | 2013 (500 Copies) |
| Revised 5th Edition | 2017 (250 Copies) |
| Revised 6th Edition | 2019 (500 Copies) |


All rights reserved

Printed at Surekhā Press, A-20 Shālimār Indl. Estate,
Māṭuṅgā, Mumbai 400 019.


Tel.: 022 - 2409 3877, 2404 3877
E-mail: surekhapress@gmail.com




परमपूज्य-श्रीमत्-पाण्डुरङ्गाश्रम-स्वामिनः



परमपूज्य-श्रीमद्-आनन्दाश्रम-स्वामिनः



परमपूज्य-श्रीमत्-परिज्ञानाश्रम-स्वामिनः



परमपूज्य-श्रीमत्-सद्योजात-
शङ्कराश्रम-स्वामिनः



श्रीभवानीशङ्करः



श्रीवल्लीभुवनेश्वरी देवी

# Foreword

Ever since its first publication in 1999, Shrī Chitrāpur Stutimañjarī has been a unique source of reference to all sādhaka-s of our Revered Maṭh. An inspirational anthology aiding one's spiritual quest, more than 6000 copies have been printed and sold over the past 17 years.

Our beloved Guru, Parama Pūjya Sadyojāt Shaṅkarāshram Swāmījī, has continually and untiringly been guiding the individual sādhaka as well as the samāja on the spiritual path. Now and again, Pūjya Swāmījī has introduced new facets in sādhanā opening extraordinary doors to sādhaka-s to help enrich their upāsanā.

In keeping with the objectives of Stutimañjarī, in this revised edition we have added the Gaurī-Ashṭottarashatanāmāvalī which is chanted during every Navarātri-Utsava as well as the Devī-Anushṭhānam. Apart from these, we have also made a diligent attempt to correct the printing errors of our earlier editions.The Publication Committee is grateful to all those sādhaka-s, especially the dedicated team of Gīrvāṇapratishṭhā teachers, who willingly and joyfully participated in the proof reading exercise.

Most of all we are ever grateful to Parama Pūjya Swāmījī, whose constant Guidance and Blessings pave the way to successfully fructify all our sincere attempts. We humbly offer this revised edition of Stutimañjarī 2017 at The Lotus Feet of our beloved Guru.

On behalf of the Publication Committee,
Shrī Chitrāpur Maṭh,

**Prakāsh Haṭṭaṅgaḍī,**
Chairman

14th January 2017,
Mumbaī.

# अनुक्रमणिका

**भाग १ – स्तोत्रसङ्ग्रहः**

१. श्रीगुरुपादुकास्तोत्रम् ........ ३
२. श्रीपरिज्ञानाश्रमत्रयोदशी ........ ४
३. श्रीभवानीशङ्करसुप्रभातम् ........ ६
४. परब्रह्मणः प्रातः स्मरणम्. ........ ११

**१. गणेशस्तोत्राणि**

५. श्रीगणेशप्रातःस्मरणम्. ........ १२
६. श्रीगणेशाथर्वशीर्षम्. ........ १३
७. श्रीगणेशपञ्चरत्नम्. ........ १५
८. गणेशस्तोत्रम्. ........ १६
९. वेदव्यासविरचितं गणपतिस्तोत्रम् ........ १७
१०. सङ्कष्टनाशनगणपतिस्तोत्रम् ........ १८
११. गणेशस्तुतिः ........ १९

**२. शिवस्तोत्राणि**

१२. शिव प्रातः स्मरणम् ........ २०
१३. श्रीअमोघशिवकवचम् ........ २०
१४. शिवमानसपूजा ........ २६
१५. काशीविश्वनाथस्तोत्रम्. ........ २७
१६. लिङ्गाष्टकम्. ........ २७
१७. शिवनामावलिः ........ २९
१८. श्रीमार्गबन्धु स्तोत्रम् ........ ३०
१९. अर्धनारीश्वरस्तोत्रम्. ........ ३०
२०. द्वादशज्योतिर्लिङ्गस्मरणम्. ........ ३१
२१. श्रीशिवपञ्चाक्षरस्तोत्रम्. ........ ३२
२२. चन्द्रशेखराष्टकम्. ........ ३२
२३. श्रीमाङ्गिरीशाष्टकम्. ........ ३४
२४. पशुपत्यष्टकम् ........ ३६

२५. हनुमत्कृतशिवस्तोत्रम् ........................................ ३७
२६. श्रीउमामहेश्वरस्तोत्रम्. ........................................ ३८
२७. दारिद्र्यदहनशिवस्तोत्रम् ........................................ ३९
२८. कालभैरवाष्टकम् ........................................ ४०
२९. शिवापराधक्षमापनस्तोत्रम्. ........................................ ४२
३०. वेदसारशिवस्तोत्रम्. ........................................ ४४
३१. श्रीशिवताण्डवस्तोत्रम्. ........................................ ४६
३२. श्रीशिवगुरुस्तोत्रम् ........................................ ४९
३३. शङ्कराष्टकम् ........................................ ५०

३. **देवीस्तोत्राणि**

३४. दुर्गा–प्रातःस्मरणम् ........................................ ५१
३५. देवी कवचम् ........................................ ५२
३६. अर्गलास्तोत्रम्. ........................................ ५७
३७. कीलकस्तोत्रम्. ........................................ ६०
३८. तन्त्रोक्तं रात्रिसूक्तम्. ........................................ ६१
३९. महिषान्तकरी–सूक्तम्. ........................................ ६३
४०. अपराजितास्तोत्रम् ........................................ ६७
४१. नारायणीसूक्तम् ........................................ ७०
४२. देव्यपराधक्षमापनस्तोत्रम् ........................................ ७४
४३. श्रीराजराजेश्वर्यष्टकम् ........................................ ७६
४४. श्रीवल्लीभुवनेश्वर्यष्टकम् ........................................ ७७
४५. श्रीसूक्तम्. ........................................ ७९
४६. सरस्वतीस्तुतिः ........................................ ८२
४७. श्रीमहिषासुरमर्दिनीस्तोत्रम्. ........................................ ८२
४८. ललितापञ्चकम्. ........................................ ८६
४९. मीनाक्षीपञ्चरत्नम् ........................................ ८७
५०. श्रीजगद्धात्रीस्तोत्रम् ........................................ ८८
५१. श्रीअन्नपूर्णास्तोत्रम् ........................................ ८९
५२. भवान्यष्टकम् ........................................ ९१

५३. महालक्ष्म्यष्टकम्. ........ ९२
५४. सप्तश्लोकीदुर्गास्तोत्रम् ........ ९३
५५. दुर्गा–आपदुद्धाराष्टकम्. ........ ९५
५६. सरस्वतीस्तोत्रम् ........ ९६
५७. त्रिपुरसुन्दरीस्तोत्रम्. ........ ९७
५८. गौरी–दशकं स्तोत्रम्. ........ ९९
५९. भवानीभुजङ्गप्रयातस्तोत्रम् ........ १०१
६०. अर्बुदाभगवतीस्तोत्रम् ........ १०२
६१. देवीनवरत्नमालास्तोत्रम् ........ १०४

४. **गुरुस्तोत्राणि**

६२. श्रीशङ्करभगवत्पादस्तुति. ........ १०५
६३. श्रीगुरुपरम्परास्तोत्रम्. ........ १०६
६४. गुरुपादुकास्तोत्रम् ........ १०७
६५. गुरुस्तोत्रम्. ........ १०८
६६. श्रीगुरुस्तोत्रम्. ........ १०९
६७. तोटकाष्टकम्. ........ ११०
६८. दक्षिणामूर्तिस्तोत्रम्. ........ १११
६९. श्रीदक्षिणामूर्तिस्तोत्रम्. ........ ११२
७०. श्रीवेदव्यासाष्टकम्. ........ ११४
७१. श्रीगुरुभजनस्तोत्रम् ........ ११५
७२. श्रीगुरुपादुकापञ्चकम् ........ ११६
७३. गुरुभक्तिस्तोत्रम् ........ ११७

५. **विष्णुस्तोत्राणि**

७४. श्रीविष्णोः प्रातःस्मरणम् ........ ११९
७५. श्रीरामप्रातःस्मरणम् ........ ११९
७६. नारायणकवचम् ........ १२१
७७. श्रीव्यासविरचितं रामाष्टकम् ........ १२६
७८. श्रीमदच्युताष्टकम्. ........ १२७
७९. परमहंसस्वामीब्रह्मानन्दविरचितंश्रीरामाष्टकम् ........ १२८

८०. मधुराष्टकम् ........................................ १२८
८१. श्रीलक्ष्मीनृसिंहस्तोत्रम्. ........................................ १३०
८२. श्रीपाण्डुरङ्गाष्टकम्. ........................................ १३२
८३. श्रीहरिशरणाष्टकम् ........................................ १३३
८४. गोविन्दाष्टकम्. ........................................ १३५
८५. अच्युताष्टकम्. ........................................ १३६
८६. श्रीकृष्णाष्टकम्. ........................................ १३७

६. **सङ्कीर्णस्तोत्राणि**

८७. श्रीगङ्गास्तोत्रम् ........................................ १३९
८८. निर्वाणषट्कम् ........................................ १४०
८९. भज गोविन्दम् ........................................ १४१
९०. हनुमत्–स्तवनम् ........................................ १४५
९१. सूर्याष्टकम् ........................................ १४६
९२. नवग्रहस्तोत्रम्. ........................................ १४७
९३. आदित्यहृदयस्तोत्रम्. ........................................ १४८
९४. यन्त्रोद्धारक हनूमत्स्तोत्रम् ........................................ १५१
९५. श्रीदत्तात्रेयद्वादशनामस्तोत्रम् ........................................ १५२
९६. श्रीदत्तात्रेयस्तोत्रम्. ........................................ १५३
९७. श्रीदत्तप्रार्थनाचतुष्कम् ........................................ १५५
९८. बिल्वाष्टकम्. ........................................ १५६
९९. साधनपञ्चकम्. ........................................ १५७
१००. धन्याष्टकम्. ........................................ १५८
१०१. संवित्प्रसादस्तोत्रम् ........................................ १५९
१०२. अष्टमूर्ति रक्षास्तोत्रम्. ........................................ १६०
१०३. उपदेशसारम्. ........................................ १६२

**भाग २ – भजन सङ्ग्रह**

१०४. प्रार्थना ........................................ १६७
१०५. सुदिन सोमवार ........................................ १६७
१०६. शिवस्तुतिः – गङ्गाधर चन्द्रचूड ........................................ १६८

१०७. श्रीगुरुपादुकाष्टक - ज्या संगतीनेच ........................ १६९
१०८. गुरुनामावलि संकीर्तन ................................ १७०
१०९. श्रीगणेश विघ्नेश्वर ................................. १७०
११०. पार्वतिप्रियनंदना. ................................. १७०
१११. हे सरस्वति नमन तुझ्या ............................ १७१
११२. नमो शारदा नमो शारदा ............................ १७१
११३. तारक मन्त्र गुरुचा ................................. १७१
११४. निरंजनि देवि भवानि. .............................. १७२
११५. आदिशक्ति हे अनंतरूपिणि. ......................... १७२
११६. अंबाबाई तू त्रैलोक्याचि आई ......................... १७२
११७. सुंदरे गुणमंदिरे करुणाकरे. .......................... १७३
११८. कुंकुम वाहिले प्रेमे आई ............................ १७४
११९. श्रीगुरुपरंपरा की जय हो ............................ १७५
१२०. भाग्यदा लक्ष्मी बारम्मा. ............................ १७५
१२१. कुमुदनिभलोचनेगे .................................. १७६
१२२. देवीपर अष्टक-नमो भक्त सुरतरुलते. .................. १७७
१२३. कृष्णपर अष्टक-पायि सिद्ध पादुका वासुदेव .............. १७८
१२४. श्रीपादाष्टक ........................................ १७९
१२५. गुरुमहाराज गुरु जय जय ............................ १७९
१२६. सद्गुरुनाथ तारय ................................... १८०
१२७. नैवेद्य आरती - मनोभाव जाणुनि माझा .................. १८०
१२८. कर्पूर आरती - धूप दीप झाला आतां .................... १८१
१२९. मंगलारती - मंगलारती करीन भावे . .................... १८२
१३०. सद्गुरु-आरती - आरती गुरुराया ........................ १८२
१३१. श्रीमद्गुरु यतिवर आनंद ............................... १८३
१३२. तुझे नाम गाईन वेळोवेळा ............................. १८३
१३३. घालिन लोटांगण वंदिन ............................... १८३
१३४. सदा सर्वदा योग तूझा घडावा .......................... १८४
१३५. शान्तिपाठः ......................................... १८५

## भाग ३ – देवतापूजनविधि

१३६. देवीअनुष्ठानम् ........................................ १८९
१३७. पूजापूर्वाङ्गम् ........................................ १९१
१३८. श्रीगणेशपूजनम्, श्रीगणेशाष्टोत्तरशतनामावलिः .................. १९६
१३९. श्रीशिवपूजनम्, श्री शिवाष्टोत्तरशतनामावलिः .................. २०६
१४०. श्रीगुरुपूजनम्, श्रीगुरु–अष्टोत्तरशतनामावलिः .................. २१७
१४१. श्रीदेवीपूजनम्, श्रीदुर्गाष्टोत्तरशतनामावलिः .................. २२७
१४२. श्रीवल्लीभुवनेश्वर्यष्टोत्तरशतनामावलिः .................. २३७
१४३. ललिताष्टोत्तरशत नामावलिः .................. २४१
१४४. श्रीगौर्यष्टोत्तरशतनामावलिः .................. २४५
१४५. श्रीसंविद् अष्टोत्तरशतनामावलिः .................. २४७
१४६. ललितात्रिशती नामावलिः .................. २५०
१४७. श्रीसरस्वतीपूजनम्, श्रीसरस्वत्यष्टोत्तरशतनामावलिः .................. २५६
१४८. दीपावली श्रीलक्ष्मीपूजनम्, श्रीलक्ष्म्यष्टोत्तरशतनामावलिः........ २६५
१४९. श्रीशङ्कराचार्यपूजनम्, श्रीशङ्कराचार्याष्टोत्तरशतनामावलिः ......... २७४
१५०. श्रीमद्भगवद्गीतापूजनम्, श्रीमद्भगवद्गीताष्टोत्तरशतनामावलिः ....... २८२
१५१. श्रीकृष्णपूजनम्, श्रीकृष्णाष्टोत्तरशतनामावलिः .................. २८६
१५२. श्रीदक्षिणामूर्त्यष्टोत्तरशतनामावलिः .................. २९४
१५३. श्रीवेदव्यासाष्टोत्तरशतनामावलिः .................. २९६

## भाग ४ – श्रीचित्रापुर–नित्यपाठ

१५४. दीपनमस्कारः .................. ३०१
१५५. श्रीशङ्करनारायणगीतम् .................. ३०३
१५६. श्रीभवानीशङ्कराष्टावधानश्लोकाः .................. ३०७
१५७. मङ्गलपद (१) मङ्गल शुभकर शङ्करगे .................. ३११
१५८. मङ्गलपद (२) मङ्गलं श्रीमहादेवं .................. ३१२
१५९. श्रीचित्रापुर मठ समूह गीत .................. ३१३

# भाग – १

# स्तोत्रसङ्ग्रहः



श्रीगुरुपादुकासन्निधिः

# १. श्रीगुरुपादुकास्तोत्रम्

प्रणम्य संविन्मार्गस्थान् आगमज्ञान्महागुरून् ।
प्रायश्चित्तं प्रवक्ष्यामि सर्वतन्त्राविरोधतः ॥१॥

प्रमाददोषजमलप्रविलापनकारणम् ।
प्रायश्चित्तं परं सत्यं श्रीगुरोः पादुकास्मृतिः ॥२॥

यस्य श्रीपादरजसा रज्यते मस्तके शिवः ।
रमते सह पार्वत्या तस्य श्रीपादुकास्मृतिः ॥३॥

यस्मै सर्वस्वमात्मानम् अप्येकवृत्तिभक्तितः ।
समर्पयति सच्छिष्यस्तस्य श्रीपादुकास्मृतिः ॥४॥

यस्य पादतले सिद्धाः पादाग्रे कुलपर्वताः ।
गुल्फौ नक्षत्रवृन्दानि तस्य श्रीपादुकास्मृतिः ॥५॥

आधारे परमा शक्तिः नाभिचक्रे हृदाज्ञयोः ।
योगिनीनां चतुःषष्ठिः तस्य श्रीपादुकास्मृतिः ॥६॥

शुक्लरक्तपदद्वन्द्वं मस्तके यस्य राजते ।
शाम्भवं तु तयोर्मध्ये तस्य श्रीपादुकास्मृतिः ॥७॥

अन्यत्सर्वं सप्रपञ्चं निष्प्रपञ्चा गुरोः स्मृतिः ।
तस्माच्छ्रीपादुकाध्यानं सर्वपापनिकृन्तनम् ॥८॥

पालनाद्दुरितच्छेदात् कामितार्थप्रपूरणात् ।
पादुकामन्त्रशब्दार्थं विमृशन् मूर्ध्नि पूजयेत् ॥९॥

श्रीगुरोः पादुकास्तोत्रं प्रातरुत्थाय यः पठेत् ।
नश्यन्ति सर्वपापानि वह्निना तूलराशिवत् ॥१०॥

काशीक्षेत्रं निवासस्तव चरणजलं जाह्नवी श्रीगुरो नः ।
साक्षाद्विश्वेश्वरो नस्तव वचनतया तारकब्रह्मबोधे ॥११॥

त्वच्छ्रीपादाङ्किताभूरिह भवति गयात्वत्प्रसङ्गः प्रयागः ।
त्वत्तोन्यत् तीर्थदेवः क्वचिदपि च वयं न प्रतीमः पृथिव्याम्॥१२॥

## २. श्रीपरिज्ञानाश्रमत्रयोदशी

आनन्दाश्रमशिष्याग्र्यं स्वानन्दाम्बुधिमज्जितम् ।
आनन्दाश्रमिणं वन्दे परिज्ञानाश्रमं गुरुम् ॥ १ ॥

श्रीविद्योपासनोद्याने मायूरं विभ्रमं सदा ।
यश्चक्रे तं नुमो नित्यं परिज्ञानाश्रमं गुरुम् ॥ २ ॥

बाल्ये दीपनमस्कारे यस्य वैराग्यधीशिखा ।
जज्ज्वाल तं सदा वन्दे परिज्ञानाश्रमं गुरुम् ॥ ३ ॥

शिष्यान्तश्शोधने यद्वत्तद्वद्यन्त्रालिशोधने ।
कौतुकं यस्य तं वन्दे परिज्ञानाश्रमं गुरुम् ॥ ४ ॥

भवरोगहरो योऽभूच्छिवयोगपरोऽनिशम् ।
तं वन्दे सिद्धिसम्पन्नं परिज्ञानाश्रमं गुरुम् ॥ ५ ॥

शुनि चैव समदृष्टा ज्ञानीत्यागमदृष्टये ।
आसीद्यस्तं नुमो हार्दं परिज्ञानाश्रमं गुरुम् ॥ ६ ॥

सारस्वतजनप्रीतस्सारस्वतसमर्चकः ।
य आसीत् तं मुदा वन्दे परिज्ञानाश्रमं गुरुम् ॥ ७ ॥

विद्यावृद्धस्तपोवृद्धो वयोवृद्धाश्रयो बभौ ।
यः कारुण्येन तं वन्दे परिज्ञानाश्रमं गुरुम् ॥ ८ ॥

योऽनुकर्तुं विभुं चक्रे विश्ववस्त्वालयङ्करम् ।
वस्त्वागारं नुमस्तं श्रीपरिज्ञानाश्रमं गुरुम् ॥ ९ ॥

निर्ममे निर्ममेन्द्रो यस्स्तवान् वेदान्तवासितान् ।
गीतासक्तं नुमस्तं श्रीपरिज्ञानाश्रमं गुरुम् ॥ १० ॥

कैवल्यसन्निकर्षत्वे तथाऽहङ्ग्रहचिन्तने ।
यस्यासीद्हृदयं वन्दे परिज्ञानाश्रमं गुरुम् ॥ ११ ॥

भक्तचेतोरथाध्यक्षो रथयात्रां महेशितुः ।
यश्चक्रे तं नुमोऽजस्रं परिज्ञानाश्रमं गुरुम् ॥ १२ ॥

दुर्गं निर्माय दुर्गायै स्वसर्गं यो रुरोध तम् ।
अपवर्गपदं वन्दे परिज्ञानाश्रमं गुरुम्
अपवर्गप्रदं वन्दे परिज्ञानाश्रमं गुरुम् ॥ १३ ॥

श्री श्री परिज्ञानाश्रमयतीश्वराणां
तुर्याश्रमालङ्कृतिरूपकाणाम् ।
स्तोत्रं पठेद्यः प्रयतः प्रणम्रः
प्राप्नोति पूर्णां करुणां गुरूणाम् ॥

# ३. श्रीभवानीशङ्करसुप्रभातम्

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ १ ॥

मातस्समस्तजगतां त्रिपुरासुरारेः
अर्धाङ्गहारिणि महोज्ज्वलदिव्यकान्ते ।
शौरीन्द्रकादिदिविजैः परिसेविताङ्घ्रे
श्रीवामदेवदयिते तव सुप्रभातम् ॥ २ ॥

सन्ध्यामुपास्य परिपूज्य च कामधेनूः
ता दोहयन्ति विधिवद्धुतवह्निमुख्याः ।
प्राध्यापयन्ति मुनयः श्रुतिमन्त्रपाठान्
कैलासवासवनिते तव सुप्रभातम् ॥ ३ ॥

प्राच्यङ्गनामरुणकाम्बरधारयन्तीं
प्रेम्णा विहस्य ननु धावति सूर्यदेवः ।
गन्धानिलस्तु शिशिरश्च शनैः प्रवाति
श्रीशैलनाथललने तव सुप्रभातम् ॥ ४ ॥

उत्तिष्ठ देवि वरदे कनकाद्रिवासे
राजत्सहस्रदलपद्मविहारशीले ।
नीवारशूकतनुभास्वरपीतभासे
श्रीकण्ठमानिनि शिवे तव सुप्रभातम् ॥ ५ ॥

शिवाकान्त शम्भो शशाङ्कार्धमौले
महेशान शूलिन् जटाजूटधारिन् ।
नमस्ते विभो विश्वमूर्ते सुमूर्ते
भवानीपते ते शिवं सुप्रभातम् ॥ ६ ॥

रामेश्वराधिष्ठितभव्यलिङ्ग
संस्तूयमानामरसार्वभौम ।
चित्रापुरश्रीमठमुख्यदेव
शम्भो भवानीधव सुप्रभातम् ॥ ७ ॥

लिपिब्रह्मरूपिन् गुणातीतरूप
चिदाकाशरूपिन् भवातीतरूप ।
महालिङ्गरूपिन् क्षरातीतरूप
भवानीपते ते शिवं सुप्रभातम् ॥ ८ ॥

चिदानन्दमूर्ते सुरानन्दकर्त्रे
परानन्दमूर्ते शिवानन्ददात्रे ।
भवानन्दमूर्ते स्मरानन्दहर्त्रे
भवानीपते ते शिवं सुप्रभातम् ॥ ९ ॥

त्राहि त्राहि महेश शङ्कर विभो संसारदुःखार्णवात्
सुज्ञानाश्रय शङ्करादियतिभिः चित्रापुराधिष्ठितैः ।
श्रीमच्छङ्करदेशिकेन्द्रविमलैश्छात्रैः सदा पूजित
हे शम्भो तव सुप्रभातममलं श्रीमद्भवानीपते ॥ १० ॥

पुरारे स्मरारे सदा तापहार
मुरारेर्व्यथारे महापापहार ।
सुरारेः परारे त्रिलोकोपकार
भवानीपते ते शिवं सुप्रभातम् ॥ ११ ॥

रमाकान्तकान्तं शिवाशोकशान्तं
वृषारूढदेवं शिवालिङ्गिताङ्गम् ।
चिताभस्मलेपं जटागाङ्गतोयं
भवानीपते ते शिवं सुप्रभातम् ॥ १२ ॥

महेशं सुरेशं गिरीशं गणेशं
अजं निर्विकल्पं निजं निर्विकारम् ।
तमीशं भजे पञ्चवक्त्रं त्रिनेत्रं
भवानीपते ते शिवं सुप्रभातम् ॥ १३ ॥

ठकारद्वयं सुस्वसायुज्यरूपं
रविग्लौ महाभूतहोतृस्वरूपम् ।
भजेऽहं निराकारमोङ्कारवेद्यं
भवानीपते ते शिवं सुप्रभातम् ॥ १४ ॥

उत्तिष्ठोत्तिष्ठ देवेश उत्तिष्ठ वृषभध्वज ।
उत्तिष्ठ गिरिजाकान्त त्रैलोक्यीमङ्गलप्रद ॥ १५ ॥

उत्तिष्ठ शम्भो करुणार्द्रपाङ्ग
ऋग्भिर्यजुर्भिश्च सुसामगीतैः ।
त्वां स्तौति देवर्षिमहर्षिसङ्घः
त्वद्दर्शनेप्सुश्च सुरेशसङ्घः ॥ १६ ॥

त्वयि सुप्ते जगत्सुप्तं त्वयि जागर्ति जाग्रति ।
तस्मादुत्तिष्ठ लोकेश अस्माकं मङ्गलं कुरु ॥ १७ ॥

प्रातः स्मरामि भवदीयपदारविन्दम्
गौरीकराब्जमृदुसंहननावलीढम् ।
स्तुत्यावदानमपि तुम्बुरुनारदाद्यैः
सम्बोधयामि मम चेतसि सुप्रबोधे ॥ १८ ॥

कैलासे सुमनोहरे मणिमये सौधे महामण्डपे
पर्यङ्के शयनीयतल्पमृदुले वामाङ्गी वामांसके ।
त्वद्द्वारिस्थितनन्दिनन्दितपदे गौराद्रिगौरीपते
संविष्टं तव सुप्रभातममलं श्रीमद्भवानीपते ॥ १९ ॥

गोकर्णक्षेत्रमध्यस्थ परिज्ञानाश्रमैर्वरैः ।
संसेवितपदाब्जाय भवानीशाय मङ्गलम् ॥ २० ॥

चित्रापुरमठाचार्य प्रथमैश्शङ्कराश्रमैः।
भक्त्याराधितभव्याय भवानीशाय मङ्गलम् ॥ २१ ॥

ज्ञानवैराग्यसम्पन्नपरिज्ञानाश्रमैश्शुभैः ।
सम्पूजितमहेशाय भवानीशाय मङ्गलम् ॥ २२ ॥

शङ्कराचार्यसच्छिष्यसञ्जातैश्शङ्कराश्रमैः ।
संस्तुतामरपूज्याय भवानीशाय मङ्गलम् ॥ २३ ॥

तत्त्वज्ञानसुधासिन्धुविधुभिः केशवाश्रमैः ।
श्रद्धयार्चितलिङ्गाय भवानीशाय मङ्गलम् ॥ २४ ॥

अज्ञानतिमिरव्रातभास्करैर्वामनाश्रमैः ।
सन्नुताय गिरीशाय भवानीशाय मङ्गलम् ॥ २५ ॥

वेदवेदान्तनिष्णातकृष्णाश्रमगुरूत्तमैः ।
सन्नुताय त्रिनेत्राय भवानीशाय मङ्गलम् ॥ २६ ॥

चित्रापुरनवोन्मेषपाण्डुरङ्गाश्रमैर्बुधैः ।
वन्दितामरवन्द्याय भवानीशाय मङ्गलम् ॥ २७ ॥

सारस्वतजनानन्दैरानन्दाश्रमयोगिभिः ।
दृष्टानन्दस्वरूपाय भवानीशाय मङ्गलम् ॥ २८ ॥

आश्रिताश्रयसन्दक्षैः परिज्ञानाश्रमैः परैः ।
परिज्ञाताय भर्गाय भवानीशाय मङ्गलम् ॥ २९ ॥

ज्ञानयोगतपोदीप्तैः सद्योजातशङ्कराश्रमैः ।
सम्पूजिताय साम्बाय भवानीशाय मङ्गलम् ॥ ३० ॥

भस्मोद्धूलितदेहाय पञ्चवक्त्राय शम्भवे ।
गङ्गाधराय शर्वाय भवानीशाय मङ्गलम् ॥ ३१ ॥

देवदानवगन्धर्वसिद्धयक्षोरगादिभिः ।
वन्दिताङ्घ्रिसरोजाय भवानीशाय मङ्गलम् ॥ ३२ ॥

मङ्गलं ते महेशाय मङ्गलं मृगधारिणे ।
मङ्गलं महते तुभ्यं भवानीशाय मङ्गलम् ॥ ३३ ॥

यत्पादस्मरणं मुदा कलयतां बद्धादराणां हृदि
सर्वाघौघहरं कलेर्मलहरं प्रातःस्मरं रुग्घरम् ।
सर्वैश्वर्यकरं सदा सुखकरं सन्मार्गदीपं मृड
त्वत्पादस्मरणं भवेत् प्रतिभवं सन्मङ्गलं मङ्गलम् ॥ ३४ ॥

*सन्मङ्गलं मङ्गलम् ॥*

# ४. परब्रह्मणः प्रातःस्मरणम्

प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं
सच्चित्सुखं परमहंसगतिं तुरीयम् ।
यत् स्वप्नजागरसुषुप्तमवैति नित्यं
तद् ब्रह्म निष्कलमहं न च भूतसङ्घः ॥ १ ॥

प्रातर्भजामि मनसा वचसामगम्यं
वाचो विभान्ति निखिला यदनुग्रहेण ।
यन्नेति नेतिवचनैर्निगमा अवोचुः
तं देवदेवमजमच्युतमाहुरग्र्यम् ॥ २ ॥

प्रातर्नमामि तमसः परमर्कवर्णं
पूर्णं सनातनपदं पुरुषोत्तमाख्यम् ।
यस्मिन्निदं जगदशेषमशेषमूर्तौ
रज्ज्वां भुजङ्गम इव प्रतिभासितं वै ॥ ३ ॥

श्लोकत्रयमिदं पुण्यं लोकत्रयविभूषणम् ।
प्रातःकाले पठेद्यस्तु स गच्छेत् परमं पदम् ॥

# १. गणेशस्तोत्राणि

## ५. श्रीगणेशप्रातःस्मरणम्

प्रातः स्मरामि गणनाथमनाथबन्धुं
सिन्दूरपूरपरिशोभितगण्डयुग्मम् ।
उद्दण्डविघ्नपरिखण्डनचण्डदण्डम् -
आखण्डलादिसुरनायकवृन्दवन्द्यम् ॥ १ ॥

प्रातर्नमामि चतुराननवन्द्यमानम् -
इच्छानुकूलमखिलं च वरं ददानम्।
तं तुन्दिलं द्विरसनाधिपयज्ञसूत्रं
पुत्रं विलासचतुरं शिवयोः शिवाय ॥ २ ॥

प्रातर्भजाम्यभयदं खलु भक्तशोक-
दावानलं गणविभुं वरकुञ्जरास्यम् ।
अज्ञानकाननविनाशनहव्यवाहम् -
उत्साहवर्धनमहं सुतमीश्वरस्य ॥ ३ ॥

श्लोकत्रयमिदं पुण्यं सदा साम्राज्यदायकम् ।
प्रातरुत्थाय सततं यः पठेत्प्रयतः पुमान् ॥ ४ ॥

*॥ इति श्रीगणेशप्रातः स्मरणम् ॥*

# ६. श्रीगणेशाथर्वशीर्षम्

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः। व्यशेम देवहितं यदायुः। ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं कर्ताऽसि । त्वमेव केवलं धर्ताऽसि । त्वमेव केवलं हर्ताऽसि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्माऽसि नित्यम् ॥१॥

ऋतं वच्मि । सत्यं वच्मि ॥२॥

अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् । अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अवोत्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् ॥३॥

त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दाऽद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि ॥४॥

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि ॥५॥

त्वं गुणत्रयातीतः । त्वं देहत्रयातीतः । त्वं कालत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम् ॥६॥

गणादिं पूर्वमुच्चार्य वर्णादींस्तदनन्तरम्। अनुस्वारः परतरः। अर्धेन्दुलसितम् । तारेण ऋद्धम् । एतत्तव मनुस्वरूपम् । गकारः पूर्वरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् । बिन्दुरुत्तररूपम् । नादः सन्धानम् । संहिता सन्धिः । सैषा गणेशविद्या । गणक ऋषिः । निचृद्गायत्री छन्दः । श्रीमहागणपतिर्देवता । ॐ गं गणपतये नमः ॥७॥

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥८॥

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् ।
रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥

रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् ।
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ॥
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् ।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ।
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥९॥

नमो व्रातपतये । नमो गणपतये । नमः प्रमथपतये । नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय वरदमूर्तये नमः ॥१०॥

एतदथर्वशीर्षं योऽधीते स ब्रह्मभूयाय कल्पते । सः सर्वत्र सुखमेधते । स पञ्चमहापापात् प्रमुच्यते । स सर्वविघ्नैर्न बाध्यते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानो पापोऽपापो भवति । सर्वत्राधीयानोऽपविघ्नो भवति ।

धर्मार्थकाममोक्षं च विन्दति । इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद् दास्यति स पापीयान् भवति । सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत् ॥११॥

अनेन गणपतिमभिषिञ्चति स वाग्मी भवति । चतुर्थ्यामनश्नन् जपति स विद्यावान् भवति । इत्यथर्वणवाक्यम् । ब्रह्माद्यावरणं विद्यान्न बिभेति कदाचनेति ॥१२॥

यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति । यो लाजैर्यजति स यशोवान् भवति । स मेधावान् भवति । यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति । यः साज्य समिद्भिर्यजति स सर्वं लभते स सर्वं लभते ॥१३॥

अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति । महाविघ्नात् प्रमुच्यते । महादोषात् प्रमुच्यते। महापापात् प्रमुच्यते। महाप्रत्यवायात् प्रमुच्यते। स सर्वविद्भवति स सर्वविद्भवति । य एवं वेद । इत्युपनिषत् ॥१४॥

ॐ शान्तिः शान्तिः शान्तिः ॥

## ७. श्रीगणेशपञ्चरत्नम्

मुदा करात्तमोदकं सदा विमुक्तिसाधकं
कलाधरावतंसकं विलासिलोकरक्षकम् ।
अनायकैकनायकं विनाशितेभदैत्यकं
नताशुभाशुनाशकं नमामि तं विनायकम् ॥ १ ॥

नतेतरातिभीकरं नवोदितार्कभास्वरं
नमत् सुरारिनिर्जरं नताधिकापदुद्धरम् ।
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं
महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥ २ ॥

समस्तलोकशङ्करं निरस्तदैत्यकुञ्जरं
दरेतरोदरं वरं वरेभवक्त्रमक्षरम् ।
कृपाकरं क्षमाकरं मुदाकरं यशस्करं
मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ ३ ॥

अकिञ्चनार्तिमार्जनं चिरन्तनोक्तिभाजनं
पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम् ।

प्रपञ्चनाशभीषणं धनञ्जयादिभूषणं
कपोलदानवारणं भजे पुराणवारणम्॥ ४ ॥

नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजम्
अचिन्त्यरूपमन्तहीनमन्तरायकृन्तनम् ।
हृदन्तरे निरन्तरं वसन्तमेव योगिनां
तमेकदन्तमेव तं विचिन्तयामि सन्ततम् ॥ ५ ॥

महागणेशपञ्चरत्नम् आदरेण योऽन्वहं
प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरम् ।
अरोगतामदोषतां सुसाहितीं सुपुत्रतां
समाहितायुरष्टभूतिमभ्युपैति सोऽचिरात् ॥ ६ ॥

*श्रीशङ्करभगवत्पादकृतं स्तोत्रं सम्पूर्णम् ॥*

## ८. गणेशस्तोत्रम्

अजं निर्विकल्पं निराकारमेकं
निरानन्दमानन्दमद्वैतपूर्णम् ।
परं निर्गुणं निर्विशेषं निरीहं
परब्रह्मरूपं गणेशं भजेम ॥ १ ॥

गुणातीतमानं चिदानन्दरूपं
चिदाभासकं सर्वगं ज्ञानगम्यम् ।
मुनिध्येयमाकाशरूपं परेशं
परब्रह्मरूपं गणेशं भजेम ॥ २ ॥

जगत्कारणं कारणज्ञानरूपं
सुरादिं सुखादिं गुणेशं गणेशम् ।
जगद्व्यापिनं विश्ववन्द्यं सुरेशं
परब्रह्मरूपं गणेशं भजेम ॥ ३ ॥

# ९. वेदव्यासविरचितं गणपतिस्तोत्रम्

गणपतिपरिवारं चारुकेयूरहारं
गिरिधरवरसारं योगिनीचक्रचारम् ।
भवभयपरिहारं दुःखदारिद्र्यदूरं
गणपतिमभिवन्दे वक्रतुण्डावतारम् ॥ १ ॥

अखिलमलविनाशं पाणिना हस्तपाशं
कनकगिरिनिकाशं सूर्यकोटिप्रकाशम् ।
भज भवगिरिनाशं मालतीतीरवासं
गणपतिमभिवन्दे मानसे राजहंसम् ॥ २ ॥

विविधमणिमयूखैः शोभमानं विदूरैः
कनकरचितचित्रं कण्ठदेशे विचित्रम् ।
दधति विमलहारं सर्वदा यत्नसारं
गणपतिमभिवन्दे सर्वदानन्दकन्दम् ॥ ३ ॥

दुरितगजममन्दं वारुणीं चैव वेदं
विदितमखिलनादं नृत्यमानन्दकन्दम् ।
दधति शशिसुवक्त्रं चाङ्कुशं यो विशेषं
गणपतिमभिवन्दे सर्वदानन्दकन्दम् ॥ ४ ॥

त्रिनयनयुतभाले शोभमाने विशाले
मुकुटमणिसुडोले मौक्तिकानां च जाले ।
धवलकुसुममाले यस्य शीर्ष्णः सताले
गणपतिमभिवन्दे सर्वदानन्दकन्दम् ॥ ५ ॥

वपुषि महति रूपं पीठमादौ सुदीपं
तदुपरि रसकोनं यस्य चोर्ध्वं त्रिकोनम् ।
गजमितदलपद्मसंस्थितं चारुछद्मं
गणपतिमभिवन्दे सर्वदानन्दकन्दम् ॥ ६ ॥

वरदविशदहस्तं दक्षिणं यस्य हस्तं
सदयमभयदं तं चिन्तयेच्चित्तसंस्थम् ।
शबलकुटिलशुण्डं चैकतुण्डं द्वितुण्डं
गणपतिमभिवन्दे सर्वदानन्दकन्दम् ॥ ७ ॥

कल्पद्रुमाधःस्थितकामधेनुं चिन्तामणिं दक्षिणपादशुण्डम् ।
बिभ्राणमत्यद्भुतचित्तरूपं यः पूजयेत्तस्य समस्तसिद्धिः ॥

व्यासाष्टकमिदं पुण्यं गणेशस्तवनं नृणाम् ।
पठतां दुःखनाशाय विद्यां सुश्रियमश्नुते ॥

## १०. सङ्कष्टनाशनगणेशस्तोत्रम्

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।
भक्तावासं स्मरेन्नित्यम् आयुःकामार्थसिद्धये ॥ १ ॥

प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ॥ २ ॥

लम्बोदरं पञ्चमं च षष्ठं विकटमेव च ।
सप्तमं विघ्नराजं च धूम्रवर्णं तथाष्टमम् ॥ ३ ॥

नवमं भालचन्द्रं च दशमं तु विनायकम् ।
एकादशं गणपतिं द्वादशं तु गजाननम् ॥ ४ ॥

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभो ॥ ५ ॥

# ११. गणेशस्तुतिः

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥ १ ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ २ ॥

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ ३ ॥

गजाननं भूतगणाधिसेवितं कपित्थजम्बूफलसारभक्षितम् ।
उमासुतं शोकविनाशकारणं नमामि विघ्नेश्वरपादपङ्कजम्॥ ४ ॥

# २. शिवस्तोत्राणि

## १२. शिवप्रातःस्मरणम्

ॐ प्रातः स्मरामि भवभीतिहरं सुरेशं
गङ्गाधरं वृषभवाहनमम्बिकेशम् ।
खट्वाङ्गशूलवरदाभयहस्तमीशं
संसाररोगहरमौषधमद्वितीयम् ॥ १ ॥

प्रातर्नमामि गिरिशं गिरिजार्धदेहं
सर्गस्थितिप्रलयकारणमादिदेवम् ।
विश्वेश्वरं विजितविश्वमनोऽभिरामं
संसाररोगहरमौषधमद्वितीयम् ॥ २ ॥

प्रातर्भजामि शिवमेकमनन्तमाद्यं
वेदान्तवेद्यमनघं पुरुषं महान्तम् ।
नामादिभेदरहितं षड्भावशून्यं
संसाररोगहरमौषधमद्वितीयम् ॥ ३ ॥

## १३. श्रीअमोघशिवकवचम्

ॐ अस्य श्रीशिवकवचस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः अनुष्टुप् छन्दः, श्रीसदाशिवरुद्रो देवता, श्रीं ह्रीं क्लीं बीजं, ह्रीं शक्तिः, रं कीलकम् । श्रीसदाशिवप्रीत्यर्थे शिवकवचस्तोत्रजपे विनियोगः ।

ऋष्यादिन्यासः ॐ ब्रह्माऋषये नमः शिरसि ।
ॐ अनुष्टुप् छन्दसे नमः मुखे ।
ॐ श्रीसदाशिवरुद्रदेवतायै नमः हृदि ।
ॐ श्रीं ह्रीं क्लीं बीजाय नमः गुह्ये ।
ॐ ह्रीं शक्तये नमः पादयोः ।
ॐ रं कीलकाय नमः नाभौ ।

करन्यासः ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ ह्रीं ह्रां सर्वशक्तिधाम्ने ईशानात्मने अङ्गुष्ठाभ्यां नमः ।
ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ नं ह्रीं नित्यतृप्तिधाम्ने तत्पुरुषात्मने तर्जनीभ्यां नमः ।
ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ मं ह्रुं अनादिशक्तिधाम्ने अघोरात्मने मध्यमाभ्यां नमः ।
ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ शिं ह्रैं स्वतन्त्रशक्तिधाम्ने वामदेवात्मने अनामिकाभ्यां नमः ।
ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ वां ह्रौं अलुप्तशक्तिधाम्ने सद्योजातात्मने कनिष्ठिकाभ्यां नमः ।
ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ यं ह्रः सर्वाद्भुतशक्तिधाम्ने सर्वात्मने करतलकरपृष्ठाभ्यां नमः ।

हृदयादिन्यासः ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ ह्रीं ह्रां सर्वशक्तिधाम्ने ईशानात्मने हृदयाय नमः ।
ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ नं ह्रीं नित्यतृप्तिधाम्ने तत्पुरुषात्मने शिरसे स्वाहा ।
ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ मं ह्रुं अनादिशक्तिधाम्ने अघोरात्मने शिखायै वषट् ।
ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ शिं ह्रैं स्वतन्त्रशक्तिधाम्ने वामदेवात्मने कवचाय हुम् ।
ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ वां ह्रौं अलुप्तशक्तिधाम्ने सद्योजातात्मने नेत्रत्रयाय वौषट् ।
ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ यं ह्रः सर्वाद्भुतशक्तिधाम्ने सर्वात्मने अस्त्राय फट् ।

ध्यानम् वज्रदंष्ट्रं त्रिनयनं कालकण्ठमरिन्दमम् ।
सहस्रकरमत्युग्रं वन्दे शम्भुमुमापतिम् ॥
अतः परं सर्वपुराणगुह्यं निःशेषपापौघहरं पवित्रम् ।
जयप्रदं सर्वविपत्प्रमोचनं वक्ष्यामि शैवं कवचं हिताय ते ॥

**मन्त्रः**

ऋषभ उवाच

नमस्कृत्य महादेवं विश्वव्यापिनमीश्वरम् ।
वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम् ॥ १ ॥

शुचौ देशे समासीनो यथावत्कल्पितासनः ।
जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम् ॥ २ ॥

हृत्पुण्डरीकान्तरसन्निविष्टं स्वतेजसा व्याप्तनभोऽवकाशम् ।
अतीन्द्रियं सूक्ष्ममनन्तमाद्यं ध्यायेत् परानन्दमयं महेशम् ॥ ३ ॥

ध्यानावधूताखिलकर्मबन्धश्चिरं चिदानन्दनिमग्नचेताः ।
षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम् ॥ ४ ॥

मां पातु देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे ।
तन्नाम दिव्यं वरमन्त्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥ ५ ॥

सर्वत्र मां रक्षतु विश्वमूर्तिः ज्योतिर्मयानन्दघनश्चिदात्मा ।
अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥ ६ ॥

यो भूस्वरूपेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशोऽष्टमूर्तिः ।
योऽपां स्वरूपेण नृणां करोति सञ्जीवनं सोऽवतु मां जलेभ्यः ॥ ७ ॥

कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः ।
स कालरुद्रोऽवतु मां दवाग्नेः वात्यादिभीतेरखिलाच्च तापात् ॥ ८ ॥

प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः ।
चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितो रक्षतु मामजस्रम् ॥ ९ ॥

कुठारखेटाङ्कुशपाशशूलकपालमालाग्निकणान्दधानः ।
चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम् ॥ १० ॥

कुन्देन्दुशङ्खस्फटिकावभासो वेदाक्षमालावरदाभयाङ्कः ।
त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योऽधिजातोऽवतु मां प्रतीच्याम् ॥ ११ ॥

वराक्षमालाऽभयटङ्कहस्तः सरोजकिञ्जल्कसमानवर्णः ।
त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः ॥ १२ ॥

वेदाभयेष्टाङ्कुशटङ्कपाशकपालढक्काक्षरशूलपाणिः ।
सितद्युतिः पञ्चमुखोऽवतान्माम् ईशान ऊर्ध्वं परमप्रकाशः ॥ १३ ॥

मूर्धानमव्यान्मम चन्द्रमौलिः फालं ममाव्यादथ फालनेत्रः ।
नेत्रे ममाव्याद् भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः ॥ १४ ॥

पायाच्छ्रुती मे श्रुतिगीतकीर्तिः कपोलमव्यात्सततं कपाली ।
वक्त्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः ॥ १५ ॥

कण्ठं गिरीशोऽवतु नीलकण्ठः पाणिद्वयं पातु पिनाकपाणिः ।
दोर्मूलमव्यान्मम धर्मबाहुः वक्षःस्थलं दक्षमखान्तकोऽव्यात् ॥ १६ ॥

ममोदरं पातु गिरीन्द्रधन्वा मध्यं ममाव्यान्मदनान्तकारी ।
हेरम्बतातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे ॥ १७ ॥

स्मरारिरव्यान्मम गुह्यदेशं पृष्ठं सदा रक्षतु पार्वतीशः ।
ऊरुद्वयं पातु कुबेरमित्रो जानुद्वयं मे जगदीशवरोऽव्यात् ।
जङ्घायुगं पुङ्गवकेतुरव्यात् पादौ ममाव्यात्सुरवन्द्यपादः ॥ १८ ॥

महेश्वरः पातु दिनादियामे मां मध्ययामेऽवतु वामदेवः ।
त्रिलोचनः पातु तृतीययामे वृषध्वजः पातु दिनान्त्ययामे ॥ १९ ॥

पायान्निशादौ शशिशेखरो मां गङ्गाधरो रक्षतु मां निशीथे ।
गौरीपतिः पातु निशावसाने मृत्युञ्जयो रक्षतु सर्वकालम् ॥ २० ॥

अन्तःस्थितं रक्षतु शङ्करो मां स्थाणुः सदा पातु बहिःस्थितं माम् ।
तदन्तरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समन्तात् ॥ २१ ॥

तिष्ठन्तमव्याद् भुवनैकनाथः पायाद्व्रजन्तं प्रमथाधिनाथः ।
वेदान्तवेद्योऽवतु मां निषण्णं मामव्ययः पातु शिवः शयानम् ॥ २२ ॥

मार्गेषु मां रक्षतु नीलकण्ठः शैलादिदुर्गेषु पुरत्रयारिः ।
अरण्यवासादि महाप्रवासे पायान्मृगव्याध उदारशक्तिः ॥ २३ ॥

कल्पान्तकालोग्रपटुप्रकोपः स्फुटाट्टहासोच्चलिताण्डकोशः ।
घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः ॥ २४ ॥

पत्त्यश्वमातङ्गरथावरूथिनीसहस्रलक्षायुतकोटिभीषणम् ।
अक्षौहिणीनां शतमाततायिनां छिन्द्यान्मृडो घोरकुठारधारया ॥ २५ ॥

निहन्तु दस्यून्प्रलयानलार्चिः ज्वलत्त्रिशूलं त्रिपुरान्तकस्य ।
शार्दूलसिंहर्क्षवृकादिहिंस्रान् सन्त्रासयत्वीशधनुः पिनाकः ॥ २६ ॥

दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्य दुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि ।
उत्पाततापविषभीतिमसद्ग्रहार्तिव्याधींश्च नाशयतु मे जगतामधीशः ॥२७॥

ॐ नमो भगवते सदाशिवाय, सकलतत्त्वात्मकाय, सर्वमन्त्रस्वरूपाय, सर्वयन्त्राधिष्ठिताय, सर्वतन्त्रस्वरूपाय, सर्वतत्त्वविदूराय, ब्रह्मरुद्रावतारिणे, नीलकण्ठाय, पार्वतीमनोहरप्रियाय, सोमसूर्याग्निलोचनाय, भस्मोद्धूलितविग्रहाय, महामणिमुकुटधारणाय, माणिक्यभूषणाय, सृष्टिस्थितिप्रलयकालरौद्रावताराय, दक्षाध्वरध्वंसकाय, महाकालभेदनाय, मूलाधारैकनिलयाय, तत्त्वातीताय, गङ्गाधराय, सर्वदेवादिदेवाय, षडाश्रयाय, वेदान्तसाराय, त्रिवर्गसाधनाय, अनन्तकोटिब्रह्माण्डनायकाय, अनन्त-वासुकि-तक्षक-कार्कोटक-शङ्ख-गुलिक-पद्म-महापद्मेति अष्टमहानाग-कुलभूषणाय, प्रणवस्वरूपाय, चिदाकाशाय, आकाशदिक्-स्वरूपाय, ग्रहनक्षत्रमालिने, सकलाय, कलङ्करहिताय, सकललोकैककर्त्रे, सकललोकैकभर्त्रे, सकललोकैकसंहर्त्रे, सकललोकैकगुरवे, सकललोकैकसाक्षिणे, सकलनिगमगुह्याय, सकलवेदान्तपारगाय, सकललोकैकवरप्रदाय, सकललोकैकशङ्कराय, सकलदुरितार्तिभञ्जनाय, सकलजगदभयङ्कराय ।

शशाङ्कशेखराय, शाश्वतनिजावासाय, निराकाराय, निराभासाय, निरामयाय, निर्मलाय, निर्लोभाय, निर्मदाय, निश्चिन्ताय, निरहङ्काराय, निरङ्कुशाय, निष्कलङ्काय, निर्गुणाय, निष्कामाय, निरुपप्लवाय, निरवद्याय, निरन्तराय, निष्कारणाय, निरन्तकाय, निष्प्रपञ्चाय, निस्सङ्गाय, निर्द्वन्द्वाय, निराधाराय ।

नीरागाय, निष्क्रोधाय, निर्लोपाय, निष्पापाय, निर्भयाय, निर्विकल्पाय, निर्भेदाय, निष्क्रियाय, निस्तुलाय, निस्संशयाय, निरञ्जनाय, निरुपमविभवाय, नित्यशुद्धबुद्धमुक्तपरिपूर्णसच्चिदानन्दाद्वयाय, परमशान्तस्वरूपाय, परमशान्तप्रकाशाय, तेजोरूपाय, तेजोमयाय, तेजोऽधिपतये, जय जय रुद्र महारुद्र, महारौद्र, भद्रावतार, महाभैरव, कालभैरव, कल्पान्तभैरव ।

कपालमालाधर, खट्वाङ्गचर्मखड्गधर, पाशाङ्कुश-डमरु-त्रिशूल-चाप- बाण-गदा-शक्ति-भिण्डिवाल-तोमर-मुसल-भुशुण्डिमुद्गर-पाश- परिघशतघ्नी-चक्राद्यायुधभीषणाकार, सहस्रमुख, दंष्ट्राकरालवदन, विकटाट्टहास, विस्फाटितब्रह्माण्डमण्डल, नागेन्द्रकुण्डल, नागेन्द्रहार, नागेन्द्रवलय, नागेन्द्रचर्मधर, नगेन्द्रनिकेतन, मृत्युञ्जय, त्र्यम्बक, त्रिपुरान्तक ।

विश्वरूप, विरूपाक्ष, विश्वेश्वर, वृषभवाहन, विषविभूषण, विश्वतोमुख, सर्वतोमुख मां रक्ष रक्ष, ज्वल ज्वल, प्रज्वल, प्रज्वल, महामृत्युभयं शमय शमय, अपमृत्युभयं नाशय नाशय, रोगभयम् उत्सादयोत्सादय, विषसर्पभयं शमय शमय, चोरान् मारय मारय, मम शत्रून् उच्चाटयोच्चाटय ।

त्रिशूलेन विदारय विदारय, कुठारेण भिन्धि भिन्धि, खड्गेन छिन्धि छिन्धि, खट्वाङ्गेन विपोथय विपोथय, मम पापं शोधय शोधय, मुसलेन निष्पेषय निष्पेषय, बाणैः सन्ताडय सन्ताडय, यक्षरक्षांसि भीषय भीषय, अशेषभूतान् विद्रावय विद्रावय, कूष्माण्डभूतवेतालमारीगणब्रह्मराक्षसगणान् सन्त्रासय सन्त्रासय।

मम अभयं कुरु कुरु, नरकभयान्माम् उद्धर उद्धर, वित्रस्तं माम् आश्वासय आश्वासय, अमृतकटाक्षवीक्षणेन माम् आलोकय आलोकय, सञ्जीवय सञ्जीवय, क्षुत्तृष्णार्तं माम् आप्यायय आप्यायय, दुःखातुरं माम् आनन्दय आनन्दय, शिवकवचेन माम् आच्छादय आच्छादय, हर हर, मृत्युञ्जय, त्र्यम्बक, सदाशिव, परमशिव, नमस्ते नमस्ते नमः ॥

# १४. शिवमानसपूजा

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥१॥

सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥२॥

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणाभेरिमृदङ्गकाहलकला गीतं च नृत्यं तथा ।
साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥३॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥४॥

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधम्।
विदितमविदितं वा सर्वमेतत् क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शम्भो॥५॥

## १५. काशीविश्वनाथस्तोत्रम्

गङ्गातरङ्गरमणीयजटाकलापं गौरीनिरन्तरविभूषितवामभागम् ।
नारायणप्रियमनङ्गमदापहारं वाराणसीपुरपतिं भज विश्वनाथम् ॥ १ ॥

वाचामगोचरमनेकगुणस्वरूपं वागीशविष्णुसुरसेवितपादपीठम् ।
वामेन विग्रहवरेण कलत्रवन्तं वाराणसीपुरपतिं भज विश्वनाथम् ॥२॥

भूताधिपं भुजगभूषणभूषिताङ्गं व्याघ्राजिनाम्बरधरं जटिलं त्रिनेत्रम् ।
पाशाङ्कुशाभयवरप्रदशूलपाणिं वाराणसीपुरपतिं भज विश्वनाथम् ॥३॥

शीतांशुशोभितकिरीटविराजमानं भालेक्षणानलविशोषितपञ्चबाणम् ।
नागाधिपारचितभासुरकर्णपूरं वाराणसीपुरपतिं भज विश्वनाथम् ॥ ४ ॥

पञ्चाननं दुरितमत्तमतङ्गजानां नागान्तकं दनुजपुङ्गवपन्नगानाम् ।
दावानलं मरणशोकजराटवीनां वाराणसीपुरपतिं भज विश्वनाथम् ॥५॥

तेजोमयं सगुणनिर्गुणमद्वितीयमानन्दकन्दमपराजितमप्रमेयम् ।
नादात्मकं सकलनिष्कलमात्मरूपं वाराणसीपुरपतिं भज विश्वनाथम्॥६॥

आशां विहाय परिहृत्य परस्य निन्दां पापे रतिं च सुनिवार्य मनः समाधौ ।
आदौ स्वहृत्कमलमध्यगतं परेशं वाराणसीपुरपतिं भज विश्वनाथम् ॥७॥

रागादिदोषरहितं स्वजनानुरागं वैराग्यशान्तिनिलयं गिरिजासहायम् ।
माधुर्यधैर्यसुभगं गरलाभिरामं वाराणसीपुरपतिं भज विश्वनाथम् ॥८॥

## १६. लिङ्गाष्टकम्

ब्रह्ममुरारिसुरार्चितलिङ्गं
निर्मलभासितशोभितलिङ्गम् ।
जन्मजदुःखविनाशकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ १ ॥

देवमुनिप्रवरार्चितलिङ्गं
कामदहं करुणाकरलिङ्गम् ।
रावणदर्पविनाशनलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ २ ॥

सर्वसुगन्धिसुलेपितलिङ्गं
बुद्धिविवर्धनकारणलिङ्गम् ।
सिद्धसुरासुरवन्दितलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ ३ ॥

कनकमहामणिभूषितलिङ्गं
फणिपतिवेष्टित शोभितलिङ्गम् ।
दक्षसुयज्ञविनाशनलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ ४ ॥

कुङ्कुमचन्दनलेपितलिङ्गम्
पङ्कजहारसुशोभितलिङ्गम् ।
सञ्चितपापविनाशनलिङ्गम्
तत्प्रणमामि सदाशिवलिङ्गम् ॥ ५ ॥

देवगणार्चितसेवितलिङ्गं
भावैर्भक्तिभिरेव च लिङ्गम् ।
दिनकरकोटिप्रभाकरलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ ६ ॥

अष्टदलोपरिवेष्टितलिङ्गं
सर्वसमुद्भवकारणलिङ्गम् ।
अष्टदरिद्रविनाशकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ ७ ॥

सुरगुरुसुरवरपूजितलिङ्गं
सुरवनपुष्पसदार्चितलिङ्गम् ।
परात्परं परमात्मकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ ८ ॥

लिङ्गाष्टकमिदं पुण्यं यः पठेत् शिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

## १७. शिवनामावलिः

१. कैलासपते नमोऽस्तु ते ।
२. जय कामदहन नमोऽस्तु ते।
३. किरातमूर्ते नमोऽस्तु ते।
४. जय काशिनाथ नमोऽस्तु ते।
५. नन्दिवाहन नमोऽस्तु ते।
६. जय नीलकण्ठ नमोऽस्तु ते।
७. पन्नगभूषण नमोऽस्तु ते।
८. जय पिनाकधारिन् नमोऽस्तु ते।
९. त्रिपुरान्तक नमोऽस्तु ते।
१०. जय त्रिभुवनपाल नमोऽस्तु ते।
११. चन्द्रशेखर नमोऽस्तु ते।
१२. जय चिदम्बरवासः नमोऽस्तु ते।
१३. शम्भो शङ्कर नमोऽस्तु ते।
१४. जय साम्बशिव नमोऽस्तु ते।
१५. भक्तरक्षक नमोऽस्तु ते।
१६. जय भस्मधारिन् नमोऽस्तु ते।
१७. गङ्गाधर नमोऽस्तु ते।
१८. जय गौरीवल्लभ नमोऽस्तु ते।
१९. जय महेश्वर नमोऽस्तु ते।
२०. जय मञ्जुनाथ नमोऽस्तु ते।
२१. कृत्तिवासः नमोऽस्तु ते।
२२. जय विरूपाक्ष नमोऽस्तु ते।
२३. पञ्चवक्त्र नमोऽस्तु ते।
२४. जय व्योमकेश नमोऽस्तु ते।
२५. दक्षाध्वरहर नमोऽस्तु ते।
२६. जगदोद्धार नमोऽस्तु ते।
२७. शूलपाणे नमोऽस्तु ते।
२८. जय विश्वनाथ नमोऽस्तु ते।
२९. शशिशेखर नमोऽस्तु ते।
३०. जय महादेव नमोऽस्तु ते।
३१. त्रिनेत्रधारिन् नमोऽस्तु ते।
३२. भवानीशङ्कर नमोऽस्तु ते।

## १८. श्रीमार्गबन्धुस्तोत्रम्

शम्भो महादेव देव, शिवशम्भो महादेव
देवेश शम्भो, शम्भो महादेव देव ॥

फालावनम्रत् किरीटं, फालनेत्रार्चिषा दग्धपञ्चेषुकीटम् ।
शूलाहतारातिकूटं शुद्धमर्धेन्दुचूडं भजे मार्गबन्धुम् ॥शम्भो॥

अङ्गे विराजद्भुजङ्गम्, अभ्रगङ्गातरङ्गाभिरामोत्तमाङ्गम् ।
ओङ्कारवाटीतुरङ्गं, सिद्धसंसेविताङ्घ्रिं भजे मार्गबन्धुम् ॥शम्भो॥

नित्यं चिदानन्दरूपं, निह्नुताशेषलोकेशवैरिप्रतापम् ।
कार्तस्वरागेन्द्रचापं कृत्तिवासं भजे दिव्यसन्मार्गबन्धुम् ॥शम्भो॥

कन्दर्पदर्पघ्नमीशं कालकण्ठं महेशं महाव्योमकेशम् ।
कुन्दाभदन्तं सुरेशं कोटिसूर्यप्रकाशं भजे मार्गबन्धुम्॥शम्भो॥

मन्दारभूतेरुदारं मन्थरागेन्द्रसारं महागौर्यदूरम् ।
सिन्धूरदूरप्रचारं सिन्धुराजातिधीरं भजे मार्गबन्धुम् ॥शम्भो॥

अप्पय्ययज्वेन्द्रगीतं स्तोत्रराजं पठेद्यस्तु भक्त्या प्रयाणे ।
तस्यार्थसिद्धिं प्रदत्ते मार्गमध्येऽभयं चाशुतोषो महेशः ॥शम्भो॥

*॥ इति श्रीमार्गबन्धुस्तोत्रं समाप्तम् ॥*

## १९. अर्धनारीश्वरस्तोत्रम्

चाम्पेयगौरार्धशरीरकायै कर्पूरगौरार्धशरीरकाय ।
धम्मिल्लकायै च जटाधराय नमः शिवायै च नमः शिवाय ॥१॥

कस्तूरिकाकुङ्कुमचर्चितायै चितारजः पुञ्जविचर्चिताय ।
कृतस्मरायै विकृतस्मराय नमः शिवायै च नमः शिवाय ॥२॥

चलत्क्वणत्कङ्कणनूपुरायै मिलत्फणाभासुरनूपुराय ।
हेमाङ्गदायै भुजगाङ्गदाय नमः शिवायै च नमः शिवाय ॥३॥

विलोलनीलोत्पललोचनायै विकासिपङ्केरुहलोचनाय ।
समेक्षणायै विषमेक्षणाय नमः शिवायै च नमः शिवाय ॥४॥

मन्दारमालाकलितालकायै कपालमालाङ्कितकन्धराय ।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ॥५॥

अम्भोधरश्यामलकुन्तलायै तडित्प्रभाताम्रजटाधराय ।
गिरीश्वरायै निखिलेश्वराय नमः शिवायै च नमः शिवाय ॥६॥

प्रपञ्चसृष्ट्युन्मुखलास्यकायै समस्तसंहारकताण्डवाय ।
जगज्जनन्यै जगदेकपित्रे नमः शिवायै च नमः शिवाय ॥७॥

प्रदीप्तरत्नोज्ज्वलकुण्डलायै स्फुरन्महापन्नगभूषणाय ।
शिवान्वितायै च शिवान्विताय नमः शिवायै च नमः शिवाय ॥८॥

*॥ इति श्रीमच्छङ्कराचार्यप्रणीतमर्धनारीश्वरस्तोत्रं सम्पूर्णम् ॥*

## २०. द्वादशज्योतिर्लिङ्गस्मरणम्

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालमोङ्कारममलेश्वरे ॥१॥

परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करम् ।
सेतुबन्धे तु रामेशं नागेशं दारुकावने ॥२॥

वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे ।
हिमालये तु केदारं घुसृणेशं शिवालये ॥३॥

एतानि ज्योतिर्लिङ्गानि सायम्प्रातः पठेन्नरः ।
सप्तजन्मकृतं पापं स्मरणेन विनश्यति ॥४॥

## २१. श्रीशिवपञ्चाक्षरस्तोत्रम्

नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय तस्मै नकाराय नमः शिवाय ॥१॥

मन्दाकिनीसलिलचन्दनचर्चिताय नन्दीश्वरप्रमथनाथमहेश्वराय ।
मन्दारपुष्पबहुपुष्पसुपूजिताय तस्मै मकाराय नमः शिवाय ॥२॥

शिवाय गौरीवदनाब्जवृन्दसूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठाय वृषध्वजाय तस्मै शिकाराय नमः शिवाय ॥३॥

वसिष्ठकुम्भोद्भवगौतमार्यमुनीन्द्रदेवार्चितशेखराय ।
चन्द्रार्कवैश्वानरलोचनाय तस्मै वकाराय नमः शिवाय ॥४॥

यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय तस्मै यकाराय नमः शिवाय ॥५॥

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥६॥

## २२. चन्द्रशेखराष्टकम्

चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर पाहि माम् ।
चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर रक्ष माम् ॥पल्ल॥

रत्नसानुशरासनं रजताद्रिशृङ्गनिकेतनं
सिञ्जिनीकृतपन्नगेश्वरमच्युताननसायकम् ।
क्षिप्रदग्धपुरत्रयं त्रिदिवालयैरभिवन्दितं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥१॥

पञ्चपादपपुष्पगन्धपदाम्बुजद्वयशोभितं
भाललोचनजातपावकदग्धमन्मथविग्रहम् ।
भस्मदिग्धकलेवरं भवनाशनं भवमव्ययं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥२॥

मत्तवारणमुख्यचर्मकृतोत्तरीयमनोहरं
पङ्कजासनपद्मलोचनपूजिताङ्घ्रिसरोरुहम् ।
देवसिन्धुतरङ्गसीकरसिक्तशुभ्रजटाधरं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥३॥

यक्षराजसखं भगाक्षहरं भुजङ्गविभूषणं
शैलराजसुतापरिष्कृतचारुवामकलेवरम् ।
क्ष्वेडनीलगलं परश्वधधारिणं मृगधारिणं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥४॥

कुण्डलीकृतकुण्डलेश्वरकुण्डलं वृषवाहनं
नारदादिमुनीश्वरस्तुतवैभवं भुवनेश्वरम् ।
अन्धकान्धकमाश्रितामरपादपं शमनान्तकं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥५॥

भेषजं भवरोगिणामखिलापदामपहारिणं
दक्षयज्ञविनाशनं त्रिगुणात्मकं त्रिविलोचनम् ।
भुक्तिमुक्तिफलप्रदं सकलाघसङ्घनिवर्हणं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥६॥

भक्तवत्सलमर्चितं निधिमक्षयं हरिदम्बरं
सर्वभूतपतिं परात्परमप्रमेयमनुत्तमम् ।
सोमवारिणभूहुताशनसोमपानिलखाकृतिं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥७॥

विश्वसृष्टिविधायिनं पुनरेव पालनतत्परं
संहरन्तमपि प्रपञ्चमशेषलोकनिवासिनम् ।
क्रीडयन्तमहर्निशं गणनाथयूथसमन्वितं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥८॥

मृत्युभीतमृकण्डुसूनुकृतस्तवं शिवसन्निधौ
यत्रकुत्र च यः पठेन्न हि तस्य मृत्युभयं भवेत् ।
पूर्णमायुररोगितामखिलार्थसम्पदमादरं
चन्द्रशेखर एव तस्य ददाति मुक्तिमयत्नतः ॥९॥

## २३. श्रीमाङ्गिरीशाष्टकम्

विश्वेश्वर प्रणत-दुःखविनाशकारिन्
सर्वेष्टपूरक परात्परपापहारिन् ।
कुन्देन्दुशङ्खधवलश्रुतिगीतकीर्ते
भो माङ्गिरीश तव पादयुगं नमामि ॥१॥

गङ्गाधर स्वजनपालनशोकहारिन्
शक्रादिसंस्तुतगुण प्रमथाधिनाथ ।
खण्डेन्दुशेखर सुरेश्वर भव्यमूर्ते
भो माङ्गिरीश तव पादयुगं नमामि ॥२॥

त्रैलोक्यनाथ मदनान्तक शूलपाणे
पापौघनाशनपटो परमप्रतापिन् ।
लोमेशविप्रवरदायक कालशत्रो
भो माङ्गिरीश तव पादयुगं नमामि ॥३॥

भो भूतनाथ भवभञ्जन सर्वसाक्षिन्
मृत्युञ्जयान्धकनिषूदन विश्वरूप ।

भो सङ्गमेश्वर सदाशिव भालनेत्र
भो माङ्गिरीश तव पादयुगं नमामि ॥४॥

अम्भोजसम्भवरमापतिपूजिताङ्घ्रे
यक्षेन्द्रमित्र करुणामयकाय शम्भो ।
विद्यानिधे वरद दीनजनैकबन्धो
भो माङ्गिरीश तव पादयुगं नमामि ॥५॥

रुद्राक्षभूषिततनो मृगशावहस्त
मोहान्धकारमिहिर श्रितभालनेत्र ।
गोत्राधरेन्द्रतनयाङ्कितवामभाग
भो माङ्गिरीश तव पादयुगं नमामि ॥६॥

कैलासनाथ कलिदोषविनाशदक्ष
धत्तूरपुष्पपरमप्रिय पञ्चवक्त्र ।
श्रीवारिजाक्ष कुलदैवत कामशत्रो
भो माङ्गिरीश तव पादयुगं नमामि ॥७॥

योगीन्द्रहृत्कमलकोशसदानिवास
ज्ञानप्रदायक शरण्य दुरन्तशक्ते ।
यज्ञेश यज्ञफलदायक यज्ञमूर्ते
भो माङ्गिरीश तव पादयुगं नमामि ॥८॥

ये माङ्गिरीशचरणस्मरणानुरक्ताः
माङ्गीश्वराष्टकमिदं सततं पठन्ति ।
तेऽमुष्मिकं सकलसौख्यमपीह भुक्त्वा
देहान्तकालसमये शिवतां व्रजन्ति ॥

*॥ भो माङ्गिरीश तव पादयुगं नमामि ॥*

# २४. पशुपत्यष्टकम्

प्रभुं प्राणनाथं विभुं विश्वनाथं जगन्नाथनाथं सदानन्दभाजम् ।
भवद्भव्यभूतेश्वरं भूतनाथं शिवं शङ्करं शम्भुमीशानमीडे ॥१॥

गले रुण्डमालं तनौ सर्पजालं महाकालकालं गणेशादिपालम् ।
जटाजूटभृङ्गोत्तरङ्गैर्विशालं शिवं शङ्करं शम्भुमीशानमीडे ॥२॥

मुदामाकरं मण्डनं मण्डयन्तं महामण्डलं भस्मभूषाधरन्तम् ।
अनादिं ह्यपारं महामोहमारं शिवं शङ्करं शम्भुमीशानमीडे ॥३॥

तटाधोनिवासं महाट्टाट्टहासं महापापनाशं सदा सुप्रकाशम् ।
गिरीशं गणेशं सुरेशं महेशं शिवं शङ्करं शम्भुमीशानमीडे ॥४॥

गिरीन्द्रात्मजासङ्गृहीतार्धदेहं गिरौ संस्थितं सर्वदासन्नगेहम् ।
परब्रह्म ब्रह्मादिभिर्वन्द्यमानं शिवं शङ्करं शम्भुमीशानमीडे ॥५॥

कपालं त्रिशूलं कराभ्यां दधानं पदाम्भोजनम्राय कामं ददानम् ।
बलीवर्दयानं सुराणां प्रधानं शिवं शङ्करं शम्भुमीशानमीडे ॥६॥

शरच्चन्द्रगात्रं गुणानन्दपात्रं त्रिनेत्रं पवित्रं धनेशस्य मित्रम् ।
अपर्णाकलत्रं चरित्रं विचित्रं शिवं शङ्करं शम्भुमीशानमीडे ॥७॥

हरं सर्पहारं चिताभूविहारं भवं वेदसारं सदा निर्विकारम् ।
श्मशाने वसन्तं मनोजं दहन्तं शिवं शङ्करं शम्भुमीशानमीडे ॥८॥

स्तवं यः प्रभाते नरः शूलपाणेः पठेत्सर्वदा भर्गभावानुरक्तः ।
सुपुत्रं धनं धान्यमित्रं कलत्रं विचित्रं समासाद्य मोक्षं प्रयाति ।
शिवं शङ्करं शम्भुमीशानमीडे ॥९॥

# २५. हनुमत्कृतशिवस्तोत्रम्

नमस्ते रुद्र गौरीश नमस्ते गिरिधन्विने ।
नमस्तेऽब्धिनिषङ्गाय नमस्ते हरिसायक ॥१॥

नमस्ते हरिकेशाय नमस्ते हरिदम्बर ।
नमस्ते व्योमकेशाय नमो मीढुष्टमाय ते ॥२॥

नमस्ते वामदेवाय महादेवाय ते नमः ।
विरूपाक्ष नमस्तेऽस्तु विश्वेश्वर नमोऽस्तु ते ॥३॥

नमो सर्वात्मने तुभ्यं नमः सर्वाश्रयाय ते ।
नमः सर्वज्ञ सर्वादे नमस्ते सर्वकारण ॥४॥

आपश्च पृथिवी च त्वं प्रकृतिस्सर्वदेहिनाम्।
त्वमेवार्कश्च सोमश्च यजमानस्त्वमेव च ॥५॥

त्वमेव जगतः कर्ता त्वमेव परिरक्षिता ।
संहर्ता च त्वमेवास्य नमस्ते परमात्मने ॥६॥

दारिद्र्यदुःखशमनं सर्वक्लेशविनाशनम् ।
सर्वसम्पत्प्रदं शम्भो नौमि त्वां गिरिजापतिम् ॥७॥

सत्यसङ्कल्पमीशानं सत्यस्थं सत्यसुन्दरम् ।
सत्याश्रयं महादेवं नौमि त्वामेव सन्ततम् ॥८॥

दौर्भाग्यखेदरहिताः सर्वसौभाग्यसंयुताः ।
यस्य भक्ता विराजन्ते नीलग्रीवं नमाम्यहम् ॥९॥

प्रसीद सच्चिदानन्द निग्रहानुग्रहे रत ।
ऐश्वर्यजलधे शम्भो भूयो भूयः प्रसीद मे ॥१०॥

# २६. श्रीउमामहेश्वरस्तोत्रम्

नमः शिवाभ्यां नवयौवनाभ्यां परस्पराश्लिष्टवपुर्धराभ्याम् ।
नगेन्द्रकन्यावृषकेतनाभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥१॥

नमः शिवाभ्यां सरसोत्सवाभ्यां नमस्कृताभीष्टवरप्रदाभ्याम् ।
नारायणेनार्चितपादुकाभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥२॥

नमः शिवाभ्यां वृषवाहनाभ्यां विरिञ्चिविष्ण्विन्द्रसुपूजिताभ्याम् ।
विभूतिपाटीरविलेपनाभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥३॥

नमः शिवाभ्यां जगदीश्वराभ्यां जगत्पतिभ्यां जयविग्रहाभ्याम् ।
जम्भारिमुख्यैरभिवन्दिताभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥४॥

नमः शिवाभ्यां परमौषधाभ्यां पञ्चाक्षरीपञ्जररञ्जिताभ्याम् ।
प्रपञ्चसृष्टिस्थितिसंहृताभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥५॥

नमः शिवाभ्यां कलिनाशनाभ्यां कङ्कालकल्याणवपुर्धराभ्याम् ।
कैलासशैलस्थितदेवताभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥६॥

नमः शिवाभ्यामशुभापहाभ्याम् अशेषलोकैकविशेषिताभ्याम् ।
अकुण्ठिताभ्यां स्मृतिसम्भृताभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥७॥

नमः शिवाभ्यां विषमेक्षणाभ्यां बिल्वच्छदामल्लिकदामभृद्भ्याम् ।
शोभावती-शान्तवतीश्वराभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥८॥

*॥ श्रीशङ्करभगवत्पादकृतं स्तोत्रं सङ्क्षिप्तम् ॥*

## २७. दारिद्र्यदहनशिवस्तोत्रम्

विश्वेश्वराय विषकण्ठविभूषणाय
कर्णामृताय शशिशेखरधारणाय ।
कर्पूरकान्तिधवलाय जटाधराय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥१॥

गौरीप्रियाय रजनीशकलाधराय
कालान्तकाय भुजगाधिपकङ्कणाय ।
गङ्गाधराय गजराजविमर्दनाय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥२॥

भक्तिप्रियाय भवरोगभयापहाय
उग्राय दुर्गभवसागरतारणाय ।
ज्योतिर्मयाय गुणनामसुपूजिताय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥३॥

चर्माम्बराय शवभस्मविलेपनाय
भालेक्षणाय फणिकुण्डलमण्डिताय ।
मञ्जीरपादयुगलाय जटाधराय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥४॥

पञ्चाननाय फणिराजविभूषणाय
हेमांशुकाय भुवनत्रयमण्डिताय ।
आनन्दभूमिवरदाय नटेश्वराय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥५॥

भानुप्रियाय भवसागरतारणाय
कालान्तकाय कमलासनपूजिताय ।
नेत्रत्रयाय शुभलक्षणलक्षिताय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥६॥

रामप्रियाय रघुनाथवरप्रदाय
नादप्रियाय नरकार्णवतारणाय ।
पुण्येषु पुण्यभरिताय सुरार्चिताय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥७॥

मुक्तेश्वराय फलदाय गणेश्वराय
गीतप्रियाय वृषभेश्वरवाहनाय ।
मातङ्गचर्मवसनाय महेश्वराय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥८॥

वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिवारणम् ।
त्रिसन्ध्यं यः पठेन्नित्यं स हि सर्वमवाप्नुयात् ॥९॥

*॥ इति वसिष्ठविरचितं दारिद्र्यदहनस्तोत्रं सम्पूर्णम् ॥*

## २८. कालभैरवाष्टकम्

देवराजसेव्यमानपावनाङ्घ्रिपङ्कजं
व्यालयज्ञसूत्रमिन्दुशेखरं कृपाकरम् ।
नारदादियोगिवृन्दवन्दितं दिगम्बरं
काशिकापुराधिनाथकालभैरवं भजे ॥१॥

भानुकोटिभास्वरं भवाब्धितारकं परं
नीलकण्ठमीप्सितार्थदायकं त्रिलोचनम् ।
कालकालमम्बुजाक्षमक्षशूलमक्षरं
काशिकापुराधिनाथकालभैरवं भजे ॥२॥

शूलटङ्कपाशदण्डपाणिमादिकारणं
श्यामकायमादिदेवमक्षरं निरामयम् ।
भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं
काशिकापुराधिनाथकालभैरवं भजे ॥३॥

भुक्तिमुक्तिदायकं प्रशस्तचारुविग्रहं
भक्तवत्सलं स्थिरं समस्तलोकविग्रहम् ।
विनिक्वणन्मनोज्ञहेमकिङ्किणीलसत्कटिं
काशिकापुराधिनाथकालभैरवं भजे ॥४॥

धर्मसेतुपालकं त्वधर्ममार्गनाशकं
कर्मपाशमोचकं सुशर्मदायकं विभुम् ।
स्वर्णवर्णकेशपाशशोभिताङ्गनिर्मलं
काशिकापुराधिनाथकालभैरवं भजे ॥५॥

रत्नपादुकाप्रभाभिरामपादयुग्मकं
नित्यमद्वितीयमिष्टदैवतं निरञ्जनम् ।
मृत्युदर्पनाशनं करालदंष्ट्रभूषणं
काशिकापुराधिनाथकालभैरवं भजे ॥६॥

अट्टहासभिन्नपद्मजाण्डकोशसन्ततिं
दृष्टिपातनष्टपापजालमुग्रशासनम् ।
अष्टसिद्धिदायकं कपालमालिकाधरं
काशिकापुराधिनाथकालभैरवं भजे ॥७॥

भूतसङ्घनायकं विशालकीर्तिदायकं
काशिवासिलोकपुण्यपापशोधकं विभुम् ।
नीतिमार्गकोविदं पुरातनं जगत्पतिं
काशिकापुराधिनाथकालभैरवं भजे ॥८॥

कालभैरवाष्टकं पठन्ति ये मनोहरं
ज्ञानमुक्तिसाधकं विचित्रपुण्यवर्धनम् ।
शोकमोहलोभदैन्यकोपतापनाशनं
ते प्रयान्ति कालभैरवाङ्घ्रिसन्निधिं ध्रुवम् ॥९॥

## २९. शिवापराधक्षमापनस्तोत्रम्

आदौ कर्मप्रसङ्गात्कलयति कलुषं मातृकुक्षौ स्थितं मां
विण्मूत्रामेध्यमध्ये क्वथयति नितरां जाठरो जातवेदाः ।
यद्यद्वै तत्र दुःखं व्यथयति नितरां शक्यते केन वक्तुं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥१॥

बाल्ये दुःखातिरेको मललुलितवपुः स्तन्यपाने पिपासुः
नो शक्तश्चेन्द्रियेभ्यो भवमलजनिता जन्तवो मां तुदन्ति ।
नानारोगातिदुःखाद् रुदनपरवशः शङ्करं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥२॥

प्रौढोऽहं यौवनस्थो विषयविषधरैः पञ्चभिर्मर्मसन्धौ
दष्टो नष्टो विवेकः सुतधनयुवतिस्वादसौख्ये निषण्णः ।
शैवीचिन्ताविहीनं मम हृदयमहो मानगर्वाधिरूढं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥३॥

वार्धक्ये चेन्द्रियाणां विकलगतिमतिश्चाधिदैवादितापैः
प्राप्तै रोगैर्वियोगैर्व्यसनकृशतनोर्ज्ञप्तिहीनं च दीनम् ।
मिथ्यामोहाभिलाषैर्भ्रमति मम मनो धूर्जटेर्ध्यानशून्यं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥४॥

स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गाङ्गतोयं
पूजार्थं वा कदाचिद्बहुतरगहनेऽखण्डबिल्वीदलं वा ।
नानीता पद्ममाला सरसि विकसिता गन्धपुष्पैस्त्वदर्थं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥५॥

दुग्धैर्मध्वाज्ययुक्तैर्दधिगुडसहितैः स्नापितं नैव लिङ्गं
नो लिप्तं चन्दनाद्यैः कनकविरचितैः पूजितं न प्रसूनैः ।
धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैव भक्ष्योपहारैः
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥६॥

नो शक्यं स्मार्तकर्म प्रतिपदगहनप्रत्यवायाकुलाढ्ये
श्रौते वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गानुसारे ।
तत्त्वेऽज्ञातो विचारैः श्रवणमननयोः किं निदिध्यासितव्यं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥७॥

ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो
हव्यं ते लक्षसङ्ख्यैर्हुतवहवदने नार्पितं बीजमन्त्रैः ।
नो तप्तं गाङ्गतीरे व्रतजपनियमैः रुद्रजाप्यैर्न वेदैः
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥८॥

स्थित्वा स्थाने सरोजे प्रणवमयमरुत्कुम्भिते सूक्ष्ममार्गे
शान्ते स्वान्ते प्रलीने प्रकटितविभवे ज्योतिरूपे पराख्ये ।
लिङ्गाग्रे ब्रह्मवाक्ये सकलतनुगतं शङ्करं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥९॥

नग्नो निःसङ्गशुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो
नासाग्रन्यस्तदृष्टिर्विदितभवगुणो नैव दृष्टः कदाचित् ।
उन्मन्यावस्थया त्वां विगतगतिमतिः शङ्करं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥१०॥

शुद्धं वेदान्तवेद्यं हृदयसरसिजे दीप्तमुद्यत्प्रकाशं
सत्यं शान्तस्वरूपं सकलमुनिमनः पद्मषण्डैकवेद्यम्।
जाग्रत्स्वप्ने सुषुप्तौ त्रिगुणविरहितं शङ्करं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥११॥

## ३०. वेदसारशिवस्तोत्रम्

पशूनां पतिं पापनाशं परेशं
गजेन्द्रस्य कृत्तिं वसानं वरेण्यम् ।
जटाजूटमध्ये स्फुरद्गाङ्गवारिं
महादेवमेकं स्मरामि स्मरारिम् ॥१॥

महेशं सुरेशं सुरारातिनाशं
विभुं विश्वनाथं विभूत्यङ्गभूषम् ।
विरूपाक्षमिन्द्वर्कवह्नित्रिनेत्रं
सदानन्दमीडे प्रभुं पञ्चवक्त्रम् ॥२॥

गिरीशं गणेशं गले नीलवर्णं
गवेन्द्राधिरूढं गुणातीतरूपम् ।
शिवं भास्वरं भस्मना भूषिताङ्गं
भवानीकलत्रं भजे पञ्चवक्त्रम् ॥३॥

शिवाकान्त शम्भो शशाङ्कार्धमौले
महेशान शूलिन् जटाजूटधारिन् ।
त्वमेको जगद्व्यापको विश्वरूपः
प्रसीद प्रसीद प्रभो पूर्णरूप ॥४॥

परात्मानमेकं जगद्बीजमाद्यं
निरीहं निराकारमोङ्कारवेद्यम् ।
यतो जायते पाल्यते येन विश्वं
तमीशं भजे लीयते यत्र विश्वम् ॥५॥

न भूमिर्न चापो न वह्निर्न वायुः
न चाकाशमास्ते न तन्द्रा न निद्रा ।

न चोष्णं न शीतं न देशो न वेशो
न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे ॥६॥

अजं शाश्वतं कारणं कारणानां
शिवं केवलं भासकं भासकानाम् ।
तुरीयं तमः पारमाद्यन्तहीनं
प्रपद्ये परं पावनं द्वैतहीनम् ॥७॥

नमस्ते नमस्ते विभो विश्वमूर्ते
नमस्ते नमस्ते चिदानन्दमूर्ते ।
नमस्ते नमस्ते तपोयोगगम्य
नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥८॥

नमो शूलपाणे विभो विश्वनाथ
महादेव शम्भो महेश त्रिनेत्र ।
शिवाकान्त शान्त स्मरारे पुरारे
त्वदन्यो वरेण्यो न मान्यो न गण्यः ॥९॥

शम्भो महेश करुणामय शूलपाणे
गौरीपते पशुपते पशुपाशनाशिन् ।
काशीपते करुणया जगदेतदेकस्त्वं
हंसि पासि विदधासि महेश्वरोऽसि ॥१०॥

त्वत्तो जगद्भवति देव भव स्मरारे
त्वय्येव तिष्ठति जगन्मृड विश्वनाथ ।
त्वय्येव गच्छति लयो जगदेतदीश
लिङ्गात्मके हर चराचर-विश्वरूपिन् ॥११॥

# ३१. शिवताण्डवस्तोत्रम्

जटाकटाह–सम्भ्रमभ्रमन्निलिम्पनिर्झरी–
विलोलवीचिवल्लरीविराजमानमूर्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥१॥

धराधरेन्द्रनन्दिनीविलासबन्धुबन्धुर–
स्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे ।
कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि
क्वचिच्चिदम्बरे मनो विनोदमेतु वस्तुनि ॥२॥

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा–
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे ।
मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे
मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥३॥

सहस्रलोचनप्रभृत्यशेषलेखशेखर–
प्रसूनधूलिधोरणीविधूसराङ्घ्रिपीठभूः ।
भुजङ्गराजमालया निबद्धजाटजूटकः
श्रियै चिराय जायतां चकोरबन्धुशेखरः ॥४॥

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभा–
निपीतपञ्चसायकं नमन्निलिम्पनायकम् ।
सुधामयूखलेखया विराजमानशेखरं
महाकपालिसम्पदे शिरोजटालमस्तु नः ॥५॥

करालभालपट्टिकाधगद्धगद्धगज्ज्वल-
द्धनञ्जयाधरीकृत-प्रचण्डपञ्चसायके ।
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक-
प्रकल्पनैकशिल्पिनि त्रिलोचने मतिर्मम ॥६॥

नवीनमेघमण्डलीनिरुद्धदुर्धरस्फुरत्-
कुहूनिशिथिनीतमः प्रबन्धबद्धकन्धरः ।
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः
कलानिधानबन्धुरः श्रियं जगद्धुरन्धरः ॥७॥

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमच्छटा-
विडम्बिकण्ठकन्धरारुचिप्रबन्धकन्धरम् ।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे ॥८॥

अगर्वसर्वमङ्गलाकलाकदम्बमञ्जरी-
रसप्रवाहमाधुरीविजृम्भणामधुव्रतम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥९॥

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमस्फुरद्-
धगद्धगद्विनिर्गमत्करालभालहव्यवाट्।
धिमिद्धिमिद्धिमिद्ध्वनन्मृदङ्गतुङ्गमङ्गल-
ध्वनिक्रमप्रवर्तितप्रचण्डताण्डवशिवः ॥१०॥

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजो-
र्गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
समं प्रवृत्तयन् मनः कदा सदाशिवं भजे ॥११॥

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरस्थमञ्जलिं वहन् ।
विमुक्तलोललोचनो ललामभाललग्नकः
शिवेति मन्त्रमुच्चरन् कदा सुखी भवाम्यहम् ॥१२॥

इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं
पठन् स्मरन् ब्रुवन् नरो विशुद्धिमेति सन्ततम् ।
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं
विमोहनं हि देहिनां सुशङ्करस्य चिन्तनम् ॥१३॥

पूजावसानसमये दशवक्त्रगीतं
यः शम्भुपूजनमिदं पठति प्रदोषे ।
तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां
लक्ष्मीं सदैवसुमुखीं प्रददाति शम्भुः ॥१४॥

*॥ इति रावण-विरचितं शिवताण्डवस्तोत्रं सम्पूर्णम् ॥*

# ३२. श्रीशिवगुरुस्तोत्रम्

संविद्रूपाय शान्ताय शम्भवे सर्वसाक्षिणे ।
शेमुषीसिद्धरूपाय शिवाय गुरवे नमः ॥१॥

त्रैलोक्यसम्पदालेख्यसमुल्लेखनभित्तये ।
सच्चिदानन्दरूपाय शिवाय गुरवे नमः ॥२॥

देशकालानवच्छिन्नदृष्टिमात्रस्वरूपिणे ।
देशिकौघत्रयान्ताय शिवाय गुरवे नमः ॥३॥

विश्वात्मने तैजसाय प्राज्ञाय परमात्मने ।
विश्वावस्थाविहीनाय शिवाय गुरवे नमः ॥४॥

विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ।
प्रकाशानां प्रकाशाय शिवाय गुरवे नमः ॥५॥

परतन्त्राय भक्तानां स्वतन्त्राय दयालवे ।
विद्यावतारदेहाय शिवाय गुरवे नमः ॥६॥

पाशच्छेदप्रवीणाय प्रपञ्चोपशमाय च ।
प्रणवाब्जपतङ्गाय शिवाय गुरवे नमः ॥७॥

नवाय नवरूपाय नवनादविलासिने ।
निरञ्जनोपदेशाय शिवाय गुरवे नमः ॥८॥

संविन्मुद्राय भद्राय सर्वविद्याप्रदायिने ।
संवित्सिंहासनस्थाय शिवाय गुरवे नमः ॥९॥

सर्वागमौक्तिकलितं स्तोत्रं शिवगुरोः परम् ।
संवित्साधनसारांशं यः पठेत् सिद्धिभाग् भवेत् ॥१०॥

## ३३. शङ्कराष्टकम्

शीर्षजटागणभारं गरलाहारं समस्तसंहारम् ।
कैलासाद्रिविहारं पारं भववारिधेरहं वन्दे ॥१॥

चन्द्रकलोज्ज्वलभालं कण्ठव्यालं जगत्त्रयीपालम् ।
कृतनरमस्तकमालं कालं कालस्य कोमलं वन्दे ॥२॥

कोपेक्षणहतकामं स्वात्मारामं नगेन्द्रजावामम् ।
संसृति-शोकविरामं श्यामं कण्ठेन कारणं वन्दे ॥३॥

कटितटविलसितनागं खण्डितयागं महाद्भुतत्यागम् ।
विगतविषयरसरागं भागं यज्ञेषु बिभ्रतं वन्दे ॥४॥

त्रिपुरादिकदनुजान्तं गिरिजाकान्तं सदैव संशान्तम् ।
लीलाविजितकृतान्तं भान्तं स्वान्तेषु देहिनां वन्दे ॥५॥

सुरसरिदाप्लुतकेशं त्रिदशकुलेशं हृदालयावेशम् ।
विगताशेषक्लेशं देशं सर्वेष्टसम्पदं वन्दे ॥६॥

करतलकलितपिनाकं विगतजराकं सुकर्मणां पाकम् ।
परपद-वीतवराकं नाकङ्गमपूगवन्दितं वन्दे ॥७॥

भूतिविभूषितकायं दुस्तरमायं विवर्जितापायम् ।
प्रमथसमूहसहायं सायं प्रातर्निरन्तरं वन्दे ॥८॥

यस्तु पदाष्टकमेतद् ब्रह्मानन्देन निर्मितं नित्यम् ।
पठति समाहितचेताः प्राप्नोत्यन्ते स शैवमेव पदम्॥९॥

*॥इति श्रीब्रह्मानन्दविरचितं शङ्कराष्टकं सम्पूर्णम्॥*



श्रीदुर्गापरमेश्वरी देवी

# ३. देवीस्तोत्राणि

## ३४. दुर्गा–प्रातःस्मरणम्

प्रातः स्मरामि शरदिन्दुकरोज्ज्वलाभाम्
सद्रत्नवन्मकरकुण्डलहारभूषाम् ।
दिव्यायुधोर्जितसुनीलसहस्रहस्ताम्
रक्तोत्पलाभचरणां भवतीं परेशाम् ॥१॥

प्रातर्नमामि महिषासुरचण्डमुण्ड –
शुम्भासुरप्रमुखदैत्यविनाशदक्षाम् ।
ब्रह्मेन्द्ररुद्रमुनिमोहनशीलललीलाम्
चण्डीं समस्तसुरमूर्तिमनेकरूपाम् ॥२॥

प्रातर्भजामि भजतामभिलाषदात्रीम्
धात्रीं समस्तजगतां दुरितापहन्त्रीम् ।
संसारबन्धनविमोचनहेतुभूताम्
मायां परां समधिगम्य परस्य विष्णोः ॥३॥

श्लोकत्रयमिदं देव्याश्चण्डिकायाः पठेन्नरः ।
सर्वान्कामानवाप्नोति विष्णुलोके महीयते ॥४॥

*॥ इति दुर्गा–प्रातस्स्मरण–स्तोत्रं समाप्तम् ॥*

# ३५. देव्याः कवचम्

ॐ अस्य श्रीचण्डीकवचस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, चामुण्डा देवता, अङ्गन्यासोक्तमातरो बीजम्, दिग्बन्धदेवतास्तत्त्वम्, श्रीजगदम्बाप्रीत्यर्थे जपे विनियोगः।

ॐ नमश्चण्डिकायै॥

मार्कण्डेय उवाच।

ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम्।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥१॥

ब्रह्मोवाच।

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम्।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥२॥

प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी।
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥३॥

पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च।
सप्तमं कालरात्रीति महागौरीति चाष्टमम् ॥४॥

नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः।
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥५॥

अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे।
विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥६॥

न तेषां जायते किञ्चिदशुभं रणसङ्कटे।
नापदं तस्य पश्यामि शोकदुःखभयं न हि ॥७॥

यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते।
ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः ॥८॥

प्रेतसंस्था तु चामुण्डा वाराही महिषासना।
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ॥९॥

माहेश्वरी वृषारूढा कौमारी शिखिवाहना।
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥१०॥

श्वेतरूपधरा देवी ईश्वरी वृषवाहना।
ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ॥११॥

इत्येता मातरः सर्वाः सर्वयोगसमन्विताः।
नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥१२॥

दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः।
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥१३॥

खेटकं तोमरं चैव परशुं पाशमेव च।
कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ॥१४॥

दैत्यानां देहनाशाय भक्तानामभयाय च।
धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥१५॥

नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे।
महाबले महोत्साहे महाभयविनाशिनि ॥१६॥

त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि।
प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता ॥१७॥

दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी।
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी ॥१८॥

उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी।
ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद् वैष्णवी तथा ॥१९॥

एवं दश दिशो रक्षेच्चामुण्डा शववाहना।
जया मे चाग्रतः पातु विजया पातु पृष्ठतः ॥२०॥

अजिता वामपार्श्वे तु दक्षिणे चापराजिता।
शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥२१॥

मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी।
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ॥२२॥

शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी
कपोलौ कालिका रक्षेत्कर्णमूले तु शाङ्करी ॥२३॥

नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका।
अधरे चामृतकला जिह्वायां च सरस्वती ॥२४॥

दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका।
घण्टिकां चित्रघण्टा च महामाया च तालुके ॥२५॥

कामाक्षी चिबुकं रक्षेद् वाचं मे सर्वमङ्गला।
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥२६॥

नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी।
स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी ॥२७॥

हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च।
नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी ॥२८॥

स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी।
हृदये ललितादेवी उदरे शूलधारिणी ॥२९॥

नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा।
पूतना कामिका मेढ्रं गुदे महिषवाहिनी ॥३०॥

कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी।
जङ्घे महाबला रक्षेत्सर्वकामप्रदायिनी ॥३१॥

गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी।
पादाङ्गुलीषु श्री रक्षेत्पादाधस्तलवासिनी ॥३२॥

नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी।
रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥३३॥

रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती।
अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥३४॥

पद्मावती पद्मकोशे कफे चूडामणिस्तथा।
ज्वालामुखी नखज्वालामभेद्या सर्वसन्धिषु ॥३५॥

शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा।
अहङ्कारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥३६॥

प्राणापानौ तथा व्यानमुदानं च समानकम्।
वज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभना ॥३७॥

रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी।
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥३८॥

आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी।
यशः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी॥३९॥

गोत्रमिन्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके।
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥४०॥

पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा।
राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता ॥४१॥

रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु।
तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ॥४२॥

पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः।
कवचेनावृतो नित्यं यत्र यत्रैव गच्छति ॥४३॥

तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम्।
परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥४४॥

निर्भयो जायते मर्त्यः सङ्ग्रामेष्वपराजितः।
त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥४५॥

इदं तु देव्याः कवचं देवानामपि दुर्लभम्।
यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रध्दयान्वितः ॥४६॥

दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजितः।
जीवेद् वर्षशतं साग्रमपमृत्युविवर्जितः ॥४७॥

नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः।
स्थावरं जङ्गमं चैव कृत्रिमं चापि यद्विषम् ॥४८॥

अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले।
भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः ॥४९॥

सहजा कुलजा माला डाकिनी शाकिनी तथा।
अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः ॥५०॥

ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः।
ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ॥५१॥

नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते।
मानोन्नतिर्भवेद् राज्ञस्तेजोवृद्धिकरं परम् ॥५२॥

यशसा वर्धते सोऽपि कीर्तिमण्डितभूतले।
जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ॥५३॥

यावद्भूमण्डलं धत्ते सशैलवनकाननम्।
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी ॥५४॥

देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम्।
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥५५॥

लभते परमं रूपं शिवेन सह मोदते।।ॐ॥ ॥५६॥

*॥ इति देव्याः कवचं सम्पूर्णम् ॥*

## ३६. अर्गलास्तोत्रम्

ॐ अस्य श्रीअर्गलास्तोत्रमन्त्रस्य विष्णुर्ऋषिः,अनुष्टुप् छन्दः,श्रीमहालक्ष्मीर्देवता, श्रीजगदम्बाप्रीतये जपे विनियोगः॥

ॐ नमश्चण्डिकायै॥

मार्कण्डेय उवाच।

ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते॥१॥

जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥२॥

मधुकैटभविद्राविविधातृवरदे नमः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥३॥

महिषासुरनिर्णाशि भक्तानां सुखदे नमः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥४॥

रक्तबीजवधे देवि चण्डमुण्डविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥५॥

शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥६॥

वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥७॥

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥८॥

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥९॥

स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१०॥

चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥११॥

देहि सौभाग्यमारोग्यं देहि मे परमं सुखम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१२॥

विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१३॥

विधेहि देवि कल्याणं विधेहि परमां श्रियम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१४॥

सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१५॥

विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१६॥

प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१७॥

चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१८॥

कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१९॥

हिमाचलसुतानाथसंस्तुते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२०॥

इन्द्राणीपतिसद्भावपूजिते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२१॥

देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२२॥

देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२३॥

पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम्।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥२४॥

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः।
स तु सप्तशतीसङ्ख्यावरमाप्नोति सम्पदाम्॥ॐ॥॥२५॥

*॥ इति देव्या अर्गलास्तोत्रं सम्पूर्णम् ॥*

# ३७. कीलकस्तोत्रम्

ॐ अस्य श्रीकीलकमन्त्रस्य शिवऋषिः, अनुष्टुप् छन्दः,
श्रीमहासरस्वतीदेवता, श्रीजगदम्बाप्रीत्यर्थं जपे विनियोगः।

ॐ नमश्चण्डिकायै ॥

मार्कण्डेय उवाच

ॐ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥१॥

सर्वमेतद्विजानीयान्मन्त्राणामभिकीलकम्।
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥२॥

सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि।
एतेन स्तुवतां देवी स्तोत्रमात्रेण सिद्ध्यति ॥३॥

न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते।
विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥४॥

समग्राण्यपि सिद्ध्यन्ति लोकशङ्कामिमां हरः।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ॥५॥

स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः।
समाप्तिर्न च पुण्यस्य तां यथावन्नियन्त्रणाम् ॥६॥

सोऽपि क्षेममवाप्नोति सर्वमेवं न संशयः।
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥७॥

ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति।
इत्थं रूपेण कीलेन महादेवेन कीलितम् ॥८॥

यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम्।
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः ॥९॥

न चैवाप्यटतस्तस्य भयं क्वापीह जायते।
नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥१०॥

ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणो विनश्यति।
ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ॥११॥

सौभाग्यादि च यत् किञ्चिद् दृश्यते ललनाजने।
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् ॥१२॥

शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥१३॥

ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः।
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥ॐ॥॥१४॥

*॥ इति देव्याः कीलकस्तोत्रं सम्पूर्णम् ॥*

## ३८. तन्त्रोक्तं रात्रिसूक्तम्

ॐ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम्।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥१॥

ब्रह्मोवाच

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका।
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ॥२॥

अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः।
त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा ॥३॥

त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत्।
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥४॥

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥५॥

महाविद्या महामाया महामेधा महास्मृतिः।
महामोहा च भवती महादेवी महासुरी ॥६॥

प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥७॥

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥८॥

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥९॥

सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी।
परापराणां परमा त्वमेव परमेश्वरी ॥१०॥

यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा॥११॥

यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत्।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥१२॥

विष्णुः शरीरग्रहणमहमीशान एव च।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥१३॥

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता।
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥१४॥

प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥१५॥

*॥ इति रात्रिसूक्तम्॥*

# ३९. महिषान्तकरीसूक्तम्

ॐ ऋषिरुवाच।

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन्दुरात्मनि सुरारिबले च देव्या।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्‌गमचारुदेहाः ॥१॥

देव्या यया ततमिदं जगदात्मशक्त्या
निश्शेषदेवगणशक्तिसमूहमूर्त्या।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥२॥

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च।
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ॥३॥

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥४॥

किं वर्णयाम तव रूपमचिन्त्यमेतत्
किं चातिवीर्यमसुरक्षयकारि भूरि।
किं चाहवेषु चरितानि तवाद्भुतानि
सर्वेषु देव्यसुरदेवगणादिकेषु ॥५॥

हेतुः समस्तजगतां त्रिगुणापि दोषै-
र्न ज्ञायसे हरिहरादिभिरप्यपारा।

सर्वाश्रयाखिलमिदं जगदंशभूतम्
अव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥६॥

यस्याः समस्तसुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवि।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥७॥

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्व-
मभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि सा भगवती परमा हि देवि ॥८॥

शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम्।
देवी त्रयी भगवती भवभावनाय
वार्ता च सर्वजगतां परमार्तिहन्त्री ॥९॥

मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा।
श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥१०॥

ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम्।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥११॥

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-
मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः।

प्राणान्मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥१२॥

देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि।
विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतं बलं सुविपुलं महिषासुरस्य ॥१३॥

ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥१४॥

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोति।
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥१५॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता ॥१६॥

एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम्।
सङ्ग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान् विनिहंसि देवि ॥१७॥

दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम्।
लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥१८॥

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम्।
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत् ॥१९॥

दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः।
वीर्यं च हन्तृ हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥२०॥

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र।
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥२१॥

त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते ॥२२॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥२३॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥२४॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् ॥२५॥

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ॥२६॥

# ४०. अपराजितास्तोत्रम्

देवा ऊचुः।

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥१॥

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥२॥

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥३॥

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥४॥

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥५॥

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६॥

या देवी सर्वभूतेषु चेतनेत्यभिधीयते।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७॥

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८॥

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥९॥

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१०॥

या देवी सर्वभूतेषुच्छायारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥११॥

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१२॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१३॥

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१४॥

या देवी सर्वभूतेषु जातिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१५॥

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१६॥

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१७॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१८॥

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१९॥

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२०॥

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२१॥

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२२॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२३॥

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२४॥

या देवी सर्वभूतेषु मातृरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२५॥

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२६॥

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या।
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ॥२७॥

चितिरूपेण या कृत्स्नमेतद् व्याप्य स्थिता जगत्।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२८॥

स्तुता सुरैः पूर्वमभीष्टसंश्रया-
त्तथा सुरेन्द्रेण दिनेषु सेविता।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥२९॥

या साम्प्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः ॥३०॥

# ४१. नारायणीसूक्तम्

ॐ ऋषिरुवाच।

देव्या हते तत्र महासुरेन्द्रे
सेन्द्राः सुरा वह्निपुरोगमास्ताम्।
कात्यायनीं तुष्टुवुरिष्टलाभाद्
विकाशिवक्त्राब्ज विकाशिताशाः ॥१॥

देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मातर्जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य ॥२॥

आधारभूता जगतस्त्वमेका
महीस्वरूपेण यतः स्थितासि।
अपां स्वरूपस्थितया त्वयैत-
दाप्यायते कृत्स्नमलङ्घ्यवीर्ये ॥३॥

त्वं वैष्णवी शक्तिरनन्तवीर्या
विश्वस्य बीजं परमासि माया।
सम्मोहितं देवि समस्तमेतत्
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥४॥

विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ताः सकला जगत्सु।
त्वयैकया पूरितमम्बयैतत्
का ते स्तुतिः स्तव्यपरा परोक्तिः ॥५॥

सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी।
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥६॥

सर्वस्य बुध्दिरूपेण जनस्य हृदि संस्थिते।
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥७॥

कलाकाष्ठादिरूपेण परिणामप्रदायिनि।
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥८॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥९॥

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥१०॥

शरणागतदीनार्तपरित्राणपरायणे।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥११॥

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि।
कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते ॥१२॥

त्रिशूलचन्द्राहिधरे महावृषभवाहिनि।
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ॥१३॥

मयूरकुक्कुटवृते महाशक्तिधरेऽनघे।
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥१४॥

शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे।
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥१५॥

गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे।
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥१६॥

नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे।
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥१७॥

किरीटिनि महावज्रे सहस्रनयनोज्ज्वले।
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ॥१८॥

शिवदूतीस्वरूपेण हतदैत्यमहाबले।
घोररूपे महारावे नारायणि नमोऽस्तु ते ॥१९॥

दंष्ट्राकरालवदने शिरोमालाविभूषणे।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥२०॥

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे।
महारात्रि महाऽविद्ये नारायणि नमोऽस्तु ते ॥२१॥

मेधे सरस्वति वरे भूति बाभ्रवि तामसि।
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ॥२२॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥२३॥

एतत्ते वदनं सौम्यं लोचनत्रयभूषितम्।
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ॥२४॥

ज्वालाकरालमत्युग्रमशेषासुरसूदनम्।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥२५॥

हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत्।
सा घण्टा पातु नो देवि पापेभ्योऽनः सुतानिव ॥२६॥

असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥२७॥

रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥२८॥

एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणाम् ।
रूपैरनेकैर्बहुधाऽऽत्ममूर्तिं कृत्वाम्बिके तत्प्रकरोति कान्या ॥२९॥

विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या।
ममत्वगर्तेऽतिमहान्धकारे विभ्रामयत्येतदतीव विश्वम् ॥३०॥

रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र।
दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम् ॥३१॥

विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम्।
विश्वेशवन्द्या भवती भवन्ति विश्वाश्रया ये त्वयि भक्तिनम्राः ॥३२॥

देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः।
पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ॥३३॥

प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥३४॥

देव्युवाच

वरदाहं सुरगणा वरं यन्मनसेच्छथ।
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥३५॥

देवा ऊचुः

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥३६॥

# ४२. देव्यपराधक्षमापनस्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥१॥

विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात् तव चरणयोर्या च्युतिरभूत् ।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥२॥

पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥३॥

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥४॥

परित्यक्ता देवा विविधविधसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥५॥

श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जनः को जानीते जननि जपनीयं जपविधौ ॥६॥

चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥७॥

न मोक्षस्याकाङ्क्षा भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥८॥

नाराधितासि विधिना विविधोपचारैः
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ॥९॥

आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवे शिवे
नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति ॥१०॥

जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि।
अपराधपरम्परावृतं न हि माता समुपेक्षते सुतम् ॥११॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि।
एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु ॥१२॥

*॥ इति श्रीशङ्कराचार्यविरचितं देव्यपराधक्षमापनस्तोत्रं सम्पूर्णम् ॥*

# ४३. श्रीराजराजेश्वर्यष्टकम्

अम्बा शाम्भवी चन्द्रमौलिरमलाऽपर्णा उमा पार्वती
काली हैमवती शिवा त्रिनयनी कात्यायनी भैरवी ।
सावित्री नवयौवना शुभकरी साम्राज्यलक्ष्मीप्रदा
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ १ ॥

अम्बा मोहिनी देवता त्रिभुवनी आनन्दसन्दायिनी
वाणी पल्लवपाणि वेणुमुरलीगानप्रिया लोलिनी ।
कल्याणी उडुराजबिम्बवदना धूम्राक्षसंहारिणी
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ २ ॥

अम्बा नूपुररत्नकङ्कणधरी केयूरहारावली
जाती चम्पक वैजयन्ति लहरी ग्रैवेयकै राजिता ।
वीणावेणुविनोदमण्डितकरा वीरासने संस्थिता
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ ३ ॥

अम्बा रौद्रिणी भद्रकाली बगला ज्वालामुखी वैष्णवी
ब्रह्माणी त्रिपुरान्तकी सुरनुता देदीप्यमानोज्ज्वला ।

चामुण्डा श्रितरक्षपोषजननी दाक्षायणी वल्लवी
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ ४ ॥

अम्बा शूलधनुःकशाङ्कुशधरी अर्धेन्दुबिम्बाधरी
वाराही मधुकैटभप्रशमनी वाणीरमासेविता ।
मल्लाद्यासुरमूकदैत्यमथनी माहेश्वरी चाम्बिका
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ ५ ॥

अम्बा सृष्टिविनाशपालनकरी आर्या विसंशोभिता
गायत्री प्रणवाक्षरामृतरसः पूर्णानुसन्धीकृता ।

ओङ्कारी विनतासुतार्चितपदा उद्दण्डदैत्यापहा
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ ६ ॥

अम्बा शाश्वत-आगमादिविनुता आर्या महादेवता
या ब्रह्मादिपिपीलिकान्तजननी या वै जगन्मोहिनी ।
या पञ्चप्रणवादिरेफजननी या चित्कलामालिनी
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ ७ ॥

अम्बापालितभक्तराजमनिशं अम्बाष्टकं यः पठेत्
अम्बालोलकटाक्षवीक्षललितं चैश्वर्यमव्याहतम् ।
अम्बा पावनमन्त्रराजपठनात् अन्ते च मोक्षप्रदा
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ ८ ॥

## ४४. श्रीवल्लीभुवनेश्वर्यष्टकम्

श्रीचित्रापुरवासिनीं वरभवानीशङ्करत्वप्रदाम्
ओतप्रोतशिवान्वितां गुरुमयीं गाम्भीर्यसन्तोषधाम् ।
हृद्गुह्याङ्कुरकल्पितं गुरुमतं स्रोतायते तां सुधां
श्रीवल्लीं भुवनेश्वरीं शिवमयीम् ऐश्वर्यदां तां भजे ॥ १ ॥

चिन्मुद्राङ्कितदक्षिणास्यनिहितां श्रीभाष्यकारश्रियं
तां हस्तामलकप्रबोधनकरीं क्षेत्रे स्थितां मातृकाम् ।
श्रीवल्ल्युद्भवपुष्पगन्धलहरीं सारस्वतत्रायिकां
श्रीवल्लीं भुवनेश्वरीं शिवमयीम् ऐश्वर्यदां तां भजे ॥ २ ॥

श्रीविद्योदितकौमुदीरसभरां कारुण्यरूपात्मिकां
मूर्तीभूय सदा स्थितां गुरुपरिज्ञानाश्रमाश्वासनाम् ।
सान्निध्याङ्गणशिष्यरक्षणकरीं वात्सल्यसारास्पदां
श्रीवल्लीं भुवनेश्वरीं शिवमयीम् ऐश्वर्यदां तां भजे ॥ ३ ॥

तन्वीं रक्तनवार्कवर्णसदृशीं खण्डेन्दुसम्मण्डितां
पीनोत्तुङ्गकुचद्वयीं कुटिकटीं त्र्यक्षां सदा सुस्मिताम् ।
पाशाऽभीतिवरैश्वराङ्कुशधरां श्रीपर्णपादां परां
श्रीवल्लीं भुवनेश्वरीं शिवमयीम् ऐश्वर्यदां तां भजे ॥४॥

श्रीमच्छङ्करसद्गुरुर्गणपतिर्वातात्मजः क्षेत्रपः
प्रासादे विलसन्ति भूरि सदये नित्यस्थिते ह्रींमयि ।
युष्मत् स्नेहकटाक्षसौम्यकिरणा रक्षन्ति दोग्ध्रीकुलं
श्रीवल्लीं भुवनेश्वरीं शिवमयीम् ऐश्वर्यदां तां भजे ॥ ५ ॥

गोप्त्रीं वत्ससुरक्षिणीं मठगृहे भक्तप्रजाकर्षिणीं
यात्रादिव्यकरीं विमर्शकलया तां साधके संस्थिताम् ।
प्रायश्चित्तजपादिकर्मकनितां ज्ञानेश्वरीमम्बिकां
श्रीवल्लीं भुवनेश्वरीं शिवमयीम् ऐश्वर्यदां तां भजे ॥ ६ ॥

श्रीसारस्वतगेयपेयजननीं ज्ञानादिविद्याप्रदां
लोके भक्तसुगुप्तितारणकरीं कार्पण्यदोषापहाम् ।
आर्यत्वप्रविकासलासनकरीं हृत्पद्मविद्युत्प्रभां
श्रीवल्लीं भुवनेश्वरीं शिवमयीम् ऐश्वर्यदां तां भजे ॥ ७ ॥

क्षुद्रा मे भुवनेश्वरि स्तुतिकथा किं वा मुखे ते स्मितं
याऽसि त्वं पदवर्णवाक्यजननी वर्णैः कथं वर्ण्यताम् ।
वासस्ते मम मानसे गुरुकृपे नित्यं भवेत् पावनि
नान्या मे भुवनेश्वरि प्रशमिका नान्या गतिर्ह्रींमयि ॥ ८ ॥

## ४५. श्रीसूक्तम्

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥१॥

ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥२॥

अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ॥३॥

कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥४॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि ॥५॥

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथबिल्वः ।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥६॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्कीर्तिं वृद्धिं ददातु मे ॥७॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥८॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥

मनसः काममाकूतिं वाचस्सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१०॥

कदर्मेन प्रजा भूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११॥

आपः स्रजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥१२॥

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥१३॥

आर्द्रां यः करिणीं यष्टीं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥१४॥

ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥१५॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
श्रियः पञ्चदशर्चं च श्रीकामस्सततं जपेत् ॥१६॥

पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षी ।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥१७॥

पद्मानने पद्मऊरू पद्माक्षि पद्मसम्भवे ।
तन्मे भजसि पद्माक्षी येन सौख्यं लभाम्यहम् ॥१८॥

अश्वदायी गोदायी धनदायी महाधने ।
धनं मे लभतां देवि सर्वकामांश्च देहि मे ॥१९॥

पुत्रपौत्रधनं धान्यं हस्त्यश्वादि गवेरथम् ।
प्रजानां भवसि माता आयुष्मन्तं करोतु मे ॥२०॥

धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्विना ॥२१॥

वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥२२॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥२३॥

सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥२४॥

विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ।
लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥२५॥

महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥२६॥

आनन्दकर्दमः श्रीतश्चिक्लीत इति विश्रुतः ।
ऋषयः श्रियः पुत्रांश्च श्रीर्देवी देवता ॥२७॥

चन्द्राभां श्रियमीशानां सूर्याभां श्रियमीश्वरीम् ।
चन्द्रसूर्याग्निसङ्काशां श्रियं लक्ष्मीमुपास्महे ॥२८॥

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छुभमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥२९॥

ऋणं रोगश्च दारिद्र्यं पापक्षुदपमृत्यवः ।
भयं शोकमनस्तापाः नश्यन्तु मम सर्वदा ॥ ३०॥

*॥ इति श्रीसूक्तम् ॥*

## ४६. सरस्वतीस्तुतिः

नमस्ते शारदे देवि काश्मीरपुरवासिनि ।
त्वामहं प्रार्थये नित्यं विद्यां बुद्धिं च देहि मे ॥१॥

या श्रद्धा धारणा मेधा वाग्देवी विधिवल्लभा ।
भक्तजिह्वाग्रसदना शमादिगुणदायिनी ॥२॥

नमामि यामिनीनाथलेखालङ्कृतकुन्तलाम् ।
भवानीं भवसन्तापनिर्वापणसुधानदीम् ॥३॥

भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः ।
वेदवेदाङ्गवेदान्तविद्यास्थानेभ्य एव च ॥४॥

ब्रह्मस्वरूपा परमा ज्योतिरूपा सनातनी ।
सर्वविद्याधिदेवी या तस्यै वाण्यै नमो नमः ॥५॥

यया विना जगत्सर्वं शश्वज्जीवन्मृतं भवेत् ।
ज्ञानाधिदेवी या तस्यै सरस्वत्यै नमो नमः ॥६॥

यया विना जगत्सर्वं मूकमुन्मत्तवत्सदा ।
या देवी वागधिष्ठात्री तस्यै वाण्यै नमो नमः ॥७॥

## ४७. श्रीमहिषासुरमर्दिनीस्तोत्रम्

अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दिनुते
गिरिवरविन्ध्यशिरोधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ।
भगवति हे शितिकण्ठकुटुम्बिनि भूरिकुटुम्बिनि भूरिकृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१॥

सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते
त्रिभुवनपोषिणि शङ्करतोषिणि किल्बिषमोषिणि घोषरते ।
दनुजनिरोषिणि दितिसुतरोषिणि दुर्मदशोषिणि सिन्धुसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२॥

अयि जगदम्ब मदम्ब कदम्बवनप्रियवासिनि हासरते
शिखरिशिरोमणि तुङ्गहिमालयशृङ्गनिजालय-मध्यगते ।
मधुमधुरे मधुकैटभभञ्जिनि कैटभभञ्जिनि रासरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥३॥

अयि शतखण्ड-विखण्डितरुण्ड-वितुण्डितशुण्ड-गजाधिपते
रिपुगजगण्ड-विदारणचण्ड-पराक्रमशुण्ड-मृगाधिपते ।
निजभुजदण्ड-निपातितचण्ड-निपातितमुण्ड-भटाधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥४॥

अयि रणदुर्मद-शत्रुवधोदित-दुर्धरनिर्जर-शक्तिभृते
चतुरविचार-धुरीणमहाशिव-दूतकृत-प्रमथाधिपते ।
दुरितदुरीह-दुराशयदुर्मति-दानवदूत-कृतान्तमते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥५॥

अयि शरणागतवैरिवधूवर-वीरवराभयदायकरे
त्रिभुवन-मस्तकशूल-विरोधि शिरोधि-कृतामल-शूलकरे ।
दुमिदुमितामर-दुन्दुभिनाद-मुहुर्मुखरीकृत-तिग्मकरे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥६॥

अयि निजहुङ्कृतिमात्र-निराकृत-धूम्रविलोचन-धूम्रशते
समरविशोषित-शोणितबीज-समुद्भवशोणित-बीजलते ।
शिव-शिव-शुम्भनिशुम्भमहाहव-तर्पित-भूतपिशाचरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥७॥

धनुरनुसङ्ग-रणक्षणसङ्ग-परिस्फुरदङ्ग-नटत्कटके
कनक-पिशङ्ग-पृषत्कनिषङ्गरसद्भटशृङ्ग-हतावटुके ।

कृतचतुरङ्ग-बलक्षितिरङ्ग-घटद्बहुरङ्ग-रटद्बटुके
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥८॥

जय-जय-जप्य-जयेजय-शब्दपरस्तुति-तत्पर-विश्वनुते
झण-झण-झिञ्झिमि-झिङ्कृत-नूपुर-सिञ्जितमोहित-भूतपते ।
नटितनटार्ध-नटीनटनायक-नाटितनाट्य-सुगानरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥९॥

अयि सुमनः सुमनः सुमनः सुमनः सुमनोहर-कान्तियुते
श्रितरजनी-रजनी-रजनी-रजनी-रजनीकर-वक्त्रवृते ।
सुनयनविभ्रमर-भ्रमर-भ्रमर-भ्रमर-भ्रमराधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१०॥

सहितमहाहव-मल्लमतल्लिक-मल्लितरल्लक-मल्लरते
विरचितवल्लिक-पल्लिकमल्लिक-झिल्लिकभिल्लिक-वर्गवृते ।
सितकृतपुल्ल-समुल्लसितारुण-तल्लजपल्लव-सल्ललिते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥११॥

अविरल-गण्ड-गलन्मदमेदुर-मत्त-मतङ्गज-राजपते
त्रिभुवन-भूषणभूत-कलानिधि रूपपयोनिधि राजसुते ।
अयि सुदतीजन-लालसमानस-मोहनमन्मथ-राजसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१२॥

कमलदलामल-कोमलकान्ति-कलाकलितामल-भाललते
सकलविलास-कलानिलयक्रम-केलिचलत्कलहंसकुले ।
अलिकुल-सङ्कुल-कुवलय-मण्डल-मौलिमिलद्बकुलालिकुले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१३॥

करमुरलीरववीजितकूजित-लज्जितकोकिल-मञ्जुमते
मिलितपुलिन्द-मनोहरगुञ्जित-रञ्जितशैल-निकुञ्जगते ।
निजगुणभूत-महाशबरीगण-सद्गुणसम्भृत-केलितले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१४॥

कटितट-पीत-दुकूलविचित्र-मयूखतिरस्कृत-चन्द्ररुचे
प्रणतसुरासुर-मौलिमणिस्फुरदंशुलसन्नख-चन्द्ररुचे ।
जितकनकाचल-मौलिपदोर्जित-निर्भरकुञ्जर-कुम्भकुचे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१५॥

विजित-सहस्रकरैक-सहस्रकरैक-सहस्रकरैकनुते
कृतसुरतारक-सङ्गरतारक-सङ्गरतारक-सूनुनुते ।
सुरथसमाधि-समानसमाधि-समाधिसमाधि-सुजातरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१६॥

पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं स शिवे
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत् ।
तव पदमेव परम्पदमित्यनुशीलयतो मम किं न शिवे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१७॥

कनकलसत्कल-सिन्धुजलैरनु-सिञ्चिनुतेगुण-रङ्गभुवं
भजति स किं न शचीकुचकुम्भ-तटीपरिरम्भ-सुखानुभवम् ।
तव चरणं शरणं करवाणि नतामरवाणि निवासि-शिवं
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१८॥

तव विमलेन्दुकुलं वदनेन्दुमलं सकलं ननु कूलयते
किमु पुरुहूत-पुरीन्दुमुखी-सुमुखीभिरसौ विमुखीक्रियते ।
मम तु मतं शिवनामधने भवति कृपया किमुत क्रियते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१९॥

अयि मयि दीनदयालुतया कृपयैव त्वया भवितव्यमुमे
अयि जगतो जननि कृपयासि यथासि तथाऽनुमितासिरते।
यदुचितमत्र भवत्युररीकुरुतादुरुतापमपाकुरुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२०॥

## ४८. ललितापञ्चकम्

प्रातः स्मरामि ललितावदनारविन्दं
बिम्बाधरं पृथुलमौक्तिकशोभिनासम् ।
आकर्णदीर्घनयनं मणिकुण्डलाढ्यं
मन्दस्मितं मृगमदोज्ज्वलफालदेशम् ॥१॥

प्रातर्भजामि ललिताभुजकल्पवल्लीं
रक्ताङ्गुलीयलसदङ्गुलिपल्लवाढ्याम् ।
माणिक्य-हेमवलयाङ्गदशोभमानां
पुण्ड्रेक्षुचाप-कुसुमेषु सृणीर्दधानाम् ॥२॥

प्रातर्नमामि ललिता चरणारविन्दं
भक्तेष्टदाननिरतं भवसिन्धुपोतम् ।
पद्मासनादिसुरनायकपूजनीयं
पद्माङ्कुशध्वजसुदर्शनलाञ्छनाढ्यम् ॥ ॥३॥

प्रातः स्तुवे परशिवां ललितां भवानीं
त्रय्यन्तवेद्यविभवां करुणानवद्याम् ।
विश्वस्य सृष्टिविलयस्थितिहेतुभूतां
विश्वेश्वरीं निगमवाङ्मनसातिदूराम् ॥४॥

प्रातर्वदामि ललिते तव पुण्यनाम
कामेश्वरीति कमलेति महेश्वरीति ।
श्रीशाम्भवीति जगतां जननी परेति
वाग्देवतेति वचसा त्रिपुरेश्वरीति ॥५॥

यः श्लोकपञ्चकमिदं ललिताम्बिकायाः
सौभाग्यदं सुललितं पठति प्रभाते ।
तस्मै ददाति ललिता झटिति प्रसन्ना
विद्यां श्रियं विमलसौख्यमनन्तकीर्तिम् ॥६॥

*॥ इति श्रीशङ्करभगवत्पादकृतं स्तोत्रं सम्पूर्णम् ॥*

# ४९. मीनाक्षीपञ्चरत्नम्

उद्यद्भानुसहस्रकोटिसदृशां केयूरहारोज्ज्वलां
बिम्बोष्ठीं स्मितदन्तपङ्क्तिरुचिरां पीताम्बरालङ्कृताम् ।
विष्णुब्रह्मसुरेन्द्र-सेवितपदां तत्त्वस्वरूपां शिवां
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारान्निधिम् ॥१॥

मुक्ताहारलसत्किरीटरुचिरां पूर्णेन्दुवक्त्रप्रभां
शिञ्जन्नूपुरकिङ्किणीमणिधरां पद्मप्रभाभासुराम् ।
सर्वाभीष्टफलप्रदां गिरिसुतां वाणीरमासेवितां
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारान्निधिम् ॥२॥

श्रीविद्यां शिववामभागनिलयां ह्रीङ्कारमन्त्रोज्ज्वलां
श्रीचक्राङ्कितबिन्दुमध्यवसतिं श्रीमत्सभानायिकाम् ।
श्रीमत्षण्मुखविघ्नराजजननीं श्रीमज्जगन्मोहिनीं
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारान्निधिम् ॥३॥

श्रीमत्सुन्दरनायिकां भयहरां ज्ञानप्रदां निर्मलां
श्यामाभां कमलासनार्चितपदां नारायणस्यानुजाम् ।
वीणावेणुमृदङ्गवाद्यरसिकां नानाविधामम्बिकां
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारान्निधिम् ॥४॥

नानायोगिमुनीन्द्रहृत्सुवसतिं नानार्थसिद्धिप्रदां
नानापुष्पविराजिताङ्घ्रियुगलां नारायणेनार्चिताम् ।
नादब्रह्ममयीं परात्परतरां नानार्थतत्त्वात्मिकां
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारान्निधिम् ॥५॥

# ५०. श्रीजगद्धात्रीस्तोत्रम्

आधाररूपे चाधेये धृतिरूपे धुरन्धरे ।
ध्रुवे ध्रुवपदे धीरे जगद्धात्रि नमोऽस्तु ते ॥१॥

शिवाकारे शक्तिरूपे शक्तिस्थे शक्तिविग्रहे ।
शाक्ताचारप्रिये देवि जगद्धात्रि नमोऽस्तु ते ॥२॥

जयदे जगदानन्दे जगदेकप्रपूजिते ।
जय सर्वगते दुर्गे जगद्धात्रि नमोऽस्तु ते ॥३॥

सूक्ष्मातिसूक्ष्मरूपे च प्राणापानादिरूपिणि ।
भावाभावस्वरूपे च जगद्धात्रि नमोऽस्तु ते ॥४॥

कालाधिरूपे कालेशे कालाकालविभेदिनि ।
सर्वस्वरूपे सर्वज्ञे जगद्धात्रि नमोऽस्तु ते ॥५॥

महाविघ्ने महोत्साहे महामाये वरप्रदे ।
प्रपञ्चसारे साध्वीशे जगद्धात्रि नमोऽस्तु ते ॥६॥

आगम्ये जगतामाद्ये माहेश्वरि वराङ्गने ।
अशेषरूपे रूपस्थे जगद्धात्रि नमोऽस्तु ते ॥७॥

तीर्थयज्ञतपोदानयोगसारे जगन्मयि ।
त्वमेव सर्वं सर्वस्थे जगद्धात्रि नमोऽस्तु ते ॥८॥

दयारूपे दयादृष्टे दयार्द्रे दुःखमोचनि ।
सर्वापत्तारिके दुर्गे जगद्धात्रि नमोऽस्तु ते ॥९॥

आगम्यधामधामस्थे महायोगीशहृत्पुरे ।
अमेयभावकूटस्थे जगद्धात्रि नमोऽस्तु ते ॥१०॥

# ५१. श्रीअन्नपूर्णास्तोत्रम्

नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी
निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥१॥

नानारत्नविचित्रभूषणकरी हेमाम्बराडम्बरी
मुक्ताहारविलम्बमान-विलसद्वक्षोजकुम्भान्तरी ।
काश्मीरागरुवासिता रुचिकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥२॥

योगानन्दकरी रिपुक्षयकरी धर्मार्थनिष्ठाकरी
चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी ।
सर्वैश्वर्यकरी तपःफलकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥३॥

कैलासाचलकन्दरालयकरी गौरी ह्युमा शाङ्करी
कौमारी निगमार्थगोचरकरी ह्योङ्कारबीजाक्षरी ।
मोक्षद्वारकवाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥४॥

दृश्यादृश्यविभूतिवाहनकरी ब्रह्माण्डभाण्डोदरी
लीलानाटकसूत्रखेलनकरी विज्ञानदीपाङ्कुरी ।
श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥५॥

उर्वी सर्वजनेश्वरी जयकरी माता कृपासागरी
वेणीनीलसमानकुन्तलधरी नित्यान्नदानेश्वरी ।
साक्षान्मोक्षकरी सदाशुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥६॥

आदिक्षान्तसमस्तवर्णनकरी शम्भोस्त्रिभावाकरी
काश्मीरी त्रिपुरेश्वरी त्रिनयनी विश्वेश्वरी शर्वरी ।
स्वर्गद्वारकवाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥७॥

देवी सर्वविचित्ररत्नरचिता दाक्षायणी सुन्दरी
वामस्वादुपयोधरी प्रियकरी सौभाग्यमाहेश्वरी ।
भक्ताभीष्टकरी सदा शुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥८॥

चन्द्रार्कानलकोटिकोटिसदृशी चन्द्रांशुबिम्बाधरी
चन्द्रार्काग्निसमानकुन्तलधरी चन्द्रार्कवर्णेश्वरी ।
मालापुस्तकपाशसाङ्कुशधरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥९॥

क्षत्रत्राणकरी महाभयहरी माता कृपासागरी
सर्वानन्दकरी सदा शिवकरी विश्वेश्वरी श्रीधरी ।
दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥१०॥

अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ॥११॥

माता च पार्वती देवी पिता देवो महेश्वरः ।
बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥ ॥१२॥

# ५२. भवान्यष्टकम्

न तातो न माता न बन्धुर्न दाता
न पुत्रो न पुत्री न भृत्यो न भर्ता ।
न जाया न विद्या न वृत्तिर्ममैव
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥१॥

भवाब्धावपारे महादुःखभीरुः
प्रपातः प्रकामी प्रलोभी प्रमत्तः ।
कुसंसारपाशप्रबद्धः सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥२॥

प्रजेशं रमेशं महेशं सुरेशं
दिनेशं निशीथेश्वरं वा कदाचित् ।
न जानामि चान्यत् सदाहं शरण्ये
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥३॥

कुकर्मी कुसङ्गी कुबुद्धिः कुदासः
कुलाचारहीनः कदाचारलीनः ।
कुदृष्टिः कुवाक्यप्रबन्धः सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥४॥

न जानामि दानं न च ध्यानयोगं
न जानामि तन्त्रं न च स्तोत्रमन्त्रम् ।
न जानामि पूजां न संन्यासयोगं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥५॥

न जानामि पुण्यं न जानामि तीर्थं
न जानामि मुक्तिं लयं वा कदाचित् ।
न जानामि भक्तिं व्रतं वापि मातः
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥६॥

विवादे विषादे प्रमादे प्रवासे
जले चानले पर्वते शत्रुमध्ये ।
अरण्ये शरण्ये सदा मां प्रपाहि
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥७॥

अनाथो दरिद्रो जरारोगयुक्तो
महाखिन्नदीनः सदा जाड्यवक्त्रः ।
विपत्तौ प्रविष्टः प्रनष्टः सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥८॥

## ५३. महालक्ष्म्यष्टकम्

इन्द्र उवाच

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥१॥

नमस्ते गरुडारूढे कोलासुरभयङ्करि ।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥२॥

सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि ।
सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते ॥३॥

सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि ।
मन्त्रमूर्ते सदा देवि महालक्ष्मि नमोऽस्तु ते ॥४॥

आद्यन्तरहिते देवि आदिशक्ति महेश्वरि ।
योगजे योगसम्भूते महालक्ष्मि नमोऽस्तु ते ॥५॥

स्थूलसूक्ष्ममहारौद्रे महाशक्ति महोदरे ।
महापापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥६॥

पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ।
परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥७॥

श्वेताम्बरधरे देवि नानालङ्कारभूषिते ।
जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥८॥

महालक्ष्म्यष्टकं स्तोत्रं यः पठेद्भक्तिमान्नरः ।
सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥९॥

एककाले पठेन्नित्यं महापापविनाशनम् ।
द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः ॥१०॥

त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम् ।
महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥११॥

## ५४. सप्तश्लोकीदुर्गास्तोत्रम्

ॐ अस्य श्रीसप्तश्लोकीदुर्गास्तोत्रमन्त्रस्य नारायण ऋषिः, अनुष्टुप्छन्दः, श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः, श्रीदुर्गाप्रीत्यर्थं सप्तश्लोकीदुर्गापाठे विनियोगः ।

ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥१॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता ॥२॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥३॥

शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥४॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यः त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥५॥

रोगानशेषान् अपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥६॥

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्यम् अस्मद्वैरिविनाशनम् ॥७॥

## ५५. दुर्गा–आपदुद्धाराष्टकम्

नमस्ते शरण्ये शिवे सानुकम्पे नमस्ते जगद्व्यापिके विश्वरूपे ।
नमस्ते जगद्वन्द्यपादारविन्दे नमस्ते जगत्तारिणि त्राहि दुर्गे ॥१॥

नमस्ते जगच्चिन्त्यमानस्वरूपे नमस्ते महायोगिविज्ञानरूपे ।
नमस्ते नमस्ते सदानन्दरूपे नमस्ते जगत्तारिणि त्राहि दुर्गे ॥२॥

अनाथस्य दीनस्य तृष्णातुरस्य भयार्तस्य भीतस्य बद्धस्य जन्तोः ।
त्वमेका गतिर्देवि निस्तारकर्त्री नमस्ते जगत्तारिणि त्राहि दुर्गे ॥३॥

अरण्ये रणे दारुणे शत्रुमध्ये जले सङ्कटे राजगेहे प्रवासे ।
त्वमेका गतिर्देवि निस्तारहेतुर्नमस्ते जगत्तारिणि त्राहि दुर्गे ॥४॥

अपारे महादुस्तरेऽत्यन्तघोरे विपत्सागरे मज्जतां देहभाजाम् ।
त्वमेका गतिर्देवि निस्तारनौका नमस्ते जगत्तारिणि त्राहि दुर्गे॥५॥

नमश्चण्डिके चण्डदोर्दण्डलीलासमुत्खण्डिता खण्डलाशेषशत्रोः ।
त्वमेका गतिर्विघ्नसन्दोहहर्त्री नमस्ते जगत्तारिणि त्राहि दुर्गे ॥६॥

त्वमेका सदाराधिता सत्यवादिन्यनेकाखिला क्रोधना क्रोधनिष्ठा ।
इडापिङ्गला त्वं सुषुम्ना च नाडी नमस्ते जगत्तारिणि त्राहि दुर्गे॥७॥

नमो देवि दुर्गे शिवे भीमनादे सदासर्वसिद्धिप्रदात्रीस्वरूपे ।
विभूतिः सतां कालरात्रिस्वरूपे नमस्ते जगत्तारिणि त्राहि दुर्गे ॥८॥

विधिमुखविबुधानां सिद्धविद्याधराणां
मुनिमनुजपशूनां वासनात्रासितानाम् ।
नरकगतियुतानां मोक्षमार्गस्थितानां
शरणमसि त्वमेका देवि दुर्गे प्रसीद ॥

*॥ इति सिद्धेश्वरतन्त्रे आपदुद्धाराष्टकं स्तोत्रं सम्पूर्णम् ॥*

## ५६. सरस्वतीस्तोत्रम्

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रान्विता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभिः देवैस्सदा पूजिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥

सा मे वसतु जिह्वायां वीणापुस्तकधारिणी ।
मुरारिवल्लभा देवी सर्वशुक्ला सरस्वती ॥

सरस्वति महाभागे विद्ये कमललोचने ।
विश्वरूपे विशालाक्षि विद्यां देहि नमोऽस्तु ते ॥

श्वेतपद्मासना देवी श्वेतपुष्पोपशोभिता ।
श्वेताम्बरधरा नित्या श्वेतगन्धानुलेपना ॥

श्वेताक्षसूत्रहस्ता च श्वेतचन्दनचर्चिता ।
श्वेतवीणाधरा शुभ्रा श्वेतालङ्कारभूषिता ॥

वन्दिता सिद्धगन्धर्वैरर्चिता सुरदानवैः ।
पूजिता मुनिभिः सर्वैर्ऋषिभिः स्तूयते सदा ॥

स्तोत्रेणानेन तां देवीं जगद्धात्रीं सरस्वतीम् ।
ये स्मरन्ति त्रिसन्ध्यायां सर्वां विद्यां लभन्ति ते ॥

# ५७. त्रिपुरसुन्दरीस्तोत्रम्

कदम्बवनचारिणीं मुनिकदम्बकादम्बिनीं
नितम्बजितभूधरां सुरनितम्बिनीसेविताम् ।
नवाम्बुरुहलोचनामभिनवाम्बुदश्यामलां
त्रिलोचनकुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये ॥१॥

कदम्बवनवासिनीं कनकवल्लरीधारिणीं
महार्हमणिहारिणीं मुखसमुल्लसद्वारुणीम् ।
दयाविभवकारिणीं विशदलोचनीं चारिणीं
त्रिलोचनकुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये ॥२॥

कदम्बवनशालया कुचभरोल्लसन्मालया
कुचोपमितशैलया गुरुकृपालसद्वेलया ।
मदारुणकपोलया मधुरगीतवाचालया
कयापि घननीलया कवचिता वयं लीलया ॥३॥

कदम्बवनमध्यगां कनकमण्डलोपस्थितां
षडम्बुरुहवासिनीं सततसिद्धसौदामिनीम् ।
विडम्बितजपारुचिं विकचचन्द्रचूडामणिं
त्रिलोचनकुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये ॥४॥

कुचाञ्चितविपञ्चिकां कुटिलकुन्तलालङ्कृतां
कुशेशयनिवासिनीं कुटिलचित्तविद्वेषिणीम् ।
मदारुणविलोचनां मनसिजारिसम्मोहिनीं
मतङ्गमुनिकन्यकां मधुरभाषिणीमाश्रये ॥५॥

स्मरेत्प्रथमपुष्पिणीं रुधिरबिन्दुनीलाम्बरां
गृहीतमधुपात्रिकां मधुविघूर्णनेत्राञ्चलाम् ।
घनस्तनभरोन्नतां गलितचूलिकां श्यामलां
त्रिलोचनकुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये ॥६॥

सकुङ्कुमविलेपनामलिकचुम्बिकस्तूरिकां
समन्दहसितेक्षणां सशरचापपाशाङ्कुशाम् ।
अशेषजनमोहिनीमरुणमाल्यभूषाम्बरां
जपाकुसुमभासुरां जपविधौ स्मरेदम्बिकाम् ॥७॥

पुरन्दरपुरन्ध्रिकाचिकुरबन्धसैरन्ध्रिकां
पितामहपतिव्रतां पटुपटीरचर्चारताम् ।
मुकुन्दरमणीं मणीं लसदलङ्क्रियाकारिणीं
भजामि भुवनाम्बिकां सुरवधूटिकाचेटिकाम् ॥८॥

*॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं त्रिपुरसुन्दरीस्तोत्रं सम्पूर्णम् ॥*

## ५८. गौरीदशकं स्तोत्रम्

लीलालब्धस्थापितलुप्ताखिललोकां
लोकातीतैर्योगिभिरन्तश्चिरमृग्याम् ।
बालादित्यश्रेणिसमानद्युतिपुञ्जां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥१॥

आशापाशक्लेशविनाशं विदधानां
पादाम्भोजध्यानपराणां पुरुषाणाम् ।
ईशामीशार्धाङ्गहरां तामभिरामां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥२॥

नानाकारैः शक्तिकदम्बैर्भुवनानि
व्याप्य स्वैरं क्रीडति येयं स्वयमेका ।
कल्याणीं तां कल्पलतामानतिभाजां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥३॥

मूलाधारादुत्थितवीथ्या विधिरन्ध्रं
सौरश्चान्द्रं व्याप्य विहारोज्ज्वलिताङ्गीम् ।
येयं सूक्ष्मात्सूक्ष्मतनुस्तां सुखरूपां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥४॥

यस्यामोतं प्रोतमशेषं मणिमाला-
सूत्रे यद्वत् क्वापि चरश्चाप्यचरश्च ।
तामध्यात्मज्ञानपदव्या गमनीयां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥५॥

प्रत्याहारध्यानसमाधिस्थितिभाजां
नित्यं चित्ते निर्वृतिकाष्ठां कलयन्तीम् ।

सत्यज्ञानानन्दमयीं तां तनुमध्यां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥६॥

चन्द्रापीडानन्दितमन्दस्मितवक्त्रां
चन्द्रापीडालङ्कृतनीलालकभाराम् ।
इन्द्रोपेन्द्राद्यर्चितपादाम्बुजयुग्मां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥७॥

आदिक्षान्तामक्षरमूर्त्या विलसन्तीं
भूते भूते भूतकदम्बप्रसवित्रीम् ।
शब्दब्रह्मानन्दमयीं तां तडिदाभां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥८॥

यस्याः कुक्षौ लीनमखण्डं जगदण्डं
भूयो भूयः प्रादुरभूदुत्थितमेव ।
पत्या सार्धं राजतशैले विहरन्तीं
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥९॥

नित्यः शुद्धो निष्कल एको जगदीशः
साक्षी यस्याः सर्गविधौ संहरणे च ।
विश्वत्राणक्रीडनलोलां शिवपत्नीं
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥१०॥

प्रातःकाले भावविशुद्धिं विदधानो
भक्त्या नित्यं जल्पति गौरीदशकं यः ।
वाचां सिद्धिं सम्पदमुच्चैः शिवभक्तिं
तस्यावश्यं पर्वतपुत्री विदधाति ॥११॥

## ५९. भवानीभुजङ्गप्रयातस्तोत्रम्

षडाधारपङ्केरुहान्तर्विराजत्सुषुम्नान्तरालेऽतितेजोल्लसन्तीम् ।
सुधामण्डलं द्रावयन्तीं पिबन्तीं सुधामूर्तिमीडेऽहमानन्दरूपाम् ॥१॥

ज्वलत्कोटिबालार्कभासारुणाङ्गीं सुलावण्यशृङ्गारशोभाभिरामाम् ।
महापद्मकिञ्जल्कमध्ये विराजत्त्रिकोणोल्लसन्तीं भजे श्रीभवानीम्॥२॥

क्वणत्किङ्किणीनूपुरोद्भासिरत्नप्रभालीढलाक्षार्द्रपादारविन्दाम् ।
अजेशाच्युताद्यैः सुरैः सेव्यमानां महादेवि मन्मूर्ध्नि ते भावयामि॥३॥

सुशोणाम्बराबद्धनीवीविराजन्महारत्नकाञ्चीकलापं नितम्बम् ।
स्फुरद्दक्षिणावर्तनाभिं च तिस्रो वली रम्य ते रोमराजीं भजेऽहम्॥४॥

लसद्वृत्तमुत्तुङ्गमाणिक्यकुम्भोपमश्रीस्तनद्वन्द्वमम्बाम्बुजाक्षीम् ।
भजे पूर्णदुग्धाभिरामं तवेदं महाहारदीप्तं सदा प्रस्नुतास्यम् ॥५॥

शिरीषप्रसूनोल्लसद्बाहुदण्डैर्ज्वलद्बाणकोदण्डपाशाङ्कुशैश्च ।
चलत्कङ्कणोदारकेयूरभूषोज्ज्वलद्भिः स्फुरन्तीं भजे श्रीभवानीम्॥६॥

शरत्पूर्णचन्द्रप्रभापूर्णबिम्बाधरस्मेरवक्त्रारविन्दं श्रियं ते।
सुरत्नावलीहारताटङ्कशोभां भजे सुप्रसन्नामहं श्रीभवानीम् ॥७॥

सुनासापुटं पद्मपत्रायताक्षं यजन्तः श्रियं दानदक्षं कटाक्षम् ।
ललाटोल्लसद्गन्धकस्तूरिभूषोज्ज्वलद्भिः स्फुरन्तीं भजे श्रीभवानीम्॥८॥

चलत्कुन्तलं ते भ्रमद्भृङ्गवृन्दां घनस्निग्धधम्मिल्लभूषोज्ज्वलन्तीम् ।
स्फुरन्मौलिमाणिक्यमध्येन्दुरेखाविलासोल्लसद्दिव्यमूर्धानमीडे ॥९॥

स्फुरत्वम्ब बिम्बस्य ते हृत्सरोजे सदा वाङ्मयं सर्वतेजोमयं च ।
इति श्रीभवानीस्वरूपं तदेवं प्रपञ्चात्परं चातिसूक्ष्मं प्रसन्नम् ॥१०॥

गणेशाणिमाद्याखिलैः शक्तिवृन्दैः स्फुरच्छ्रीमहाचक्रराजोल्लसन्तीम् ।
परां राजराजेश्वरीं त्वां भवानीं शिवाङ्कोपरिस्थां शिवां भावयेऽहम् ॥११॥

त्वमर्कस्त्वमग्निस्त्वमिन्दुस्त्वमापस्त्वमाकाशभूवायवस्त्वं चिदात्मा ।
त्वदन्यो न कश्चित्प्रकाशोऽस्ति सर्वं सदानन्दसंवित्स्वरूपं तवेदम् ॥१२॥

गुरुस्त्वं शिवस्त्वं च शक्तिस्त्वमेव त्वमेवासि माता पिताऽसि त्वमेव।
त्वमेवासि विद्या त्वमेवासि बुद्धिर्गतिर्मे मतिर्देवि सर्वं त्वमेव॥१३॥

श्रुतीनामगम्यं सुवेदागमाद्यैर्महिम्नो न जानाति पारं तवेदम् ।
स्तुतिं कर्तुमिच्छामि ते त्वं भवानि क्षमस्वेदमम्ब प्रमुग्धः किलाहम्
॥१४॥

शरण्ये वरेण्ये सुकारुण्यपूर्णे हिरण्योदराद्यैरगम्येऽतिपुण्ये ।
भवारण्यभीतं च मां पाहि भद्रे नमस्ते नमस्ते नमस्ते भवानि॥१५॥

इमामन्वहं श्रीभवानीभुजङ्गस्तुतिं यः पठेच्छ्रोतुमिच्छेत् तस्मै ।
स्वकीयं पदं शाश्वतं चैव सारं श्रियं चाष्टसिद्धीश्च देवी ददाति॥१६॥

## ६०. अर्बुदाभगवतीस्तोत्रम्

श्यामां दिनाद्ययजनेऽरुणपद्मरागां
देवीं प्रदोषसमये च हिरण्यवर्णाम् ।
संवित्प्रभां सकलमूर्तिषु निर्विकल्पां
तामर्बुदां भगवतीं प्रणतोऽस्मि भक्त्या ॥१॥

सौम्यां सदा हृदि सतां ललितस्वरूपां
क्रूरां च दुष्टमनसां धृतघोररूपाम् ।
शूलासिपात्रफणिपाशकरां पराम्बां
तामर्बुदां भगवतीं प्रणतोऽस्मि भक्त्या ॥२॥

ब्रह्मादिपञ्चसमलङ्कृतमञ्चमध्यां
ज्ञानक्रियाबलवतीं जनिताण्डकोटिम् ।
कैवल्यधामफलधारणकल्पवल्लीं
तामर्बुदां भगवतीं प्रणतोऽस्मि भक्त्या ॥३॥

सिद्धां वशिष्ठभृगुगौतमसिद्धिदात्रीं
नित्याचलेश्वरनिरीक्षणचञ्चलाक्षीम् ।
सिंहाधिरूढसुमुखीं शशिखण्डमौलिं
तामर्बुदां भगवतीं प्रणतोऽस्मि भक्त्या ॥४॥

वात्सल्यसारपरिपूर्णविशालनेत्रां
योगीशसेवितकुलामृतवृष्टिरूपाम् ।
षट्पद्मकाननचरां प्रणवद्विरेफां
तामर्बुदां भगवतीं प्रणतोऽस्मि भक्त्या ॥५॥

श्रीमद् यतीन्द्रपरिभावितब्रह्मरूपां
गुह्योपदेशकुशलां गिरिगर्भविष्टाम् ।
श्रुत्यन्तगीतविभवां विरतिप्रहृष्टां
तामर्बुदां भगवतीं प्रणतोऽस्मि भक्त्या ॥६॥

अर्बुदाम्बापदाम्भोजं यः स्मरेन्नियमान्वितः ।
अनेन श्लोकषट्केन भवेद्देवीप्रसादभाग्॥

# ६१. देवीनवरत्नमालास्तोत्रम्

ओंकारपञ्जरशुकीम् उपनिषदुद्यानकेलिकलकण्ठीम् ।
आगमविपिनमयूरीम् आर्याम् अन्तर्विभावये गौरीम् ॥१॥

दयमानदीर्घनयनां देशिकरूपेण दर्शिताभ्युदयाम् ।
वामकुचनिहितवीणां वरदां सङ्गीतमातृकां वन्दे ॥२॥

श्यामतनुसौकुमार्यां सौन्दर्यानन्दसम्पदुन्मेषाम् ।
तरुणीं करुणापूरां मदजलकल्लोललोचनां वन्दे ॥३॥

नखमुखमुखरितवीणानादरसास्वादनवनवोल्लासम् ।
मुखमम्ब मोदयतु मां मुक्ताताटङ्कमुग्धहसितं ते ॥४॥

सरिगमपधनिरतां तां वीणासङ्क्रान्तकान्तहस्तां ताम् ।
शान्तां मृदुलस्वान्तां गुरुवरभूतां नमामि शिवकान्ताम् ॥५॥


अवटुतटघटितचूलीताडिततालीपलाशताटङ्काम् ।
वीणावादनवेलाकम्पितशिरसं नमामि मातङ्गीम् ॥६॥

वीणारवानुषङ्गं विकचमदामोदमाधुरीभङ्गम् ।
करुणापूरतरङ्गं कलये मातङ्गकन्यकापाङ्गम् ॥७॥

मणिभङ्गमेचकाङ्गीं मातङ्गीं नौमि सिद्धमातङ्गीम् ।
यौवनवनसारङ्गीं सङ्गीताम्भोरुहानुभवभृङ्गीम् ॥८॥

मेचकमासेचनकं मिथ्यादृष्टान्तमध्यभागं ते ।
मातः स्वरूपमनिशं मङ्गलसङ्गीतसौरभं वन्दे ॥९॥

नवरत्नमाल्यमेतद् रचितं मातङ्गकन्यकाभरणम् ।
यः पठति भक्तियुक्तः सः भवेत् वागीश्वरः साक्षात् ॥



आदि-शङ्कराचार्यः

# ४. गुरुस्तोत्राणि

दक्षिणामूर्तये तुभ्यं वटमूलनिवासिने ।
ध्यानैकनिरताङ्गाय, नमो रुद्राय शम्भवे ॥

## ६२. श्रीशङ्करभगवत्पादस्तुतिः

अष्टवर्षे चतुर्वेदी द्वादशेऽखिलशास्त्रवित् ।
सर्वलोकख्यातशीलः प्रस्थानत्रयभाष्यकृत् ॥ १ ॥

पद्मपादादिसच्छिष्यः पाखण्डध्वान्तभास्करः ।
अद्वैतस्थापनाचार्यः द्वैतमत्तेभकेसरी ॥ २ ॥

व्यासनन्दितसिद्धान्तः वादनिर्जितमण्डनः ।
षण्मतस्थापनाचार्यः षड्गुणैश्वर्यमण्डितः ॥ ३ ॥

सर्वलोकानुग्रहकृत् सर्वज्ञत्वादिभूषणः ।
श्रुतिस्मृतिपुराणज्ञः श्रुत्येकशरणप्रियः ॥ ४ ॥

सकृत्स्मरणसन्तुष्टः शरणागतवत्सलः ।
निर्व्याजकरुणामूर्तिः निरहम्भावगोचरः ॥ ५ ॥

संशान्तभक्तहृत्तापः सामरस्यफलप्रदः ।
संन्यासकुलपद्मार्कः संविन्मयकलेवरः ॥ ६ ॥

साक्षाच्छ्रीदक्षिणामूर्तिः शङ्कराख्यो जगद्गुरुः ।
सन्तनोतु दृढां निष्ठाम् अद्वैताध्वनि नः सदा ॥ ७ ॥

## ६३. श्रीगुरुपरम्परास्तोत्रम्

शिवं हरिं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥

श्रीशङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम् ।
तं तोटकं वार्तिककारमन्यानस्मद्गुरून् सन्ततमानतोऽस्मि ॥

दृग्दृश्यज्ञानशून्याय स्वप्रकाशस्वरूपिणे ।
चिन्मयानन्दरूपाय अच्युताश्रम ते नमः ॥

तस्य पादाम्बुजे लीन आनन्दाश्रमयोगिराट् ।
तमहं सन्ततं वन्दे सच्चित्सुखमयं विभुम् ॥

आनन्दाश्रमयोगीन्द्रपादपङ्कजषट्पदः ।
कैवल्याश्रमविख्यातस्तत्त्वज्ञाननिरूपकः ॥

रक्तशुक्लपदद्वन्द्वं स्मृत्वा च गुरुपादुकाम् ।
ध्यानाद्ब्रह्ममयो जातो नृसिंहाश्रमदेशिकः ॥

तत्पादाम्बुजभक्तिस्थः केशवाश्रम-संज्ञकः ।
तद्धस्तपद्मसञ्जातः सर्वागमविशारदः ॥

वामनाश्रम इत्याख्यस्तदनन्तरतां गतः ।
करकञ्जात्तस्य जातः कृष्णाश्रम इतीरितः ॥

पाण्डुरङ्गाश्रमाह्वोऽभूत्तस्मात्कृष्णकराम्बुजात् ।
परिज्ञानाश्रमगुरुं प्रणतोऽस्मि निरन्तरम् ॥

त्वमेव सद्गुरुवरस्त्वमेव परमेश्वरः ।
त्वमेव सच्चिदानन्दस्त्वां विना नान्यथा गतिः ॥

इत्थं यः पठते नित्यं गुरोर्नामावलिं पराम् ।
सायं प्रातर्मुहुर्भक्त्या स मुक्तो नात्र संशयः ॥

*॥ इति श्रीगुरुपरम्परास्तोत्रम् ॥*

*॥ ॐ तत्सत् ॥*

## ६४. गुरुपादुकास्तोत्रम्

अनन्तसंसारसमुद्रतारनौकायिताभ्यां गुरुभक्तिदाभ्याम् ।
वैराग्यसाम्राज्यदपूजनाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥१॥

कवित्ववाराशिनिशाकराभ्यां दौर्भाग्यदावाम्बुदमालिकाभ्याम् ।
दूरीकृतानम्रविपत्ततिभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥२॥

नता ययोः श्रीपतितां समीयुः कदाचिदप्याशु दरिद्रवर्याः ।
मूकाश्च वाचस्पतितां हि ताभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥३॥

नालीकनीकाशपदाहृताभ्यां नानाविमोहादिनिवारिकाभ्याम् ।
नमज्जनाभीष्टततिप्रदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥४॥

नृपालिमौलिव्रजरत्नकान्तिसरिद्विराजज्झषकन्यकाभ्याम् ।
नृपत्वदाभ्यां नतलोकपङ्क्तेः नमो नमः श्रीगुरुपादुकाभ्याम् ॥५॥

पापान्धकारार्कपरम्पराभ्यां तापत्रयाहीन्द्रखगेश्वराभ्याम् ।
जाड्याब्धिसंशोषणवाडवाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥६॥

शमादिषट्कप्रदवैभवाभ्यां समाधिदानव्रतदीक्षिताभ्याम् ।
रमाधवाङ्घ्रिस्थिरभक्तिदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥७॥

स्वार्चापराणामखिलेष्टदाभ्यां स्वाहासहायाक्षधुरन्धराभ्याम् ।
स्वान्ताच्छभावप्रदपूजनाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥८॥

कामादिसर्पव्रजगारुडाभ्यां विवेकवैराग्यनिधिप्रदाभ्याम् ।
बोधप्रदाभ्यां द्रुतमोक्षदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥९॥

## ६५. गुरुस्तोत्रम्

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

दक्षिणास्यसमारम्भां शङ्कराचार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥
शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥

श्रुतिस्मृतिपुराणानाम् आलयं करुणालयम् ।
नमामि भगवत्पादं शङ्करं लोकशङ्करम् ॥

# ६६. श्रीगुरुस्तोत्रम्

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥१॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥२॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥३॥

स्थावरं जङ्गमं व्याप्तं यत्किञ्चित् सचराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥४॥

चिन्मयं व्यापि यत्सर्वं त्रैलोक्यं सचराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥५॥

सर्वश्रुतिशिरोरत्नविराजितपदाम्बुजः ।
वेदान्ताम्बुजसूर्यो यस्तस्मै श्रीगुरवे नमः ॥६॥

चैतन्यः शाश्वतः शान्तो व्योमातीतो निरञ्जनः ।
बिन्दुनादकलातीतस्तस्मै श्रीगुरवे नमः ॥७॥

ज्ञानशक्तिसमारूढः तत्त्वमालाविभूषितः ।
भुक्तिमुक्तिप्रदाता च तस्मै श्रीगुरवे नमः ॥८॥

अनेकजन्मसम्प्राप्तकर्मबन्धविदाहिने ।
आत्मज्ञानप्रदानेन तस्मै श्रीगुरवे नमः ॥९॥

शोषणं भवसिन्धोश्च ज्ञापनं सारसम्पदः ।
गुरोः पादोदकं सम्यक् तस्मै श्रीगुरवे नमः ॥१०॥

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः ।
तत्त्वज्ञानात्परं नास्ति तस्मै श्रीगुरवे नमः ॥११॥

मन्नाथः श्रीजगन्नाथो मद्गुरुः श्रीजगद्गुरुः।
मदात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ॥१२॥

गुरुरादिरनादिश्च गुरुः परमदैवतम् ।
गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः ॥१३॥

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देवदेव ॥१४॥

## ६७. तोटकाष्टकम्

विदिताखिलशास्त्रसुधाजलधे महितोपनिषत्कथितार्थनिधे ।
हृदये कलये विमलं चरणं भव शङ्कर देशिक मे शरणम् ॥१॥

करुणावरुणालय पालय मां भवसागरदुःखविदूनहृदम् ।
रचयाखिलदर्शनतत्त्वमिदं भव शङ्कर देशिक मे शरणम् ॥२॥

भवता जनता सुहिता भविता निजबोधविचारण चारुमते ।
कलयेश्वरजीवविवेकविदं भव शङ्कर देशिक मे शरणम् ॥३॥

भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता ।
मम वारय मोहमहाजलधिं भव शङ्कर देशिक मे शरणम् ॥४॥

सुकृतेऽधिकृते बहुधा भवतो भविता समदर्शनलालसता ।
अतिदीनमिमं परिपालय मां भव शङ्कर देशिक मे शरणम् ॥५॥

जगतीमवितुं कलिताकृतयो विचरन्ति महामहसच्छलतः ।
अहिमांशुरिवात्र विभासि गुरो भव शङ्कर देशिक मे शरणम् ॥६॥

गुरुपुङ्गव पुङ्गवकेतन ते समतामयतां न हि कोऽपि सुधीः ।
शरणागतवत्सल तत्त्वनिधे भव शङ्कर देशिक मे शरणम् ॥७॥

विदिता न मया विशदैककला न च किञ्चन काञ्चनमस्ति गुरो ।
द्रुतमेव विधेहि कृपां सहजां भव शङ्कर देशिक मे शरणम् ॥८॥

## ६८. दक्षिणामूर्तिस्तोत्रम्

ध्यानम्

ॐ मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठान्ते वसदृषिगणैरावृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दरूपं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे॥१॥

वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥२॥

चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥३॥

निधये सर्वविद्यानां भिषजे भवरोगिणाम् ।
गुरवे सर्वलोकानां दक्षिणामूर्तये नमः ॥४॥

ॐ नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः ॥५॥

चिद्घनाय महेशाय वटमूलनिवासिने ।
सच्चिदानन्दरूपाय दक्षिणामूर्तये नमः ॥६॥

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥७॥

## ६९. श्रीदक्षिणामूर्तिस्तोत्रम्

ॐ विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥१॥

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ् निर्विकल्पं पुनः
मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।
मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥२॥

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोर्निधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥३॥

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत्समस्तञ्जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥४॥

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः ।

मायाशक्तिविलासकल्पित-महाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥५॥

राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥६॥

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यन्तः स्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥७॥

विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥८॥

भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभोः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥९॥

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिद्ध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥१०॥

## ७०. श्रीवेदव्यासाष्टकम्

कलिमलास्तविवेकदिवाकरं समवलोक्य तमोवलितं जनम् ।
करुणया भुवि दर्शितविग्रहं मुनिवरं गुरुव्यासमहं भजे ॥१॥

भरतवंशसमुद्धरणेच्छया स्वजननीवचसा परिनोदितः ।
अजनयत्तनयत्रितयं प्रभुः शुकनुतं गुरुव्यासमहं भजे ॥२॥

मतिबलादि निरीक्ष्य कलौ नृणां लघुतरं कृपया निगमाम्बुधेः ।
समकरोदिह भागमनेकधा श्रुतिपतिं गुरुव्यासमहं भजे ॥३॥

सकलधर्मनिरूपणसागरं विविधचित्रकथासमलङ्कृतम् ।
व्यरचयच्च पुराणकदम्बकं कविवरं गुरुव्यासमहं भजे ॥४॥

श्रुतिविरोधसमन्वयदर्पणं निखिलवादिमतान्ध्यविदारणम् ।
ग्रथितवानपि सूत्रसमूहकं मुनिसुतं गुरुव्यासमहं भजे ॥५॥

यदनुभाववशेन दिवं गतः समधिगम्य महास्त्रसमुच्चयम् ।
कुरुचमूमजयद्विजयो द्रुतं द्युतिधरं गुरुव्यासमहं भजे ॥६॥

समरवृत्तविबोधसमीहया कुरुवरेण मुदा कृतयाचनः ।
सपदि सूतमदादमलेक्षणं कलिहरं गुरुव्यासमहं भजे ॥७॥

वननिवासपरौ कुरुदम्पतिः सुतशुचा तपसा च विकर्षितौ ।
मृततनूजगणं समदर्शयन् शरणदं गुरुव्यासमहं भजे ॥८॥

व्यासाष्टकमिदं पुण्यं ब्रह्मानन्देन कीर्तितम् ।
यः पठेन्मनुजो नित्यं स भवेच्छास्त्रपारगः ॥९॥

*॥ इति श्रीमत्परमहंस-स्वामी-ब्रह्मानन्द-विरचितं*
*श्रीवेदव्यासाष्टकं सम्पूर्णम् ॥*

## ७१. श्रीगुरुभजनस्तोत्रम्

कलाभिः कल्पिताशेष–भुवनानन्दभोजनम् ।
क्रीडन्तं त्रिपुरे नित्यं परसंविद्गुरुं भजे ॥१॥

हर्याकारं हराकारं ह्रीङ्कारं वाम्बिकातनुम् ।
हृदयेऽद्वैतमात्मानं द्योतयन्तं गुरुं भजे ॥२॥

शिवप्रियं च रुद्राक्षं गले भाले त्रिपुण्ड्रकम् ।
करे संविन्मयीं मुद्रां धारयन्तं गुरुं भजे ॥३॥

काषायवसनोपेतं करुणार्द्रविलोचनम् ।
कामारिसेवनासक्तं कल्मषघ्नं गुरुं भजे ॥४॥

श्रितार्तिभेदनोद्युक्तं शर्मदं शमशोभितम् ।
श्रुत्यन्तवाक्यमनिशं श्रावयन्तं गुरुं भजे ॥५॥

संशयोच्छेदने दक्षं रक्षिताचार्यसन्ततिम् ।
स्वनाथकरपाथोजसञ्जातं सद्गुरुं भजे ॥६॥

दीक्षितं शिष्यमोक्षार्थे साक्षात्कृतमहत्पदम् ।
दक्षिणामुखदेवांशं ब्रह्मनिष्ठं गुरुं भजे ॥७॥

ग्रन्थिं भित्त्वा विनिर्यान्तं वर्षन्तं गगनेऽमृतम् ।
कोटिविद्युत्प्रतीकाशं शक्तिपुञ्जं गुरुं भजे ॥८॥

जनयित्वा निजानन्दे रक्षित्वा मां क्षणे क्षणे ।
पाययन्तं भक्तिरसं मातृभूतं गुरुं भजे ॥९॥

अनन्यभावनागम्यम् अभयं ज्योतिरान्तरम् ।
इच्छाज्ञानक्रियामूलं आत्मरूपं गुरुं भजे ॥१०॥

देशिकेश्वरपश्चादिभेदशून्यं चिदम्बरम् ।
देशकालानवच्छिन्नं निर्विकल्पं गुरुं भजे ॥११॥

मज्जन्मजन्मसाफल्यमहो जातमयत्नतः ।
यदङ्घ्रिरेणुसंस्पर्शात् तमानन्दं गुरुं भजे ॥१२॥

श्रीगुरुद्वादशात्मानं ध्यात्वा स्तोत्रमिमं पठेत् ।
साधकोत्तमः संविद्-दृष्टिसौष्ठवहेतवे ॥

## ७२. श्रीगुरुपादुकापञ्चकम्

ॐ नमो गुरुभ्यो गुरुपादुकाभ्यो
नमः परेभ्यः परपादुकाभ्यः ।
आचार्यसिद्धेश्वरपादुकाभ्यो
नमो नमः श्रीगुरुपादुकाभ्यः ॥१॥

ऐङ्काररह्रीङ्काररहस्ययुक्त-
श्रीङ्कारगूढार्थमहाविभूत्या ।
ओङ्कारमर्मप्रतिपादिनीभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥२॥

होत्राग्निहोत्राग्निहविष्यहोतृ
होमादिसर्वाकृतिभासमानम् ।
यद्ब्रह्म तद्बोधवितारिणीभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥३॥

कामादिसर्पव्रजगारुडाभ्यां
विवेकवैराग्यनिधिप्रदाभ्याम् ।
बोधप्रदाभ्यां द्रुतमोक्षदाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥४॥

अनन्तसंसारसमुद्रतार-
नौकायिताभ्यां स्थिरभक्तिदाभ्याम् ।
जाड्याब्धिसंशोषणवाडवाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥५॥

## ७३. गुरुभक्तिस्तोत्रम्

शरीरं सुरूपं यथा वा कलत्रं
यशश्चारुचित्रं धनं मेरुतुल्यम् ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥१॥

कलत्रं धनं पुत्रपौत्रादि सर्वं
गृहं बान्धवाः सर्वमेतद्धि जालम्।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥२॥

षडङ्गादिवेदो मुखे शास्त्रविद्या
कवित्वादिगद्यं सुपद्यं करोति ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥३॥

विदेशेषु मान्यः स्वदेशेषु धन्यः
सदाचारवृत्तेषु मत्तो न चान्यः ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥४॥

क्षमामण्डले भूपभूपालवृन्दैः
सदा सेवितं यस्य पादारविन्दम् ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥५॥

यशो मे गतं दिक्षु दानप्रतापात्-
जगद्वस्तु सर्वं करे यत्प्रसादात् ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥६॥

न भोगे न योगे न वा वाजिराजौ
न कान्तामुखे नैव वित्तेषु चित्तम् ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥७॥

अरण्ये न वा स्वस्य गेहे न कार्ये
न देहे मनो वर्तते मे त्वनर्घ्ये ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥८॥

अनर्घ्याणि रत्नानि भुक्तानि सम्यक्
समालिङ्गिता कामिनी यामिनीषु ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥९॥

गुरोरष्टकं यः पठेत्पुण्यदेही
यतिर्भूपतिर्ब्रह्मचारी च गेही ।
लभेद्वाञ्छितार्थं पदं ब्रह्मसंज्ञं
गुरोरुक्तवाक्ये मनो यस्य लग्नम् ॥१०॥

# ५. विष्णुस्तोत्राणि

## ७४. श्रीविष्णोः प्रातःस्मरणम्

प्रातः स्मरामि भवभीतिमहार्तिशान्त्यै
नारायणं गरुडवाहनमब्जनाभम् ।
ग्राहाभिभूतवरवारणमुक्तिहेतुं
चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥१॥

प्रातर्नमामि मनसा वचसा च मूर्ध्ना
पादारविन्दयुगलं परमस्य पुंसः ।
नारायणस्य नरकार्णवतारणस्य
पारायणप्रवणविप्रपरायणस्य ॥२॥

प्रातर्भजामि भजतामभयङ्करं तं
प्राक्सर्वजन्मकृतपापभयापहत्यै ।
यो ग्राहवक्त्रपतिताङ्घ्रिगजेन्द्रघोर-
शोकप्रणाशनकरो धृतशङ्खचक्रः ॥३॥

*॥ इति श्रीविष्णोः प्रातःस्मरणम् ॥*

## ७५. श्रीरामप्रातःस्मरणम् ॥

प्रातः स्मरामि रघुनाथमुखारविन्दं
मन्दस्मितं मधुरभाषि विशालभालम् ।
कर्णावलम्बिचलकुण्डलशोभिगण्डं
कर्णान्तदीर्घनयनं नयनाभिरामम् ॥१॥

प्रातर्भजामि रघुनाथकरारविन्दं
रक्षोगणाय भयदं वरदं निजेभ्यः ।
यद्राजसंसदि विभज्य महेशचापं
सीताकरग्रहणमङ्गलमाप सद्यः ॥२॥

प्रातर्नमामि रघुनाथपदारविन्दं
वज्राङ्कुशादिशुभरेखि सुखावहं मे ।
योगीन्द्रमानसमधुव्रतसेव्यमानं
शापापहं सपदि गौतमधर्मपत्न्याः ॥३॥

प्रातर्वदामि वचसा रघुनाथनाम
वाग्दोषहारि सकलं शमलं निहन्ति ।
यत्पार्वती स्वपतिना सह भोक्तुकामा
प्रीत्या सहस्रहरिनामसमं जजाप ॥४॥

प्रातः श्रये श्रुतिनुतां रघुनाथमूर्तिं
नीलाम्बुजोत्पलसितेतररत्ननीलाम् ।
आमुक्तमौक्तिकविशेषविभूषणाढ्यां
ध्येयां समस्तमुनिभिर्जनमुक्तिहेतुम् ॥५॥

यः श्लोकपञ्चकमिदं प्रयतः पठेद्धि
नित्यं प्रभातसमये पुरुषः प्रबुद्धः ।
श्रीरामकिङ्करजनेषु स एव मुख्यो
भूत्वा प्रयाति हरिलोकमनन्यलभ्यम् ॥६॥

*॥ इति श्रीरामप्रातःस्मरणम् ॥*

## ७६. नारायणकवचम्

श्रीगणेशाय नमः । राजोवाच ।

यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥१॥

भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ।
यथाऽऽततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥२॥

श्रीशुक उवाच ।

वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ।
नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥३॥

विश्वरूप उवाच ।

धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः ।
कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः ॥४॥

नारायणमयं वर्म संनह्येद् भय आगते ।
पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ॥५॥

मुखे शिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत् ।
ॐ नमो नारायणायेति विपर्ययमथापि वा ॥६॥

करन्यासं ततः कुर्याद् द्वादशाक्षरविद्यया ।
प्रणवादियकारान्तमङ्गुल्यङ्गुष्ठपर्वसु ॥७॥

न्यसेद्धृदय ओङ्कारं विकारमनु मूर्धनि ।
षकारं तु भ्रुवोर्मध्ये णकारं शिखायां न्यसेत् ॥८॥

वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसन्धिषु ।
मकारमस्त्रमुद्दिश्य मन्त्रमूर्तिर्भवेद्बुधः ॥९॥

सविसर्गं फडन्तं तत्सर्वदिक्षु विनिर्दिशेत् ।
ॐ विष्णवे नम इति ॥१०॥

आत्मानं परमं ध्यायेद् ध्येयं षट्शक्तिभिर्युतम् ।
विद्यातेजस्तपोमूर्तिमिमं मन्त्रमुदाहरेत् ॥११॥

ॐ हरिर्विदध्यान्मम सर्वरक्षां
न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे ।
दरारिचर्मासिगदेषुचाप –
पाशान् दधानोऽष्टगुणोऽष्टबाहुः ॥१२॥

जलेषु मां रक्षतु मत्स्यमूर्ति –
र्यादोगणेभ्यो वरुणस्य पाशात् ।
स्थलेषु मायावटुवामनोऽव्यात्
त्रिविक्रमः खेऽवतु विश्वरूपः ॥१३॥

दुर्गेष्वटव्याजिमुखादिषु प्रभुः
पायान्नृसिंहोऽसुरयूथपारिः ।
विमुञ्चतो यस्य महाट्टहासं
दिशो विनेदुर्न्यपतंश्च गर्भाः ॥१४॥

रक्षत्वसौ माध्वनि यज्ञकल्पः
स्वदंष्ट्रयोन्नीतधरो वराहः ।
रामोऽद्रिकूटेष्वथ विप्रवासे
सलक्ष्मणोऽव्याद् भरताग्रजोऽस्मान् ॥१५॥

मामुग्रधर्मादखिलात्प्रमादा –
न्नारायणः पातु नरश्च हासात् ।
दत्तस्त्वयोगादथ योगनाथः
पायाद्गुणेशः कपिलः कर्मबन्धात् ॥१६॥

सनत्कुमारोऽवतु कामदेवा -
द्धयशीर्षा मां पथि देवहेलनात् ।
देवर्षिवर्यः पुरुषार्चनान्तरात्
कूर्मो हरिर्मां निरयादशेषात् ॥१७॥

धन्वन्तरिर्भगवान् पात्वपथ्याद्
द्वन्द्वाद् भयादृषभो निर्जितात्मा ।
यज्ञश्च लोकादवताज्जनान्ताद् -
बलो गणात् क्रोधवशादहीन्द्रः ॥१८॥

द्वैपायनो भगवानप्रबोधाद्
बुद्धस्तु पाखण्डगणात् प्रमादात् ।
कल्किः कलेः कालमलात् प्रपातु
धर्मावनायोरुकृतावतारः ॥१९॥

मां केशवो गदया प्रातरव्याद् -
गोविन्द आसङ्गवमात्तवेणुः ।
नारायणः प्राह्ण उदात्तशक्ति -
र्मध्यन्दिने विष्णुररीन्द्रपाणिः ॥२०॥

देवोऽपराह्णे मधुहोग्रधन्वा
सायं त्रिधामावतु माधवो माम् ।
दोषे हृषीकेश उतार्धरात्रे
निशीथे एकोऽवतु पद्मनाभः ॥२१॥

श्रीवत्सधामापररात्र ईशः
प्रत्यूष ईशोऽसिधरो जनार्दनः ।
दामोदरोऽव्यादनुसन्ध्यं प्रभाते
विश्वेश्वरो भगवान्कालमूर्तिः ॥२२॥

चक्रं युगान्तानलतिग्मनेमि
भ्रमत् समन्ताद् भगवत्प्रयुक्तम् ।
दन्दग्धि दन्दग्ध्यरिसैन्यमाशु
कक्षं यथा वातसखो हुताशः ॥२३॥

गदेऽशनिस्पर्शनविस्फुलिङ्गे
निष्पिण्ढि निष्पिढ्यजितप्रियासि ।
कूष्माण्डवैनायकयक्षरक्षो -
भूतग्रहांश्चूर्णय चूर्णयारीन् ॥२४॥

त्वं यातुधानप्रमथप्रेतमातृ -
पिशाचविप्रग्रहघोरदृष्टीन् ।
दरेन्द्र विद्रावय कृष्णपूरितो
भीमस्वनोऽरेर्हृदयानि कम्पयन् ॥२५॥

त्वं तिग्मधारासिवरारिसैन्य -
मीशप्रयुक्तो मम छिन्धि छिन्धि ।
चक्षूंषि चर्मञ्छतचन्द्र छादय
द्विषामघोनां हर पापचक्षुषाम् ॥२६॥

यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च ।
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योऽहोभ्य एव वा ॥२७॥

सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ।
प्रयान्तु सङ्क्षयं सद्यो ये नः श्रेयः प्रतीपकाः ॥२८॥

गरुडो भगवान् स्तोत्रस्तोभश्छन्दोमयः प्रभुः ।
रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥२९॥

सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः ।
बुद्धीन्द्रियमनः प्राणान् पान्तु पार्षदभूषणाः ॥३०॥

यथा हि भगवानेव वस्तुतः सदसच्च यत् ।
सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः ॥३१॥

यथैकात्म्यानुभावानां विकल्परहितः स्वयम् ।
भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया ॥३२॥

तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः ।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥३३॥

विदिक्षु दिक्षूर्ध्वमधः समन्ता –
दन्तर्बहिर्भगवान् नारसिंहः ।
प्रहापयँल्लोकभयं स्वनेन
स्वतेजसा ग्रस्तसमस्ततेजाः ॥३४॥

मघवन्निदमाख्यातं वर्म नारायणात्मकम् ।
विजेष्यसेऽञ्जसा येन दंशितोऽसुरयूथपान् ॥३५॥

एतद् धारयमाणस्तु यं यं पश्यति चक्षुषा ।
पदा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते॥३६॥

न कुतश्चिद् भयं तस्य विद्यां धारयतो भवेत् ।
राजदस्युग्रहादिभ्यो व्याध्यादिभ्यश्च कर्हिचित् ॥३७॥

इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः ।
योगधारणया स्वाङ्गं जहौ स मरुधन्वनि ॥३८॥

तस्योपरि विमानेन गन्धर्वपतिरेकदा ।
ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥३९॥

गगनान्न्यपतत् सद्यः सविमानो ह्यवाक्शिराः ।
स वालखिल्यवचनादस्थीन्यादाय विस्मितः ।
प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात्॥४०॥

श्रीशुक उवाच

य इदं शृणुयात् काले यो धारयति चादृतः ।
तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥४१॥

एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ।
त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥४२॥

*॥ इति श्रीनारायणकवचं सम्पूर्णम् ॥*

## ७७. श्रीव्यासविरचितरामाष्टकम्

भजे विशेषसुन्दरं समस्तपापखण्डनम् ।
स्वभक्तचित्तरञ्जनं सदैव राममद्वयम् ॥१॥

जटाकलापशोभितं समस्तपापनाशकम् ।
स्वभक्तभीतिभञ्जनं भजे ह राममद्वयम् ॥२॥

निजस्वरूपबोधकं कृपाकरं भवापहम् ।
समं शिवं निरञ्जनं भजे ह राममद्वयम् ॥३॥

सहप्रपञ्चकल्पितं ह्यनामरूपवास्तवम् ।
निराकृतिं निरामयं भजे ह राममद्वयम् ॥४॥

निष्प्रपञ्चनिर्विकल्पनिर्मलं निरामयम् ।
चिदेकरूपसन्ततं भजे ह राममद्वयम् ॥५॥

भवाब्धिपोतरूपकं ह्यशेषदेहकल्पितम् ।
गुणाकरं कृपाकरं भजे ह राममद्वयम् ॥६॥

महावाक्यबोधकैर्विराजमानवाक्पदैः ।
परब्रह्मव्यापकं भजे ह राममद्वयम् ॥७॥

शिवप्रदं सुखप्रदं भवच्छिदं भ्रमापहम् ।
विराजमानदेशिकं भजे ह राममद्वयम् ॥८॥

रामाष्टकं पठति यः सुकरं सुपुण्यं
व्यासेन भाषितमिदं शृणुते मनुष्यः ।
विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिं
सम्प्राप्य देहविलये लभते च मोक्षम् ॥९॥

*॥ इति व्यासविरचितं रामाष्टकं सम्पूर्णम् ॥*

## ७८. श्रीमदच्युताष्टकम्

अच्युताच्युत हरे परमात्मन् रामकृष्ण पुरुषोत्तम विष्णो ।
वासुदेव भगवन् अनिरुद्ध श्रीपते शमय दुःखमशेषम् ॥१॥

विश्वमङ्गल विभो जगदीश नन्दनन्दन नृसिंह नरेन्द्र ।
मुक्तिदायक मुकुन्द मुरारे श्रीपते शमय दुःखमशेषम् ॥२॥

रामचन्द्र रघुनायक देव दीननाथ दुरितक्षयकारिन् ।
यादवेन्द्र यदुभूषण यज्ञ श्रीपते शमय दुःखमशेषम् ॥३॥

देवकीतनय दुःखदवाग्ने राधिकारमण रम्य सुमूर्ते ।
दुःखमोचन दयार्णवनाथ श्रीपते शमय दुःखमशेषम् ॥४॥

गोपिकावदनचन्द्रचकोर नित्यनिर्गुण निरञ्जन जिष्णो ।
पूर्णरूप जयशङ्कर शर्व श्रीपते शमय दुःखमशेषम् ॥५॥

गोकुलेश गिरिधारण धीर यामुनाच्छतटखेलनवीर ।
नारदादिमुनिवन्दितपाद श्रीपते शमय दुःखमशेषम् ॥६॥

द्वारकाधिप दुरन्त गुणाब्धे प्राणनाथ परिपूर्ण भवारे ।
ज्ञानगम्य गुणसागर ब्रह्मन् श्रीपते शमय दुःखमशेषम् ॥७॥

दुष्टनिर्दलन देव दयालो पद्मनाभ धरणीधर धर्मिन् ।
रावणान्तक रमेश मुरारे श्रीपते शमय दुःखमशेषम् ॥८॥

अच्युताष्टकमिदं रमणीयं निर्मितं भवभयं विनिहन्तुम् ।
यः पठेद्विषयवृत्तिनिवृत्तिर्जन्मदुःखमखिलं स जहाति ॥९॥

## ७९. परमहंसस्वामीब्रह्मानन्दविरचित-श्रीरामाष्टकम्

कृतान्तदेववन्दनं दिनेशवंशनन्दनम् ।
सुशोभिभालचन्दनं नमामि राममीश्वरम् ॥१॥

मुनीन्द्रयज्ञकारकं शिलाविपत्तिहारकम् ।
महाधनुर्विदारकं नमामि राममीश्वरम् ॥२॥

स्वतातवाक्यकारिणं तपोवने विहारिणम् ।
करेषु चापधारिणं नमामि राममीश्वरम् ॥३॥

कुरङ्गमुक्तसायकं जटायुमोक्षदायकम् ।
प्रविद्धकीशनायकं नमामि राममीश्वरम् ॥४॥

प्लवङ्गसङ्गसम्मतिं निबद्धनिम्नगापतिम् ।
दशास्यवंशसङ्क्षतिं नमामि राममीश्वरम् ॥५॥

विदीनदेवहर्षणं कपीप्सितार्थवर्षणम् ।
स्वबन्धुशोककर्षणं नमामि राममीश्वरम् ॥६॥

गतारिराज्यरक्षणं प्रजाजनार्तिभक्षणम् ।
कृतास्तमोहलक्षणं नमामि राममीश्वरम् ॥७॥

हृताखिलाचलाभरं स्वधामनीतनागरम् ।
जगत्तमोदिवाकरं नमामि राममीश्वरम् ॥८॥

इदं समाहितात्मना नरो रघूत्तमाष्टकम् ।
पठन्निरन्तरं भयं भवोद्भवं न विन्दते ॥९॥

*॥ इति श्रीपरमहंसस्वामीब्रह्मानन्दविरचितं श्रीरामाष्टकं सम्पूर्णम् ॥*

## ८०. मधुराष्टकम्

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ॥१॥

वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम् ।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥२॥

वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम् ॥३॥

गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम् ।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम् ॥४॥

करणं मधुरं तरणं मधुरं हरणं मधुरं स्मरणं मधुरम् ।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥५॥

गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा ।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम् ॥६॥

गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम् ।
दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम् ॥७॥

गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥८॥

## ८१. श्रीलक्ष्मीनृसिंहस्तोत्रम्

श्रीमत्पयोनिधिनिकेतनचक्रपाणे
भोगीन्द्रभोगमणिरञ्जितपुण्यमूर्ते ।
योगीश शाश्वत शरण्य भवाब्धिपोत
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥१॥

ब्रह्मेन्द्ररुद्रमरुदर्ककिरीटकोटि-
सङ्घट्टिताङ्घ्रिकमलामलकान्तिकान्त ।
लक्ष्मीलसत्कुचसरोरुहराजहंस
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥२॥

संसारघोरगहने चरतो मुरारे
मारोग्रभीकरमृगप्रवरार्दितस्य ।
आर्तस्य मत्सरनिदाघनिपीडितस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥३॥

संसारकूपमतिघोरमगाधमूलं
सम्प्राप्य दुःखशतसर्पसमाकुलस्य ।
दीनस्य देव कृपणापदमागतस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥४॥

संसारसागरविशालकरालकाल-
नक्रग्रहग्रसननिग्रहविग्रहस्य ।

व्यग्रस्य रागरसनोर्मिनिपीडितस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥५॥

संसारवृक्षमघबीजमनन्तकर्म-
शाखाशतं करणपत्रमनङ्गपुष्पम् ।
आरुह्य दुःखफलितं पततो दयालो
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥६॥

संसारसर्पघनवक्त्रभयोग्रतीव्र
दंष्ट्राकरालविषदग्धविनष्टमूर्ते ।
नागारिवाहन सुधाब्धिनिवास शौरे
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥७॥

संसारदावदहनातुरभीकरोरु-
ज्वालावलीभिरतिदग्धतनूरुहस्य ।
त्वत्पादपद्मसरसीशरणागतस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥८॥

संसारजालपतितस्य जगन्निवास
सर्वेन्द्रियार्थवडिशार्थझषोपमस्य ।
प्रोत्खण्डितप्रचुरतालुकमस्तकस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥९॥

संसारभीकरकरीन्द्रकराभिघात-
निष्पिष्टमर्मवपुषः सकलार्तिनाश ।
प्राणप्रयाणभवभीतिसमाकुलस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥१०॥

अन्धस्य मे हृतविवेकमहाधनस्य
चोरैः प्रभो बलिभिरिन्द्रियनामधेयैः ।

मोहान्धकूपकुहरे विनिपातितस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥११॥

लक्ष्मीपते कमलनाभ सुरेश विष्णो
वैकुण्ठ कृष्ण मधुसूदन पुष्कराक्ष ।
ब्रह्मण्य केशव जनार्दन वासुदेव
देवेश देहि कृपणस्य करावलम्बम् ॥१२॥

यन्माययोर्जितवपुःप्रचुरप्रवाह-
मग्नार्थमत्र निवहोरुकरावलम्बम् ।
लक्ष्मीनृसिंहचरणाब्जमधुव्रतेन
स्तोत्रं कृतं सुखकरं भुवि शङ्करेण ॥१३॥

ये तत्पठन्ति मनुजा हरिभक्तियुक्ताः
ते यान्ति तत्पदसरोजमखण्डरूपम् ॥१४॥

*॥ इति श्रीमच्छङ्कराचार्यकृतं श्रीलक्ष्मीनृसिंहस्तोत्रं सम्पूर्णम् ॥*

## ८२. श्रीपाण्डुरङ्गाष्टकम्

महायोगपीठे तटे भीमरथ्या वरं पुण्डरीकाय दातुं मुनीन्द्रैः ।
समागत्य तिष्ठन्तमानन्दकन्दं परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥१॥

तडिद्वाससं नीलमेघावभासं रमामन्दिरं सुन्दरं चित्प्रकाशम् ।
वरं त्विष्टिकायां समन्यस्तपादं परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥२॥

प्रमाणं भवाब्धेरिदं मामकानां नितम्बः कराभ्यां धृतो येन तस्मात् ।
विधातुर्वसत्यै धृतो नाभिकोशः परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥३॥

स्फुरत्कौस्तुभालङ्कृतं कण्ठदेशे श्रिया जुष्टकेयूरकं श्रीनिवासम् ।
शिवं शान्तमीड्यं वरं लोकपालं परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥४॥

शरच्चन्द्रबिम्बाननं चारुहासं लसत्कुण्डलाक्रान्तगण्डस्थलाङ्गम् ।
जपारागबिम्बाधरं कञ्जनेत्रं परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥५॥

किरीटोज्ज्वलत्सर्वदिक्प्रान्तभागं सुरैरर्चितं दिव्यरत्नैरनर्घ्यैः ।
त्रिभङ्गाकृतिं बर्हमाल्यावतंसं परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥६॥

विभुं वेणुनादं चरन्तं दुरन्तं स्वयं लीलया गोपवेषं दधानम् ।
गवां वृन्दकानन्दनं चारुहासं परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥७॥

अजं रुक्मिणीप्राणसञ्जीवनं तं परंधामकैवल्यमेकं तुरीयम् ।
प्रसन्नं प्रपन्नार्तिहं देवदेवं परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥८॥

स्तवं पाण्डुरङ्गस्य वै पुण्यदं ये पठन्त्येकचित्तेन भक्त्या च नित्यम् ।
भवाम्भोनिधिं तेऽपि तीर्त्वान्तकाले हरेरालयं शाश्वतं प्राप्नुवन्ति॥९॥

*॥ इति श्रीमच्छङ्कराचार्यविरचितं पाण्डुरङ्गाष्टकं सम्पूर्णम् ॥*

## ८३. श्रीहरिशरणाष्टकम्

ध्येयं वदन्ति शिवमेव हि केचिदन्ये
शक्तिं गणेशमपरे तु दिवाकरं वै ।
रूपैस्तु तैरपि विभासि यतस्त्वमेव
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥१॥

नो सोदरो न जनको जननी न जाया
नैवात्मजो न च कुलं विपुलं बलं वा ।
सन्दृश्यते न किल कोऽपि सहायको मे
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥२॥

नोपासिता मदमपास्य मया महान्तः
तीर्थानि चास्तिकधिया न हि सेवितानि ।
देवार्चनं च विधिवन्न कृतं कदापि
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥३॥

दुर्वासना मम सदा परिकर्षयन्ति
चित्तं शरीरमपि रोगगणा दहन्ति ।
सञ्जीवनं च परहस्तगतं सदैव
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥४॥

पूर्वकृतानि दुरितानि मया तु यानि
स्मृत्वाखिलानि हृदयं परिकम्पते मे ।
ख्याता च ते पतितपावनता तु यस्मात्
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥५॥

दुःखं जराजननजं विविधाश्च रोगाः
काकश्वसूकरजनिर्निरये च पातः ।
ते विस्मृतेः फलमिदं विततं हि लोके
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥६॥

नीचोऽपि पापवलितोऽपि निन्दितोऽपि
ब्रूयात्तवाहमिति यस्तु किलैकवारम् ।
तं यच्छसीश निजलोकमिति व्रतं ते
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥७॥

वेदेषु धर्मवचनेषु तथागमेषु
रामायणेऽपि च पुराणकदम्बके वा ।
सर्वत्र सर्वविधिना गदितस्त्वमेव
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥८॥

*॥ इति श्रीमत्परमहंसस्वामीब्रह्मानन्दविरचितं श्रीहरिशरणाष्टकं सम्पूर्णम् ॥*

## ८४. गोविन्दाष्टकम्

सत्यं ज्ञानमनन्तं नित्यमनाकाशं परमाकाशं
गोष्ठप्राङ्गणरिङ्गणलोलमनायासं परमायासम् ।
मायाकल्पितनानाकारमनाकारं भुवनाकारं
क्ष्मामानाथमनाथं प्रणमत गोविन्दं परमानन्दम् ॥१॥

मृत्स्नामत्सीहेति यशोदाताडनशैशवसन्त्रासं
व्यादितवक्त्रालोकितलोकालोकचतुर्दशलोकालिम् ।
लोकत्रयपुरमूलस्तम्भं लोकालोकमनालोकं
लोकेशं परमेशं प्रणमत गोविन्दं परमानन्दम् ॥२॥

त्रैविष्टपरिपुवीरघ्नं क्षितिभारघ्नं भवरोगघ्नं
कैवल्यं नवनीताहारमनाहारं भुवनाहारम् ।
वैमल्यस्फुटचेतोवृत्तिविशेषाभासमनाभासं
शैवं केवलशान्तं प्रणमत गोविन्दं परमानन्दम् ॥३॥

गोपालं भूलीलाविग्रहगोपालं कुलगोपालं
गोपीखेलनगोवर्धनधृतिलीलालालितगोपालम् ।
गोभिर्निगदितगोविन्दस्फुटनामानं बहुनामानं
गोधीगोचरदूरं प्रणमत गोविन्दं परमानन्दम् ॥४॥

गोपीमण्डलगोष्ठीभेदं भेदावस्थमभेदाभं
शश्वद्गोखुरनिर्धूतोद्गतधूलीधूसरसौभाग्यम् ।
श्रद्धाभक्तिगृहीतानन्दमचिन्त्यं चिन्तितसद्भावं
चिन्तामणिमहिमानं प्रणमत गोविन्दं परमानन्दम् ॥५॥

स्नानव्याकुलयोषिद्वस्त्रमुपादायागमुपारूढं
व्यादित्सन्तीरथदिग्वस्त्रा दातुमुपाकर्षन्तं ताः ।
निर्धूतद्वयशोकविमोहं बुद्धं बुद्धेरन्तःस्थं
सत्तामात्रशरीरं प्रणमत गोविन्दं परमानन्दम् ॥६॥

कान्तं कारणकारणमादिमनादिं कालघनाभासं
कालिन्दीगतकालियशिरसि सुनृत्यन्तं मुहुरत्यन्तम् ।
कालं कालकलातीतं कलिताशेषं कलिदोषघ्नं
कालत्रयगतिहेतुं प्रणमत गोविन्दं परमानन्दम् ॥७॥

वृन्दावनभुवि वृन्दारकगणवृन्दाराधितवन्द्यायां
कुन्दाभामलमन्दस्मेरसुधानन्दं सुमहानन्दम् ।
वन्द्याशेषमहामुनिमानसवन्द्यानन्दपदद्वन्द्वं
नन्द्याशेषगुणाब्धिं प्रणमत गोविन्दं परमानन्दम् ॥८॥

गोविन्दाष्टकमेतदधीते गोविन्दार्पितचेता यो
गोविन्दाच्युत माधव विष्णो गोकुलनायक कृष्णेति ।
गोविन्दाङ्घ्रिसरोजध्यानसुधाजलधौतसमस्ताघो
गोविन्दं परमानन्दामृतमन्तस्थं स तमभ्येति ॥९॥

## ८५. अच्युताष्टकम्

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम् ।
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे॥१॥

अच्युतं केशवं सत्यभामाधवं माधवं श्रीधरं राधिकाराधितम् ।
इन्दिरामन्दिरं चेतसा सुन्दरं देवकीनन्दनं नन्दजं सन्दधे ॥२॥

विष्णवे जिष्णवे शङ्खिने चक्रिणे रुक्मिणिरागिणे जानकीजानये ।
वल्लवीवल्लभायार्चितायात्मने कंसविध्वंसिने वंशिने ते नमः ॥३॥

कृष्ण गोविन्द हे रामनारायण श्रीपते वासुदेवाजित श्रीनिधे ।
अच्युतानन्त हे माधवाधोक्षज द्वारकानायक द्रौपदीरक्षक ॥४॥

राक्षसक्षोभितः सीतया शोभितो दण्डकारण्यभूपुण्यताकारणः ।
लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसम्पूजितो राघवः पातु माम् ॥५॥

धेनुकारिष्टकोऽनिष्टकृद्द्वेषिणां केशिहा कंसहृद्वंशिकावादकः ।
पूतनाकोपिकः सुरजाखेलनो बालगोपालकः पातु मां सर्वदा ॥६॥

विद्युदुद्योतवान्प्रस्फुरद्वाससं प्रावृडम्भोदवप्रोल्लसद्विग्रहम् ।
वन्यया मालया शोभितोरःस्थलं लोहिताङ्घ्रिद्वयं वारिजाक्षं भजे॥७॥

कुञ्चितैः कुन्तलैर्भ्राजमानाननं रत्नमौलिलसत्कुण्डलं गण्डयोः ।
हारकेयूरकं कङ्कणप्रोज्ज्वलं किङ्किणीमञ्जुलं श्यामलं तं भजे॥८॥

अच्युतस्याष्टकं यः पठेदिष्टदं प्रेमतः प्रत्यहं पूरुषः सस्पृहम् ।
वृत्ततः सुन्दरः कर्तृ विश्वम्भरः तस्य वश्यो हरिर्जायते सत्वरम्॥९॥

*॥ इति श्रीमच्छङ्करभगवत्पादाचार्यविरचितम् अच्युताष्टकं समाप्तम् ॥*

## ८६. श्रीकृष्णाष्टकम्

भजे व्रजैकमण्डनं समस्तपापखण्डनं
स्वभक्तचित्तरञ्जनं सदैव नन्दनन्दनम् ।
सुपिच्छगुच्छमस्तकं सुनादवेणुहस्तकं
अनङ्गरागसागरं नमामि कृष्णनागरम् ॥१॥

मनोजगर्वमोचनं विशाललोललोचनं
विधूतगोपशोचनं नमामि पद्मलोचनम् ।
करारविन्दभूधरं स्मितावलोकसुन्दरं
महेन्द्रमानदारणं नमामि कृष्णवारणम् ॥२॥

कदम्बसूनकुण्डलं सुचारुगण्डमण्डलं
व्रजाङ्गनैकवल्लभं नमामि कृष्णदुर्लभम् ।
यशोदया समोदया सगोपया सनन्दया
युतं सुखैकदायकं नमामि गोपनायकम् ॥३॥

सदैव पादपङ्कजं मदीय मानसे निजं
दधानमुत्तमालकं नमामि नन्दबालकम् ।
समस्तदोषशोषणं समस्तलोकपोषणं
समस्तगोपमानसं नमामि नन्दलालसम् ॥४॥

भुवो भरावतारकं भवाब्धिकर्णधारकं
यशोमतीकिशोरकं नमामि चित्तचोरकम् ।
दृगन्तकान्तभङ्गिनं सदासदालिसङ्गिनं
दिने दिने नवं नवं नमामि नन्दसम्भवम् ॥५॥

गुणाकरं सुखाकरं कृपाकरं कृपापरं
सुरद्विषन्निकन्दनं नमामि गोपनन्दनम् ।
नवीनगोपनागरं नवीनकेलिलम्पटं
नमामि मेघसुन्दरं तडित्प्रभालसत्पटम् ॥६॥

समस्तगोपनन्दनं हृदम्बुजैकमोदनं
नमामि कुञ्जमध्यगं प्रसन्नभानुशोभनम् ।
निकामकामदायकं दृगन्तचारुसायकं
रसालवेणुगायकं नमामि कुञ्जनायकम् ॥७॥

विदग्धगोपिकामनोमनोज्ञतल्पशायिनं
नमामि कुञ्जकानने प्रवृद्धवह्निपायिनम् ।
यदा यदा यथा यथा तथैव कृष्णसत्कथा
मया सदैव गीयतां तथा कृपा विधीयताम् ॥८॥

*॥ इति श्रीमच्छङ्कराचार्यकृतं श्रीकृष्णाष्टकं सम्पूर्णम् ॥*

# ६. सङ्कीर्णस्तोत्राणि

## ८७. श्रीगङ्गास्तोत्रम्

देवि सुरेश्वरि भगवति गङ्गे त्रिभुवनतारिणि तरलतरङ्गे ।
शङ्करमौलिविहारिणि विमले मम मतिरास्तां तव पदकमले ॥१॥

भागीरथि सुखदायिनि मातस्तव जलमहिमा निगमे ख्यातः ।
नाहं जाने तव महिमानं पाहि कृपामयि मामज्ञानम् ॥२॥

हरिपदपाद्यतरङ्गिणि गङ्गे हिमविधुमुक्ताधवलतरङ्गे ।
दूरीकुरु मम दुष्कृतिभारं कुरु कृपया भवसागरपारम् ॥३॥

तव जलममलं येन निपीतं परमपदं खलु तेन गृहीतम् ।
मातर्गङ्गे त्वयि यो भक्तः किल तं द्रष्टुं न यमः शक्तः ॥४॥

पतितोद्धारिणि जाह्नवि गङ्गे खण्डितगिरिवरमण्डितभङ्गे ।
भीष्मजननि हे मुनिवरकन्ये पतितनिवारिणि त्रिभुवनधन्ये ॥५॥

कल्पलतामिव फलदां लोके प्रणमति यस्त्वां न पतति शोके ।
पारावारविहारिणि गङ्गे विमुखयुवतिकृततरलापाङ्गे ॥६॥

तव चेन्मातः स्रोतःस्नातः पुनरपि जठरे सोऽपि न जातः ।
नरकनिवारिणि जाह्नवि गङ्गे कलुषविनाशिनि महिमोत्तुङ्गे ॥७॥

पुनरसदङ्गे पुण्यतरङ्गे जय जय जाह्नवि करुणापाङ्गे ।
इन्द्रमुकुटमणिराजितचरणे सुखदे शुभदे भृत्यशरण्ये ॥८॥

रोगं शोकं तापं पापं हर मे भगवति कुमतिकलापम् ।
त्रिभुवनसारे वसुधाहारे त्वमसि गतिर्मम खलु संसारे ॥९॥

अलकानन्दे परमानन्दे कुरु करुणां मयि कातरवन्द्ये ।
तव तटनिकटे यस्य निवासः खलु वैकुण्ठे तस्य निवासः ॥१०॥

वरमिह नीरे कमठो मीनः किं वा तीरे शरटः क्षीणः ।
अथवा श्वपचो मलिनो दीनः तव न हि दूरे नृपतिकुलीनः ॥११॥

भो भुवनेश्वरि पुण्ये धन्ये देवि द्रवमयि मुनिवरकन्ये ।
गङ्गास्तवमिममलं नित्यं पठति नरो यः स जयति सत्यम् ॥१२॥

येषां हृदये गङ्गाभक्तिस्तेषां भवति सदा सुखमुक्तिः ।
मधुराकान्ता पञ्झटिकाभिः परमानन्दकलितललिताभिः ॥१३॥

गङ्गास्तोत्रमिदं भवसारं वाञ्छितफलदं विमलं सारम् ।
शङ्करसेवकशङ्कररचितं पठति सुखी स्तव इति च समाप्तः ॥१४॥

## ८८. निर्वाणषट्कम्

मनोबुद्ध्यहङ्कारचित्तानि नाहं
न च श्रोत्रजिह्वे न च घ्राणनेत्रे ।
न च व्योमभूमिर्न तेजो न वायुः
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥१॥

न च प्राणसंज्ञो न वै पञ्चवायुः
न वा सप्तधातुर्न वा पञ्चकोशः ।
न वाक्पाणिपादौ न चोपस्थपायू
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥२॥

न मे द्वेषरागौ न मे लोभमोहौ
मदो नैव मे नैव मात्सर्यभावः ।
न धर्मो न चार्थो न कामो न मोक्षः
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥३॥

न पुण्यं न पापं न सौख्यं न दुःखं
न मन्त्रो न तीर्थो न वेदा न यज्ञाः ।

अहं भोजनं नैव भोज्यं न भोक्ता
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥४॥

न मृत्युर्न शङ्का न मे जातिभेदः
पिता नैव मे नैव माता न जन्म ।
न बन्धुर्न मित्रं गुरुर्नैव शिष्यः
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥५॥

अहं निर्विकल्पो निराकाररूपो
विभुर्व्याप्य सर्वत्र सर्वेन्द्रियाणाम् ।
सदा मे समत्वं न मुक्तिर्न बन्धः
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥६॥

## ८९. भज गोविन्दम्

भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते ।
सम्प्राप्ते सन्निहिते काले न हि न हि रक्षति डुकृञ् करणे ॥१॥

मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥२॥
(भज गोविन्दं भज गोविन्दं...)

नारीस्तनभरनाभीदेशं दृष्ट्वा मा गा मोहावेशम् ।
एतन्मांसवसादिविकारं मनसि विचिन्तय वारंवारम् ॥३॥
(भज गोविन्दं भज गोविन्दं...)

नलिनीदलगतजलमतितरलं तद्वज्जीवितमतिशयचपलम् ।
विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम् ॥४॥
(भज गोविन्दं भज गोविन्दं...)

यावद्वित्तोपार्जनसक्तः तावन्निजपरिवारो रक्तः ।
पश्चाज्जीवति जर्जरदेहे वार्तां कोऽपि न पृच्छति गेहे ॥५॥
(भज गोविन्दं भज गोविन्दं...)

यावत्पवनो निवसति देहे तावत्पृच्छति कुशलं गेहे ।
गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ॥६॥
(भज गोविन्दं भज गोविन्दं...)

बालस्तावत्क्रीडासक्तः तरुणस्तावत्तरुणीसक्तः ।
वृद्धस्तावच्चिन्तासक्तः परे ब्रह्मणि कोऽपि न सक्तः ॥७॥
(भज गोविन्दं भज गोविन्दं...)

का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातः तत्त्वं चिन्तय तदिह भ्रातः ॥८॥
(भज गोविन्दं भज गोविन्दं...)

सत्सङ्गत्वे निस्सङ्गत्वं निस्सङ्गत्वे निर्मोहत्वम् ।
निर्मोहत्वे निश्चलतत्त्वं निश्चलतत्त्वे जीवन्मुक्तिः ॥९॥
(भज गोविन्दं भज गोविन्दं...)

वयसि गते कः कामविकारः शुष्के नीरे कः कासारः ।
क्षीणे वित्ते कः परिवारः ज्ञाते तत्त्वे कः संसारः ॥१०॥
(भज गोविन्दं भज गोविन्दं...)

मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम् ।
मायामयमिदमखिलं बुद्ध्वा ब्रह्मपदं त्वं प्रविश विदित्वा ॥११॥
(भज गोविन्दं भज गोविन्दं...)

दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुः तदपि न मुञ्चत्याशावायुः ॥१२॥
(भज गोविन्दं भज गोविन्दं...)

का ते कान्ता धनगतचिन्ता वातुल किं तव नास्ति नियन्ता ।
त्रिजगति सज्जनसङ्गतिरेका भवति भवार्णवतरणे नौका ॥१३॥
(भज गोविन्दं भज गोविन्दं...)

जटिलो मुण्डी लुञ्चितकेशः काषायाम्बरबहुकृतवेषः ।
पश्यन्नपि च न पश्यति मूढः ह्युदरनिमित्तं बहुकृतवेषः ॥१४॥
(भज गोविन्दं भज गोविन्दं...)

अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ॥१५॥
(भज गोविन्दं भज गोविन्दं...)

अग्रे वह्निः पृष्ठे भानुः रात्रौ चुबुकसमर्पितजानुः ।
करतलभिक्षस्तरुतलवासः तदपि न मुञ्चत्याशापाशः ॥१६॥
(भज गोविन्दं भज गोविन्दं...)

कुरुते गङ्गासागरगमनं व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीनः सर्वमतेन भजति न मुक्तिं जन्मशतेन ॥१७॥
(भज गोविन्दं भज गोविन्दं...)

सुरमन्दिरतरुमूलनिवासः शय्याभूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥१८॥
(भज गोविन्दं भज गोविन्दं...)

योगरतो वा भोगरतो वा सङ्गरतो वा सङ्गविहीनः ।
यस्य ब्रह्मणि रमते चित्तं नन्दति नन्दति नन्दत्येव ॥१९॥
(भज गोविन्दं भज गोविन्दं...)

भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता ।
सकृदपि येन मुरारिसमर्चा क्रियते तस्य यमेन न चर्चा ॥२०॥
(भज गोविन्दं भज गोविन्दं...)

पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
इह संसारे बहुदुस्तारे कृपयापारे पाहि मुरारे ॥२१॥
(भज गोविन्दं भज गोविन्दं...)

रथ्याचर्पटविरचितकन्थः पुण्यापुण्यविवर्जितपन्थः ।
योगी योगनियोजितचित्तो रमते बालोन्मत्तवदेव ॥२२॥
(भज गोविन्दं भज गोविन्दं...)

कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ।
इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम् ॥२३॥
(भज गोविन्दं भज गोविन्दं...)

त्वयि मयि चान्यत्रैको विष्णुः व्यर्थं कुप्यसि मय्यसहिष्णुः ।
सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम् ॥२४॥
(भज गोविन्दं भज गोविन्दं...)

शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम् ॥२५॥
(भज गोविन्दं भज गोविन्दं...)

कामं क्रोधं लोभं मोहं त्यक्त्वाऽऽत्मानं भावय कोऽहम् ।
आत्मज्ञानविहीना मूढाः ते पच्यन्ते नरकनिगूढाः ॥२६॥
(भज गोविन्दं भज गोविन्दं...)

गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ।
नेयं सज्जनसङ्गे चित्तं देयं दीनजनाय च वित्तम् ॥२७॥
(भज गोविन्दं भज गोविन्दं...)

सुखतः क्रियते रामाभोगः पश्चाद्धन्त शरीरे रोगः ।
यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम् ॥२८॥
(भज गोविन्दं भज गोविन्दं...)

अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः ॥२९॥
(भज गोविन्दं भज गोविन्दं...)

प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम् ।
जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम् ॥३०॥
(भज गोविन्दं भज गोविन्दं...)

गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद्भव मुक्तः ।
सेन्द्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम् ॥३१॥
(भज गोविन्दं भज गोविन्दं...)

## १०. हनुमत्-स्तवनम्

अतुलितबलधामं हेमशैलाभदेहं
दनुजवनकृशानुं ज्ञानिनामग्रगण्यम् ।
सकलगुणनिधानं वानराणामधीशं
रघुपतिप्रियभक्तं वातजातं नमामि ॥१॥

गोष्पदीकृतवारीशं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥२॥

अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥३॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयम् ॥४॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥५॥

आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥६॥

यत्र यत्र रघुनाथकीर्तनं तत्र तत्र नतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥७॥

बुद्धिर्बलं यशो धैर्यं निर्भयत्वम् अरोगिता ।
अजाड्यं वाक्पटुत्वं च हनूमत्स्मरणाद् भवेत् ॥८॥

## ११. सूर्याष्टकम्

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते ॥१॥

सप्ताश्वरथमारूढं प्रचण्डं कश्यपात्मजम् ।
श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम् ॥२॥

लोहितं रथमारूढं सर्वलोकपितामहम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥३॥

त्रैगुण्यं च महाशूरं ब्रह्मविष्णुमहेश्वरम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥४॥

बृंहितं तेजःपुञ्जं च वायुमाकाशमेव च ।
प्रभुं च सर्वलोकानां तं सूर्यं प्रणमाम्यहम् ॥५॥

बन्धूकपुष्पसङ्काशं हारकुण्डलभूषितम् ।
एकचक्रधरं देवं तं सूर्यं प्रणमाम्यहम् ॥६॥

तं सूर्यं जगत्कर्तारं महातेजः प्रदीपनम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥७॥

तं सूर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥८॥

## १२. नवग्रहस्तोत्रम्

जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ।
तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥१॥

दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् ।
नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम् ॥२॥

धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम् ।
कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम् ॥३॥

प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ॥४॥

देवानां च ऋषीणां च गुरुं काञ्चनसन्निभम् ।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥५॥

हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥६॥

नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्डसम्भूतं तं नमामि शनैश्चरम् ॥७॥

अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ।
सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम् ॥८॥

पलाशपुष्पसङ्काशं तारकाग्रहमस्तकम् ।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥९॥

इति व्यासमुखोद्गीतं यः पठेत् सुसमाहितः ।
दिवा वा यदि वा रात्रौ विघ्नशान्तिर्भविष्यति ॥१०॥

नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनम् ।
ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम् ॥११॥

ग्रहनक्षत्रजाः पीडास्तस्कराग्निसमुद्भवाः ।
ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः ॥१२॥

## १३. आदित्यहृदयस्तोत्रम्

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥१॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपगम्याब्रवीद्राममगस्त्यो भगवानृषिः ॥२॥

राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वारीन् वत्स समरे विजयिष्यसे ॥३॥

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपेन्नित्यमक्षयं परमं शिवम् ॥४॥

सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम् ॥५॥

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥६॥

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ।
एष देवासुरगणाँल्लोकान् पाति गभस्तिभिः ॥७॥

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमः सोमो ह्यपाम्पतिः ॥८॥

पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः ।
वायुर्वह्निः प्रजाप्राणा ऋतुकर्ता प्रभाकरः ॥९॥

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्णसदृशो भानुः स्वर्णरेता दिवाकरः ॥१०॥

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्तण्डअंशुमान् ॥११॥

हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः ।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ॥१२॥

व्योमनाथस्तमोभेदी ऋग्यजुः सामपारगः ।
घनवृष्टिरपां मित्रो विन्ध्यवीथी प्लवङ्गमः ॥१३॥

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥१४॥

नक्षत्रग्रहताराणामधिपो विश्वभावनः ।
तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते ॥१५॥

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ।
ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥१६॥

जयाय जयभद्राय हर्यश्वाय नमो नमः ।
नमो नमः सहस्रांशो आदित्याय नमो नमः ॥१७॥

नम उग्राय वीराय सारङ्गाय नमो नमः ।
नमः पद्मप्रबोधाय मार्ताण्डाय नमोऽस्तु ते ॥१८॥

ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥१९॥

तमोघ्नाय हिमघ्नाय शत्रुघ्नायाऽमितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥२०॥

तप्तचामीकराभाय वह्नये विश्वकर्मणे ।
नमस्तमोऽभिनिघ्नाय रवये लोकसाक्षिणे ॥२१॥

नाशयत्येष वै भूतं तदेव सृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥२२॥

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष चैवाग्निहोत्रं च फलं चैवाग्निहोतृणाम् ॥२३॥

वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ॥२४॥

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन्पुरुषः कश्चिन्नावसीदति राघव ॥२५॥

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसे ॥२६॥

अस्मिन्क्षणे महाबाहो रावणं त्वं वधिष्यसि ।
एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ॥२७॥.

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥२८॥

आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥२९॥

रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागतम् ।
सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥३०॥

अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसङ्क्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥३१॥

*॥ इति वाल्मीकीयरामायणेऽगस्त्यप्रोक्तमादित्यहृदयस्तोत्रं सम्पूर्णम् ॥*

## १४. यन्त्रोद्धारकहनूमत्स्तोत्रम्

नमामि दूतं रामस्य सुखदं च सुखरूपिणम् ।
पीनवृत्तमहाबाहुं सर्वशत्रुनिवारणम् ॥१॥

नानारत्नसमायुक्तकुण्डलादिविराजितम् ।
सर्वदाभीष्टदातारं सतां वै दृढमाहवे ॥२॥

वासिनं चक्रतीर्थस्य दक्षिणस्थगिरौ सदा ।
तुङ्गाम्भोदतरङ्गस्य वातेन परिशोभिते ॥३॥

नानादेशागतैः सद्भिः सेव्यमानं नृपोत्तमैः ।
धूपदीपादिनैवेद्यैः पञ्चखाद्यैश्च शक्तितः ॥४॥

भजामि श्रीहनूमन्तं हेमकान्तिसमप्रभम् ।
व्यासतीर्थयतीन्द्रेण पूजितं च विधानतः ॥५॥

त्रिवारं यः पठेन्नित्यं स्तोत्रं भक्त्या द्विजोत्तमः ।
वाञ्छितं लभतेऽभीक्ष्णं षण्मासाभ्यन्तरे खलु ॥६॥

पुत्रार्थी लभते पुत्रं यशोर्थी लभते यशः ।
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥७॥

सर्वथा मास्तु सन्देहो हरिः साक्षी जगत्पतिः ।
यः करोत्यत्र सन्देहं स याति नरकं ध्रुवम् ॥८॥

## ९५. श्रीदत्तात्रेयद्वादशनामस्तोत्रम्

*अस्य श्रीदत्तात्रेयद्वादशनामस्तोत्रमन्त्रस्य परमहंस ऋषिः । श्रीमद्-दत्तात्रेयपरमात्मा देवता। अनुष्टुप् छन्दः। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ।*

प्रथमस्तु महायोगिः द्वितीयः प्रभुरीश्वरः ।
तृतीयश्च त्रिमूर्तिश्च चतुर्थो ज्ञानसागरः ॥१॥

पञ्चमो ज्ञानविज्ञानः षष्ठः स्यात् सर्वमङ्गलः ।
सप्तमः पुण्डरीकाक्षः अष्टमो ज्ञानवल्लभः ॥२॥

नवमो देवदेवेशो दशमो नन्ददायकः ।
एकादशो महारुद्रो द्वादशः करुणाकरः ॥३॥

एवं द्वादशनामानि दत्तात्रेयमहामुनेः ।
मन्त्रराजमिदं ख्यातं सर्वपापहरं शुभम् ॥४॥

क्षयापस्मारकष्टादितापज्वरनिवारणम् ।
राजद्वारे पथे घोरे सङ्ग्रामे च जलान्तरे ॥५॥

गिरौ गुहान्तरेऽरण्ये व्याघ्रचोरभयं न हि ।
आवर्तनसहस्रेषु लभते वाञ्छितं फलम् ॥६॥

त्रिकालं यः पठेन्नित्यं मोक्षसिद्धिमवाप्नुयात् ।
दत्तात्रेयः सदा रक्षेद् दृशः सत्यं न संशयः ॥७॥

विद्यार्थी लभते विद्यां रोगी रोगात् प्रमुच्यते ।
अपुत्रो लभते पुत्रं धनार्थी लभते धनम् ॥८॥

अभार्यो लभते भार्यां सुखार्थी लभते सुखम् ।
मुच्यते सर्वपापेभ्यो सर्वदा विजयी भवेत् ॥९॥

*॥ इति व्यासविरचितं दत्तात्रेयद्वादशनामस्तोत्रम् ॥*

## १६. श्रीदत्तात्रेयस्तोत्रम्

जटाधरं पाण्डुराङ्गं शूलहस्तं कृपानिधिम् ।
सर्वरोगहरं देवं दत्तात्रेयमहं भजे ॥

अस्य श्रीदत्तात्रेयस्तोत्रमन्त्रस्य भगवान्नारद ऋषिः ।
अनुष्टुप् छन्दः श्रीदत्तः परमात्मा देवता ।
श्रीदत्तप्रीत्यर्थे जपे विनियोगः ॥

जगदुत्पत्तिकर्त्रे च स्थितिसंहारहेतवे ।
भवपाशविमुक्ताय दत्तात्रेय नमोऽस्तु ते ॥१॥

जराजन्मविनाशाय देहशुद्धिकराय च ।
दिगम्बर दयामूर्ते दत्तात्रेय नमोऽस्तु ते ॥२॥

कर्पूरकान्तिदेहाय ब्रह्ममूर्तिधराय च ।
वेदशास्त्रपरिज्ञाय दत्तात्रेय नमोऽस्तु ते ॥३॥

ह्रस्वदीर्घकृशस्थूलनामगोत्रविवर्जित ।
पञ्चभूतैकदीप्ताय दत्तात्रेय नमोऽस्तु ते ॥४॥

यज्ञभोक्त्रे च यज्ञाय यज्ञरूपधराय च ।
यज्ञप्रियाय सिद्धाय दत्तात्रेय नमोऽस्तु ते ॥५॥

आदौ ब्रह्मा मध्ये विष्णुरन्ते देवः सदाशिवः ।
मूर्तित्रयस्वरूपाय दत्तात्रेय नमोऽस्तु ते ॥६॥

भोगालयाय भोगाय योगयोग्याय धारिणे ।
जितेन्द्रियजितज्ञाय दत्तात्रेय नमोऽस्तु ते ॥७॥

दिगम्बराय दिव्याय दिव्यरूपधराय च ।
सदोदितपरब्रह्म दत्तात्रेय नमोऽस्तु ते ॥८॥

जम्बुद्वीपमहाक्षेत्रमातापुरनिवासिने ।
जयमान सतां देव दत्तात्रेय नमोऽस्तु ते ॥९॥

भिक्षाटनं गृहे ग्रामे पात्रं हेममयं करे ।
नानास्वादमयी भिक्षां दत्तात्रेय नमोऽस्तु ते ॥१०॥

ब्रह्मज्ञानमयी मुद्रा वस्त्रे चाकाशभूतले ।
प्रज्ञानघनबोधाय दत्तात्रेय नमोऽस्तु ते ॥११॥

अवधूत सदानन्द परब्रह्मस्वरूपिणे ।
विदेहदेहरूपाय दत्तात्रेय नमोऽस्तु ते ॥१२॥

सत्यरूप सदाचार सत्यधर्मपरायण ।
सत्याश्रय परोक्षाय दत्तात्रेय नमोऽस्तु ते ॥१३॥

शूलहस्त गदापाणे वनमालासुकन्धर ।
यज्ञसूत्रधर ब्रह्मन् दत्तात्रेय नमोऽस्तु ते ॥१४॥

क्षराक्षरस्वरूपाय परात्परतराय च ।
दत्तमुक्तिपरस्तोत्रं दत्तात्रेय नमोऽस्तु ते ॥१५॥

दत्तविद्याढ्यलक्ष्मीशदत्तस्वात्मस्वरूपिणे ।
गुणनिर्गुणरूपाय दत्तात्रेय नमोऽस्तु ते ॥१६॥

शत्रुनाशकरं स्तोत्रं ज्ञानविज्ञानदायकम् ।
सर्वपापं शमं याति दत्तात्रेय नमोऽस्तु ते ॥१७॥

इदं स्तोत्रं महद्दिव्यं दत्तप्रत्यक्षकारकम् ।
दत्तात्रेयप्रसादाच्च नारदेन प्रकीर्तितम् ॥१८॥

*॥ इति श्रीनारदपुराणे नारदविरचितं दत्तात्रेयस्तोत्रं सम्पूर्णम् ॥*

## १७. श्रीदत्तप्रार्थनाचतुष्कम्

समस्तदोषशोषणं स्वभक्तचित्ततोषणम्।
निजाश्रितप्रपोषणं यतीश्वराग्र्यभूषणम्।
त्रयीशिरोविभूषणं प्रदर्शितार्थदूषणम्।
भजेऽत्रिजं गतैषणं विभुं विभूतिभूषणम् ॥१॥

समस्तलोककारणं समस्तजीवधारणम्।
समस्तदुष्टमारणं कुबुद्धिशक्तिजारणम्।
भजद्भयाद्रिदारणं भजत्कुकर्मवारणम्।
हरिं स्वभक्ततारणं नमामि साधुचारणम् ॥२॥

नमाम्यहं मुदास्पदं निवारिताखिलाऽपदम्।
समस्तदुःखतापशं मुनीन्द्रवन्द्य ते पदम्।
यदश्रितान्तरामदं विहाय नित्यसम्मदम्।
प्रयान्ति नैव ते भिदं मुहुर्भजन्ति चाविदम् ॥३॥

प्रसीद सर्वचेतने प्रसीद बुद्धिचेतने ।
स्वभक्तहृन्निकेतने सदाम्ब दुःखशातने।
त्वमेव मे प्रसूर्मता त्वमेव मे प्रभो पिता।
त्वमेव मेऽखिले हितार्थदोऽखिलार्तितोऽविता ॥४॥

*इति श्रीमद्वासुदेवानन्दसरस्वतीविरचितम् श्रीदत्तात्रेयप्रार्थनाचतुष्कं सम्पूर्णम्।*

## १८. बिल्वाष्टकम्

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रयायुधम् ।
त्रिजन्मपापसंहारमेकबिल्वं शिवार्पणम् ॥१॥

त्रिशाखैर्बिल्वपत्रैश्च ह्यच्छिद्रैः कोमलैः शुभैः ।
शिवपूजां करिष्यामि ह्येकबिल्वं शिवार्पणम् ॥२॥

अखण्डबिल्वपत्रेण पूजिते नन्दिकेश्वरे ।
शुद्ध्यति सर्वपापेभ्यो ह्येकबिल्वं शिवार्पणम् ॥३॥

शालिग्रामशिलामेकां विप्राणां जातु अर्पयेत् ।
सोमयज्ञमहापुण्यमेकबिल्वं शिवार्पणम् ॥४॥

दन्तिकोटिसहस्राणि वाजपेयशतानि च ।
कोटिकन्यामहादानमेकबिल्वं शिवार्पणम् ॥५॥

लक्ष्म्यास्तनुत उत्पन्नं महादेवस्य च प्रियम् ।
बिल्ववृक्षं प्रयच्छामि ह्येकबिल्वं शिवार्पणम् ॥६॥

दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम् ।
अघोरपापसंहारमेकबिल्वं शिवार्पणम् ॥७॥

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।
अग्रतः शिवरूपाय ह्येकबिल्वं शिवार्पणम् ॥८॥

बिल्वाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
सर्वपापविनिर्मुक्तः शिवलोकमवाप्नुयात् ॥९॥

*॥ इति बिल्वाष्टकं सम्पूर्णम् ॥*

## ९९. साधनपञ्चकम्

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां
तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम् ।
पापौघः परिधूयतां भवसुखे दोषोऽनुसन्धीयताम्
आत्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥१॥

सङ्गः सत्सु विधीयतां भगवतो भक्तिर्दृढाधीयतां
शान्त्यादिः परिचीयतां दृढतरं कर्माशु सन्त्यज्यताम् ।
सद्विद्वानुपसर्प्यतां प्रतिदिनं तत्पादुका सेव्यतां
ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समाकर्ण्यताम् ॥२॥

वाक्यार्थश्च विचार्यतां श्रुतिशिरः पक्षः समाश्रीयतां
दुस्तर्कात्सुविरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम् ।
ब्रह्मास्मीति विभाव्यतामहरहर्गर्वः परित्यज्यतां
देहेऽहं मतिरुज्झ्यतां बुधजनैर्वादः परित्यज्यताम् ॥३॥

क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां
स्वाद्वन्नं न तु याच्यतां विधिवशात्प्राप्तेन सन्तुष्यताम् ।
शीतोष्णादि विषह्यतां न तु वृथा वाक्यं समुच्चार्यताम्
औदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यताम् ॥४॥

एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम् ।
प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्यतां
प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम् ॥५॥

यः श्लोकपञ्चकमिदं पठते मनुष्यः
सञ्चिन्तयत्यनुदिनं स्थिरतामुपेत्य ।
तस्याशु संसृतिदवानलतीव्रघोर-
तापः प्रशान्तिमुपयाति चितिप्रसादात् ॥६॥

*॥ इति श्रीमच्छङ्कराचार्यविरचितं साधनपञ्चकं सम्पूर्णम् ॥*

# १००. धन्याष्टकम्

तज्ज्ञानं प्रशमकरं यदिन्द्रियाणां
तज्ज्ञेयं यदुपनिषत्सु निश्चितार्थम् ।
ते धन्या भुवि परमार्थनिश्चितेहाः
शेषास्तु भ्रमनिलये परिभ्रमन्ति ॥१॥

आदौ विजित्य विषयान्मदमोहराग-
द्वेषादिशत्रुगणमाहृतयोगराज्याः ।
ज्ञात्वामृतं समनुभूय परात्मविद्या-
कान्तासुखं बतवन गृहे विचरन्ति धन्याः॥२॥

त्यक्त्वा गृहे रतिमधोगतिहेतुभूता-
मात्मेच्छयोपनिषदर्थरसं पिबन्तः ।
वीतस्पृहा विषयभोगपदे विरक्ता
धन्याश्चरन्ति विजनेषु विरक्तसङ्गाः ॥३॥

त्यक्त्वा ममाहमिति बन्धकरे पदे द्वे
मानावमानसदृशाः समदर्शिनश्च ।
कर्तारमन्यमवगम्य तदर्पितानि
कुर्वन्ति कर्मपरिपाकफलानि धन्याः ॥४॥

त्यक्त्वैषणात्रयमवेक्षितमोक्षमार्गा
भैक्षामृतेन परिकल्पितदेहयात्राः ।
ज्योतिः परात्परतरं परमात्मसञ्ज्ञं
धन्या द्विजा रहसि हृद्यवलोकयन्ति ॥५॥

नासन्न सन्न सदसन्न महन्न चाणु
न स्त्री पुमान्न च नपुंसकमेकबीजम् ।
यैर्ब्रह्म तत्समुपासितमेकचित्तैः
धन्या विरजेयुरितरे भवपाशबद्धाः ॥६॥

अज्ञानपङ्कपरिमग्नमपेतसारं
दुःखालयं मरणजन्मजरावसक्तम् ।
संसारबन्धनमनित्यमवेक्ष्य धन्या
ज्ञानासिना तदवशीर्य विनिश्चयन्ति ॥७॥

शान्तैरनन्यमतिभिर्मधुरस्वभावै-
रेकत्वनिश्चितमनोभिरपेतमोहैः ।
साकं वनेषु विदितात्मपदस्वरूपैः
तद्वस्तु सम्यगनिशं विमृशन्ति धन्याः ॥८॥

अहिमिव जनयोगं सर्वदा वर्जयेद्यः
कुणपमिव सुनारीं त्यक्तुकामो विरागी ।
विषमिव विषयान्यो मन्यमानो दुरन्तान्
जयति परमहंसो मुक्तिभावं समेति ॥९॥

सम्पूर्णं जगदेव नन्दनवनं सर्वेऽपि कल्पद्रुमाः
गाङ्गवारिसमस्तवारिनिवहाः पुण्याः समस्ताः क्रियाः ।
वाचः प्राकृतसंस्कृताः श्रुतिशिरो वाराणसी मेदिनी
सर्वावस्थितिरस्यवस्तुविषया दृष्टे परब्रह्मणि ॥१०॥

*॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य-*
*श्रीमच्छङ्कराचार्यविरचितं धन्याष्टकं सम्पूर्णम् ॥*

## १०१. संवित्प्रसादस्तोत्रम्

सर्वार्थदा सर्वजगत्प्रसूतिः सर्वेश्वरी सर्वभयापहन्त्री ।
सर्वोन्नता सर्वभूतान्तरस्था संविन्मयी मे भवतु प्रसन्ना ॥१॥

समस्तविघ्नौघविनाशकारिणी समस्तभक्तोद्धरणे विचक्षणा ।
समस्तसौन्दर्यविमर्शरूपिणी संविन्मयी मे भवतु प्रसन्ना ॥२॥

विद्या शिवाङ्कस्थितवामरूपा विशुद्धविज्ञानसुखैकदोग्ध्री ।
विक्षेपहन्त्री त्रिगुणातिरिक्ता संविन्मयी मे भवतु प्रसन्ना ॥३॥

अशेषवाग्जाड्यतमोपहन्त्री नवं नवं स्पष्टसुवाक्प्रदात्री ।
ममैव जिह्वाग्रसुरङ्गनर्तकी संविन्मयी मे भवतु प्रसन्ना ॥४॥

मातापिता त्वं गुरुः सद्गतिः श्रीस्त्वमेव सञ्जीवनहेतुभूता ।
अन्यं न मन्ये जगदेकनाथे त्वमेव संविन्मम देवि सर्वम् ॥५॥

## १०२. अष्टमूर्तिरक्षास्तोत्रम्

हे शर्व भूरूप पर्वतसुतेश
हे धर्म वृषवाह काञ्चीपुरीश ।
दववास सौगन्ध्य भुजगेन्द्रभूष
पृथ्वीश मां पाहि प्रथमाष्टमूर्ते ॥१॥

हे दोषमलजाड्यहर शैलजाप
हे जाम्बुकेशेश भव नीररूप ।
गङ्गार्द्र करुणार्द्र नित्याभिषिक्त
जललिङ्ग मां पाहि द्वितीयाष्टमूर्ते ॥२॥

हे रुद्र कालाग्निरूपाघनाशिन्
हे भस्मदिग्धाङ्ग मदनान्तकारिन् ।
अरुणाद्रिमूर्तेऽर्बुदशैलवासिन्
अनलेश मां पाहि तृतीयाष्टमूर्ते ॥३॥

हे मातरिश्वन् महाव्योमचारिन्
हे कालहस्तीश शक्तिप्रदायिन् ।
उग्र प्रमथनाथ योगीन्द्रसेव्य
पवनेश मां पाहि तुरीयाष्टमूर्ते ॥४॥

हे निष्कलाकाशसङ्काशदेह
हे चित्सभानाथ विश्वम्भरेश ।
शम्भो विभो भीमदहरप्रविष्ट
व्योमेश मां पाहि कृपयाष्टमूर्ते ॥५॥

हे भर्ग तरणेऽखिललोकसूत्र
हे द्वादशात्मन् श्रुतिमन्त्रगात्र ।
ईशान ज्योतिर्मयादित्यनेत्र
रविरूप मां पाहि महसाष्टमूर्ते ॥६॥

हे सोम सोमार्ध षोडशकलात्मन्
हे ताराकान्तस्थ शशिखण्डमौलिन् ।
स्वामिन् महादेव मानसविहारिन्
शशिरूप मां पाहि सुधयाष्टमूर्ते ॥७॥

हे विश्वयज्ञेश यजमानवेष
हे सर्वभूतात्मभूतप्रकाश ।
प्रथितः पशूनां पतिरेकईड्य
आत्मेश मां पाहि परमाष्टमूर्ते ॥८॥

परमात्मनः खः प्रथमः प्रसूतः
व्योमाच्च वायुर्जनितस्ततोऽग्निः ।
अनलाज्जलोद्भूतम् अद्भ्यस्तु धरणिः
सूर्येन्दुकलितान् सततं नमामि ॥९॥

दिव्याष्टमूर्तीन् सततं नमामि
संविन्मयान् तान् सततं नमामि ॥१०॥

# १०३. उपदेशसारम्

कर्तृराज्ञया प्राप्यते फलम् । कर्म किं परं कर्म तज्जडम् ॥१॥
कृतिमहोदधौ पतनकारणम् । फलमशाश्वतं गतिनिरोधकम् ॥२॥
ईश्वरार्पितं नेच्छया कृतम् । चित्तशोधकं मुक्तिसाधकम् ॥३॥
कायवाङ्मनः कार्यमुत्तमम् । पूजनं जपश्चिन्तनं क्रमात् ॥४॥
जगत् ईशधीयुक्तसेवनम् । अष्टमूर्तिभृद्देवपूजनम् ॥५॥
उत्तमस्तवादुच्चमन्दतः । चित्तजं जपध्यानमुत्तमम् ॥६॥
आज्यधारया स्रोतसा समम् । सरलचिन्तनं विरलतः परम् ॥७॥
भेदभावनात्सोऽहमित्यसौ । भावनाऽभिदा पावनी मता ॥८॥
भावशून्यसद्भावसुस्थितिः । भावनाबलाद्भक्तिरुत्तमा ॥९॥
हृत्स्थले मनः स्वस्थता क्रिया । भक्तियोगबोधाश्च निश्चितम् ॥१०॥
वायुरोधनाल्लीयते मनः । जालपक्षिवद्रोधसाधनम् ॥११॥
चित्तवायवश्चित्क्रियायुताः । शाखयोर्द्वयी शक्तिमूलिका ॥१२॥
लयविनाशने उभयरोधने । लयगतं पुनर्भवति नो मृतम् ॥१३॥
प्राणबन्धनाल्लीनमानसम् । एकचिन्तनान्नाशमेत्यदः ॥१४॥
नष्टमानसोत्कृष्टयोगिनः । कृत्यमस्ति किं स्वस्थितिं यतः ॥१५॥
दृश्यवारितं चित्तमात्मनः । चित्त्वदर्शनं तत्त्वदर्शनम् ॥१६॥
मानसं तु किं मार्गणे कृते । नैव मानसं मार्गआर्जवात् ॥१७॥
वृत्तयस्त्वहं वृत्तिमाश्रिताः । वृत्तयो मनो विद्ध्यहं मनः ॥१८॥
अहमयं कुतो भवति चिन्वतः । अयि पतत्यहं निजविचारणम् ॥१९॥
अहमि नाशभाज्यहमहन्तया । स्फुरति हृत्स्वयं परमपूर्णसत् ॥२०॥
इदमहं पदाऽभिख्यमन्वहम् । अहमि लीनकेऽप्यलयसत्तया ॥२१॥

विग्रहेन्द्रियप्राणधीतमः । नाहमेकसत्तज्जडं ह्यसत् ॥२२॥

सत्त्वभासिका चित्क्वेतरा । सत्तया हि चिच्चित्तया ह्यहम् ॥२३॥

ईशजीवयोर्वेषधीभिदा । सत्स्वभावतो वस्तु केवलम् ॥२४॥

वेषहानतः स्वात्मदर्शनम् । ईशदर्शनं स्वात्मरूपतः ॥२५॥

आत्मसंस्थितिः स्वात्मदर्शनम्। आत्मनिर्द्वयादात्मनिष्ठता ॥२६॥

ज्ञानवर्जिताऽज्ञानहीनचित् । ज्ञानमस्ति किं ज्ञातुमन्तरम् ॥२७॥

किं स्वरूपमित्यात्मदर्शने । अव्ययाऽभवाऽऽपूर्णचित्सुखम् ॥२८॥

बन्धमुक्त्यतीतं परं सुखम् । विन्दतीह जीवस्तु दैविकः ॥२९॥

अहमपेतकं निजविभानकम् । महदिपो रमणवागियम् ॥३०॥

*॥ इति रमणमहर्षिकृतम् उपदेशसारं सम्पूर्णम् ॥*



# भाग – २
# भजन सङ्ग्रह

## १०४. प्रार्थना

*(राग केदार)*

भवानीशंकर हे जगदीश्वर, तव पदि नम्र प्रणाम (२)
शरण आयल्यांति सारस्वत जन, दी आम्कां वरदान,
तव पदि नम्र प्रणाम ॥धृ॥

आदर्श जीवन धर्मपरिपालन ह्या ध्येयाक प्रेरणा
तरु-लता-सुम-फल-जल समान सार्थक करि जीवना
संघटन-सद्भाव कार्यांक तूंचि धैर्य दी दयाऽऽघना,
तव पदि नम्र प्रणाम ॥१॥

सद्योजात शंकरगुरुवरा, जन्मु हो आम्गेलो पावन करा
श्रद्धा-भक्ति-विरक्तिभावाने धर्तांति आम्मि तव चरणा
नवयुग निर्माण कोरुक आत्मबल दिंव्का हे कृपाघना,
तव पदि नम्र प्रणाम ॥२॥

## १०५. सुदिन सोमवार

आजि सुदिन सोमवार आला महादेव भावे पूजियला
धन्य धन्य पूजक पूजा करी पूज्य पूजकांसी तेथे कैंची उरी ॥१॥

प्रेमजल करुनी अभिषेक वासना वासनेते मसियले देख
विद्या-अविद्येची विभूति केली महादेवावरी उधळली ॥२॥

मनगन्ध गाळुनी उगाळिले महादेवासी लेपन केले
तत्त्व मिळुनी केले तिळाक्षत निजि वाहिले विश्वि विश्वनाथ ॥३॥

त्रिगुण त्रिदळी केला बिल्व सद्भाषा वाहिले फूल
ब्रह्माग्नी चेतला आपेआप दृश्यादृश्य जाळिला धूप ॥४॥

मुळी एकवीण दूजे नाही एकारती सहज जाहली
कृपा तृप्तीचे उगविले बोन महादेवासी झाले भोजन ॥५॥

आता आवडीचा अर्पियला विडा देह दक्षिणा दाम रोकडा
पंचप्राण पंचारती केली महादेवासी ओवाळिली ॥६॥

पाउला पाउला होईल प्रदक्षिणा सुषुप्तिचा नमस्कार झाला
सच्चिदानन्द सद्गुरु महादेवा नित्यानंदाचा पुरविला भावा ॥७॥

## १०६. शिवस्तुतिः

गङ्गाधर चन्द्रचूड । जगन्मङ्गल विश्वनीड ।
शिवशिवभवभवशरणम् । मम भवतु सदा तव स्मरणम् ॥१॥

कैलासाचलवास । शिवकर । पुरहर दरहास ।
शिवशिवभवभवशरणम् । मम भवतु सदा तव स्मरणम् ॥२॥

भस्मोद्धूलित देह । शम्भो । परम पुरुष वृषवाह ।
शिवशिवभवभवशरणम् । मम भवतु सदा तव स्मरणम् ॥३॥

पञ्चानन फणिभूष । हर । शिव शङ्कर मुनिवेष ।
शिवशिवभवभवशरणम् । मम भवतु सदा तव स्मरणम् ॥४॥

आनन्दनटनविलोल । शिवसच्चिदानन्द विगलितखेल ।
शिवशिवभवभवशरणम् । मम भवतु सदा तव स्मरणम् ॥५॥

नवव्याकरणस्वभाव । शिव । नारायणतीर्थ देव ।
शिवशिवभवभवशरणम् । मम भवतु सदा तव स्मरणम् ॥६॥

# १०७. श्रीगुरुपादुकाष्टक

ज्या संगतीनेच विराग झाला मनोदरीचा जडभास गेला ।
साक्षात् परात्मा मज भेटवीला विसरू कसा मी गुरुपादुकाला ॥१॥

सद्योगपंथे घरि आणियेले अंगेच माते परब्रह्म केले ।
प्रचंड तो बोधरवी उदेला विसरू कसा मी गुरुपादुकाला ॥२॥

चराचरी व्यापकता जयाची अखंड भेटी मजला तयाची ।
परंपदी संगम पूर्ण झाला विसरू कसा मी गुरुपादुकाला ॥३॥

जो सर्वदा गुप्तजनांत वागे प्रपन्न भक्तां निजबोध सांगे ।
सद्भक्तिभावाकरितां भुकेला विसरू कसा मी गुरुपादुकाला ॥४॥

अनंत माझे अपराध कोटी नाणी मनी घालुनि सर्व पोटी ।
प्रबोधिता त्या श्रम फार झाला विसरू कसा मी गुरुपादुकाला ॥५॥

काही मला सेवनही न झाले तथापि तेणे मज उद्धरीले ।
आता तरी अर्पिन प्राण त्याला विसरू कसा मी गुरुपादुकाला ॥६॥

माझा अहंभाव असे शरीरी तथापि तो सद्गुरु अंगिकारी ।
नाही मनी अल्पविकार झाला विसरू कसा मी गुरुपादुकाला ॥७॥

आता कसा मी उपकार फेडू हा देह ओवाळुनि दूर सोडू ।
म्या एकभावे प्रणिपात केला विसरू कसा मी गुरुपादुकाला ॥८॥

जया वर्णिता वर्णिता वेदवाणी म्हणे 'नेति नेति'ति लाजे दुरूनी ।
नव्हे अंत ना पार ज्याच्या रुपाला विसरू कसा मी गुरुपादुकाला ॥९॥

जो साधुचा अंकित जीव झाला त्याचा असे भार निरंजनाला ।
नारायणाचा भ्रम दूर केला विसरू कसा मी गुरुपादुकाला ॥१०॥

## १०८. गुरुनामावलि संकीर्तन

परिज्ञानाश्रम श्रीगुरुशंकर परिज्ञानाश्रम शंकर सद्गुरु
केशव वामन कृष्ण पांडुरंग आनंद परिज्ञान गुरु
सद्योजात शंकरसद्गुरु ॥

लक्ष्मीधर श्रीरमावल्लभ नरहरि राघव कृष्ण गुरु
ईश्वरानन्दगिरियतिप्रसादित सद्योजात शंकरसद्गुरु ॥

जय चित्रापुर भवानीशंकर परमपरात्पर शिव हरनाथ
जय श्रीयतिवर करुणासागर आनंदाश्रम सद्गुरुनाथ
जय श्री यतिवर करुणासागर परिज्ञानाश्रम श्रीगुरुनाथ
जय श्रीयतिवर करुणासागर सद्योजात शंकर गुरुनाथ ॥

## १०९. श्रीगणेश विघ्नेश्वर

श्रीगणेश विघ्नेश्वर नमन प्रथम तुम्हारे चरण ।
लंबोदर शंकरसुत पार्वतीतनय नमोऽस्तु ॥धृ॥

गणनायक विघ्नहरन । हरसुत तव पद सेऽऽवन ।
अभयदान सतत करो । प्रार्थना यही हे गजानन ॥

## ११०. पार्वतिप्रियनंदना

पार्वतीप्रियनंदना गजानन । गौरीशनंदन गजानन ।
गजानन हे गजानन ॥
विघ्नविनाशक गजानन । गजानन हे गजानन ॥
बुद्धिप्रदायक गजानन । गजानन हे गजानन ॥
सिद्धिविनायक गजानन । गजानन हे गजानन ॥

## १११. हे सरस्वति नमन तुझ्या

हे सरस्वति नमन तुझ्या पदकमळी (२) ॥धृ॥

तव ठायी वृत्ति रमली । विश्वाची तू चालक शक्ति ।
असशी तू प्रेमळ मूर्ति । देवादिक ते तुजला नमिति ॥१॥

विद्येचा छंद ही ज्याला । तो नमिला देवी तुजला ।
तव कृपाकटाक्ष ही पडला । तत्कंठी विद्या बसली ॥२॥

चौसष्ट कला विद्येला । शारदा गुणी गुंफुनी माळा ।
गणराजा तो अर्पितो तुजला । गुण गाता रसना थकली ॥३॥

## ११२. नमो शारदा नमो शारदा

नमो शारदा, नमो शारदा, नमो शारदा माता ॥
हे विद्याबुद्धिप्रदायिनी । मा वीणापुस्तकधारिणी ॥

भवभंजनि मनरंजनि । नमो देवि जगन्माता ।
जगदीश्वरी, जगदीश्वरी, जगदीश्वरी माता ॥

## ११३. तारकमन्त्र गुरुचा

तारकमन्त्र गुरुचा गुरुचा । ॐ नमः शिवाय तरणोपाय ॥ धृ॥

नश्वर स्थूळ प्रपंच अवघा । न कळति अंतर काय ।
मन मात्रादि बंध साधन । भुलणे त्यासि उपाय (२) ॥१॥

जीव-शिव भेद मायाकल्पित । शोधी त्वरित निज ठाय ।
वाङ्मनातीत स्वरूप तुझे । ध्याता ध्यान ध्येय (२) ॥२॥

एकपणेवीण एक परात्पर । दत्त गुरु गुण गाय ॥३॥

नमन करूं मैं गुरुचरणं । गुरुचरणं सद्गुरुचरणं ।
प्रणवानंदा आनंदकंदा । श्रीगुरु ममगुरु सच्चिदानंदा ॥

## ११४. निरंजनि देवि भवानि

निरंजनि देवि भवानि । जगज्जननि आनंददायिनि ।
दुर्गा लक्ष्मी नारायणि । देवि नारायणि ।
श्रीकमलासन हंसवाहिनी ।

## ११५.आदिशक्ति हे अनंतरूपिणि

आदिशक्ति हे अनंतरूपिणी । अंबाभवानी जय माता ।
जय माता श्री जय माता ।
विश्व सर्वेश्वरी क्लेशनिवारिणी । ईश्वरी पार्वती जय माता (२)
भवभयहारिणी दुःखनिवारिणी । दुर्गतिहारिणी जय माता (२)
नमो नमो जय ओंकाररूपिणी । शान्तादुर्गा जय माता (२)

## ११६. अंबाबाई तूं त्रैलोक्याची आई

अंबाबाई तूं त्रैलोक्याची आई ॥धृ॥

काय वर्णू तुझी नवाई । तूच तुळजापुर तुकाई ।
तूच अमरांची अमराई । तुझिया भक्तांघरी (२)
नोंबत घांगड घाई ॥१॥

तूंची मत्स्याई कूर्माई । वराह नरसिंह वामनाई ।
परशुराम राम कृष्णाई । नाना रूपे धरिसी (२)
तूची बौध कलंकाई ॥२॥

वंदू मूळपीठ हे माझी । सर्वा व्यापक सर्वांठायी ।
नमन करितो चामुंडाई । आपुल्या दासावरी (२)
करी गे कृपेची शीतल छाई ॥३॥

संकट परिहारार्थ समयी । सुरवर आराधती तव पायी।
म्हणविती देवा माझी ते ही । ब्रह्मा विष्णु मुकुट काढुनी (२)
मस्तक ठेविती पायी ॥४॥

एवढी थोरी तुझी अगाई । महाकाळी तूंची जोगाई ।
होऊनी शांकभरी आई । पालन करिसी अमृतेश्वरी (२)
निज किंकर दुर्गाई ॥५॥

## ११७. सुंदरे गुणमंदिरे करुणाकरे

सुंदरे गुणमंदिरे करुणाकरे कमलोद्भवे ।
सिद्धचारणपूजिते जनवंदिते महावैष्णवी ॥

त्राहि वो मज त्राहि वो मज त्राहि वो महालक्षुमि ।
हेमवाहन रत्नकोंदण ते सिंहासन आसनी ॥धृ॥

कुंकुमागरु कस्तुरि प्रति आदरे तुज चर्चिति ।
इन्द्र चन्द्र महेन्द्र नारद पादपंकज अर्चिति ॥

एक एक विचित्र माणिक जोडिले मुकुटावरि ।
त्यांसि देखुनि लोपला रवि चालिला गगनोदरि ॥

कुंडले श्रवणी शशी रवि मंडलासम वर्तुळे ।
बोलता सुरनायका वरि हालताति चंचळे ॥

कंचुकी कुचमंडळावरि हार चंपक रूळति ।
पारिजातक शेवंत्या बट मोगऱ्या आणि मालति ॥

पिवळा पट तो कटितटि वेष्टिला बरवे परि ।
सौदामिनीहुनि तेज अधिक शोभते हृदयावरि ॥

कामुकावरि मन्मथे शर सज्जिले तैशा निऱ्या।
गर्जति पदपंकजे किति नूपुरे आणि घागऱ्या ॥

नागवल्य सुवल्य कर्पुर दिव्य तांबुल अर्पिति ।
देहि गे आरक्त होउनि तुजलागि समर्पिति ॥

कोटि तेत्तिस देवतां सह घेवुनि विंजण करि ।
चामरे चिरपल्लवे तुज ढाळिति परमेश्वरि ॥

निर्जरि तुज पूजिले बहु शोभसि कमळावरि ।
काय वर्णू लीला तुझी परि लाज हो मम वैखरि ॥

नाम अमृत दे निरंतर योगिया शुक ज्ञानिसि ।
जोडुनी कर विनवितो तुज, पाव गे कुलदेवते ॥

संकटी तुज वांचुनि मज कोण रक्षील अंबिके ।
रंगकेशव प्रार्थितो, मज पाव गे जगदंबिके ॥

## ११८. कुंकुम वाहिले प्रेमे आई

कुंकुम वाहिले प्रेमे आई करी तू स्वीकार ।
नमन माझे अंबाबाई लवुनी त्रिवार ॥धृ॥

अष्टभुजा सिंहवाहिनी माता । क्रोधे भरुनी खड्ग धरी हाता ।
करी दुष्टांचा संहार । नमन माझे अंबाबाई लवुनी त्रिवार ॥१॥

वैभव त्यजिले वैकुंठेश्वर । वरिले त्वा निजवर शिवशंकर ।
स्तविति ऋषि वारंवार । नमन माझे अंबाबाई लवुनी त्रिवार ॥२॥

महाशक्ति शिव तुजविण उणा । मुक्त नसे जगदीश ही ऋणा ।
पुत्र तुझा गणराज । नमन माझे अंबाबाई लवुनी त्रिवार ॥।३॥

## ११९. श्रीगुरुपरंपरा की जय हो

श्रीगुरुपरंपरा की जय हो । जय हो जय हो गुरु की जय हो ॥धृ॥

आदिपरिज्ञानाश्रम जय हो । शंकराश्रम गुरुदेव की जय हो ।
द्वितीय परिज्ञानाश्रम जय हो । शंकराश्रम मुनिवर की जय हो ॥१॥

केशवाश्रम गुरु की जय हो। वामनाश्रम सद्गुरु की जय हो ।
कृष्णाश्रम यतिवर की जय हो। जय हो जय हो गुरु की जय हो ॥२॥

पांडुरंगाश्रम गुरु की जय हो । आनंदाश्रम प्रभु की जय हो ।
तृतीय परिज्ञानाश्रम जय हो । सद्योजात शंकराश्रम जय हो ॥३॥

## १२०. भाग्यदा लक्ष्मी बारम्मा

भाग्यदा लक्ष्मी बारम्मा । नम्मम्मा ।
नी सौभाग्यदा लक्ष्मी बारम्मा ॥धृ॥

गेज्जेय काल्गळ नादव केळुत ।
हेज्जेय मेले हेज्जेयनिक्कुत ।
सज्जनसाधु पूजेय वेळ्यके ।
मज्जिगेयोळगिन बेण्णेयंते ॥१॥

संख्ये इल्लद भाग्यव कोट्टु ।
कंकण कैया तिरुहुत बारे ।
कुंकुमांकिते पंकजलोचने ।
वेंकटरमणन पट्टद राणिये ॥२॥

कनकवृष्टिय गरेवुत बारे ।
मनके मनवा सिद्धिय तोरे ।
दिनकर कोटि तेजदि मेरेयुव ।
जनकरायन कुमारी बारे ॥३॥

अत्तित्तगलदे भक्तर मनेयलि ।
नित्य महोत्सव नित्य सुमंगल ।
सत्यके तोरुव सज्जनरुगळिगे ।
चित्तके होळेव पुत्तळिगोंबे ॥४॥

सक्करे हाला कालुवे हरिसि ।
शुक्रवारदा पूजेय वेळेगे ।
अक्करेयिंदलि अळगिरिरंगन ।
पुरंदरविठलन पट्टद राणिये ॥५॥

## १२१. कुमुदनिभलोचनेगे

राग – सारंग

कुमुदनिभलोचनेगे कामहरनायकिगे
विमलकोमलगात्रि शर्वाणिगे
अमितगुणसंपन्न अखिलांडनायकिगे
द्युमणिशतकोटितेजोराशिगे ॥
जय मंगलं सदा शुभमंगलं ॥१॥

गिरिराजकुवरिगे सुरराजवंदितेगे
सरसिजोद्भवनमिते शुभचरितेगे
दुरुळशुंभनिशुंभ दैत्यापहारिणिगे
हरिणांकनिभवदने कल्याणिगे ॥
जय मंगलं सदा शुभमंगलं ॥२॥

धरेयोळुत्तमवेनिप कुटजाद्रिवासिनिगे
गुरुचिदानंदवंदित मातेगे
शरजन्ममातेगे शंकरनप्रीतेगे
हरियनेरि मेरेव मूकांबेगे, कोल्लूर मूकांबेगे ॥
जय मंगलं सदा शुभमंगलं ॥३॥

## १२२. देवीपर अष्टक

नमो भक्तसुरतरुलते देवि ललिते ।
त्रिपुर सुन्दरि कृपापाङ्गवलिते
नमो भक्तसुरतरुलते देवि ललिते ॥धृ॥

चन्द्रचूडप्रिये चन्द्रतिलकालके ।
चन्द्रमुखि चन्द्रिकामन्दहासे ॥
कुन्द-सुन्दर रदने बन्धु जीवाधरे ।
कोटि विद्युल्लतावद्विभासे ॥ नमो ॥१॥

अन्तरानन्त नवरत्न चित्रासना ।
युत सुधा सिन्धुमध्यावकाशे ।
सुरभिसुरतरु पवन नव नवोत्सव मणि ।
द्वीपनीपोपवन भवन वासे ॥ नमो ॥२॥

शरदलिते कमलकलिकोद्गलिते ।
मदगलिते विलसदलिलिततलोचन विलासे ।
अधर रागारुणोदय विजितदैत्य गुरु ।
रुचिरुचिर मौक्तिकोल्लसितनासे ॥ नमो ॥३॥

सर्वपूर्वा जयति मङ्गलाख्यापि वा-
प्यङ्गमङ्गलमिदं स्वप्रकाशे ।
दीपकृतमस्तु चिद्रत्नदीपकसखे ।
सबाह्याभ्यन्तरे कालिदासे ॥ नमो ॥४॥

## १२३. कृष्णपर अष्टक

पायि सिद्ध पादुका वासुदेवा । हाति काठी साधका वासुदेवा ।
गात गात नाचत वेणुनाद वाजत ॥ वासुदेवा हरि वासुदेवा हरि वासुदेवा॥१॥

माथा मोरपिच्छ टोपि गा वासुदेवा । सभोंवती गोपी त्या वासुदेवा ।
कानी कुंडलाचे तेज रवि शशि लोपे गा ॥ वासुदेवा हरि वासुदेवा
हरि वासुदेवा ॥२॥

भाळीं केशर निर्मळ वासुदेवा । लाजे डोळियासि कमळ वासुदेवा ।
शोभे नासिक सरळ हिरे दांत ओठ अमळ ॥ वासुदेवा हरि वासुदेवा
हरि वासुदेवा ॥३॥

गळा वैजयंती माळ गा वासुदेवा। बाहि बाहुवट ढाळ गा वासुदेवा ।
हृदयीपदक महा मुक्तांचा झळाळ गा॥ वासुदेवा हरि वासुदेवा
हरि वासुदेवा ॥४॥

कासे पीतांबर झळकत वासुदेवा । जेवि मेघविजू तळपत वासुदेवा ।
नाद मेखळेचा फार गा चित्तसार आकळत ॥ वासुदेवा हरि वासुदेवा
हरि वासुदेवा ॥५॥

गाजे ब्रीदावळि पायि गा वासुदेवा । उभा राहे ठायि गा वासुदेवा ।
राज त्रिभंगि सावळा लक्ष्य लाविताति गायी गा ॥
वासुदेवा हरि वासुदेवा हरि वासुदेवा ॥६॥

दृश्य न देखे मी अंध गा वासुदेवा । मुखी वासुदेव छंद गा वासुदेवा ।
करी धरुनि वागवि मज नंदाचा नंद गा ॥ वासुदेवा हरि वासुदेवा
हरि वासुदेवा ॥७॥

संत सनकादिक नाचती वासुदेवा । पहा ब्रह्मानंदे राजती वासुदेवा ।
श्रीरमावल्लभदास गा प्रेमे फार माजती ॥ वासुदेवा हरि वासुदेवा
हरि वासुदेवा ॥८॥

## १२४. श्रीपादाष्टक

| | | |
|---|---|---|
| श्रीपादाष्टक गाईन आतां । | परमहंस गुरु ध्याइन | ॥प॥ |
| प्रथमारंभी परिज्ञानाश्रम । | सततपदाब्ज मी वंदिन | ॥१॥ |
| द्वितीय स्वयंभू शंकरगुरुवर । | यति मनोहरां पाहिन | ॥२॥ |
| तृतीय परिज्ञानाश्रम योगी । | अति समर्था ध्यायिन | ॥३॥ |
| चातुर्थाश्रम शंकर मुनिवर । | चतुरयोगेश्वर वंदिन | ॥४॥ |
| गुरु हे पंचम केशवाश्रम । | परम सत्कीर्ती ऐकेन | ॥५॥ |
| षष्ठाश्रम मनोभीष्ट देणारे । | श्रेष्ठ सद्गुरु वामन | ॥६॥ |
| सप्तम परम श्रीकृष्णाश्रम । | गुप्त पदाब्जि वसे मन | ॥७॥ |
| अष्टमाश्रम इष्ट देणारे । | श्रेष्ठ सद्गुरु वंदिन | ॥८॥ |
| दंडधारि गुरु पांडुरंग हे । | चंडदुरित करि खंडण | ॥९॥ |
| सुंदरमूर्ति त्रिभव बंधहर । | आनंदाश्रम पाहिन | ॥१०॥ |
| दशम सद्गुरु परिज्ञानाश्रम । | सुंदरयतिवरां वंदिन | ॥११॥ |
| सद्योजात शंकराश्रम । | एकादश गुरु पूजिन | ॥१२॥ |
| वरचित्रापुर भवानीशंकर । | गुरुपारंपर्य पावन | ॥१३॥ |

## १२५. गुरु महाराज गुरु जय जय

गुरु महाराज गुरु जय जय परब्रह्म सद्गुरु ॥धृ॥

परिज्ञानसद्गुरु जय जय शंकर सद्गुरु । (२)
गुरु महाराज गुरु जय जय परब्रह्म सद्गुरु ॥

केशवसद्गुरु जय जय वामन सद्गुरु ।
गुरु महाराज गुरु जय जय परब्रह्म सद्गुरु ॥

कृष्णाश्रमसद्गुरु जय जय पांडुरंग सद्गुरु ।
गुरु महाराज गुरु जय जय परब्रह्म सद्गुरु ॥

आनंदसद्गुरु जय जय परिज्ञान सद्गुरु ।
गुरु महाराज गुरु जय जय परब्रह्म सद्गुरु ॥

सद्योजात शंकराश्रम स्वामी सद्गुरुवरु ।
गुरु महाराज गुरु जय जय परब्रह्म सद्गुरु ॥

## १२६. सद्गुरुनाथ तारय

सद्गुरुनाथ तारय तारय भवसिन्धौ पतितम् ॥पल्ल॥
चित्तजमत्तगजेन्द्रविचोदन कलुषीकृतस्वान्तम् ।
वारय मां प्रविशन्तं सहसा विषयमनाक्रान्तम्
जाया धनसुत गेहादिष्वति ममताविभ्रान्तम् ॥१॥

न कामये त्वा भवविभवं न च वैषयिकानन्दम् ।
न द्रविणं न च राज्यं पुनरह इन्द्रपदानन्दम् ॥
पीत्वा भवभयतारकतवपदपङ्कजमकरन्दम् ।
यद्गत्वा न निवर्तन्ते तद्गन्ता स्वच्छन्दम् ॥२॥

दण्डकमण्डलुमण्डितवरकर खण्डय भवबन्धम् ।
गन्धाब्वक्षत फलकुसुमादिभिरर्चज्जनवृन्दम् ॥
अज्ञानान्धतमोपनुदं तव पाटल रुचिकान्तम् ।
भट्टोत्तरपद मङ्गीशाख्यः स्तोम्यङ्घ्र्यरविन्दम् ॥३॥

## १२७. नैवेद्य आरती

मनोभाव जाणुनि माझा । सगुणरूप धरिले वोजा ।
पाहुणा सद्गुरु राजा । आला वो माय ॥१॥

प्रथम अंतःकरण जाण । चित्तबुद्धि आणि मन ।
चोखाळुनि आसन । स्वामींसि केले ॥२॥

अनन्य आवडीचे जळ । प्रक्षाळिले चरण कमळ ।
वासना समूळ । चंदन लावी ॥३॥

अहं जाळियला धूप । सद्भाव उजळीला दीप ।
पंचप्राण हे अपूप । नैवेद्य केला ॥४॥

रजतम सांडुनि दोन्ही । विडा दिला सत्त्व गुणी ।
स्वानुभवे रंगोनि । सुरंग दावी ॥५॥

एका जनार्दनी पूजा । देव भक्त नाही दूजा ।
अवघाचि सद्गुरु राजा । होवोनि ठेला ॥६॥

## १२८. कर्पूर आरती

धूप दीप झाला आता कर्पूर आरती, आता कर्पूर आरती ।
रत्नसिंहासनी बैसली सद्गुरुमूर्ति, माझी जगद्गुरु मूर्ति ॥धृ॥

कर्पूरवडिसम मानस माझे निर्मल राहू दे, देवा निर्मल राहू दे ।
कर्पूरासम भावभक्तिचा सुगंध वाहू दे, देवा सुगंध वाहू दे ॥१॥

कर्पूराची लावुन ज्योति पाहिन तव मूर्ति, देवा पाहिन तव मूर्ति ।
कर्पूरासम उडुन जाऊ दे माझी अहंबुद्धि, देवा माझी अहंबुद्धि ॥२॥

ध्यान कळेना ज्ञान कळेना, ना कळे कांही, देवा ना कळे कांहीं।
शब्दरूपी माळा गुंफुनी वाहते पायी, देवा वाहते पायी ॥३॥

मुखी नाम नेत्री ध्यान हृदयी तव मूर्ति, देवा हृदयी तव मूर्ति ।
वंदन करुनी मागतसे मज देई पराभक्ति, देवा देई पराभक्ति ॥४॥

## १२९. मंगलारती

मंगलारती करीन भावे सद्गुरुरायासी ।
माझ्या सद्गुरु पतितपावन आनंदाश्रम सद्गुरुसी ।
परिज्ञानाश्रम श्रीगुरुसी, सद्योजात शंकरगुरुसी ॥धृ॥

विश्वव्यापका दीनदयाळा तारक तू होसी ।
सत्त्वरजतम माया निरसुनि दैवी नटलासी ।
धाव रे पाव रे करुणाघन मूर्ति ॥१॥

चिन्मयमूर्ति चित्सुखदाता भवभय हरलासी ।
उन्मनि सुख हे दाखवि जगता निजपदि रमलासी
तारका त्र्यंबका सुरमुनिवरदासी ॥२॥

भक्तवत्सला करुणासागरा तारी दीनासी ।
निशिदिनि नमितो तव पदकमले चित्रापुरेश तुजसी
धाव रे पाव रे करुणाघन मूर्ति ॥३॥

## १३०. सद्गुरु आरती

आरती गुरुराया ओवाळितो तव पाया ।
समर्थ तू श्रेष्ठ कृतार्थ करी काया ॥धृ॥

ब्रह्मा विष्णु शंकर हे तुझेची अवतार ।
जगासी चालविता तूचि एक साचार ॥१॥

सर्वांच्या अंतर्यामी नित्य वसतोसि स्वामी ।
भक्त अंतरी प्रगटसी सदा उभा तत्कामी ।

सगुण आणि निर्गुण विवेके दिसती अभिन्न ।
कैवल्यासी खरी बाणली गुरुकृपे हीच खूण ॥२॥

## १३१. श्रीमद्गुरु यतिवर आनन्दम्

श्रीमद्गुरु यतिवर आनन्दं श्रीमद्गुरु करुणाकरम् ।
दीनबन्धु त्रैमूर्तिरूपिणम् । भक्ततोषकं मङ्गलम् ॥धृ॥

भक्तजनवाञ्छितफलदायक । श्रीशरूपिणं मङ्गलम् ।
सकलजनोद्धारक यतिवर्यम् । इष्टानन्दप्रदायकम् ॥१॥

अधिपति सारस्वतजनवन्द्यम् । श्रीचित्रापुरमठाधिपम् ।
आनन्दमानन्दकरं तम् । आनन्दाश्रमयोगिनम् ।
परिज्ञानाश्रमयोगिनम् । सद्योजात शङ्कराश्रमम् ॥२॥

श्रीवल्यामिह राजित दैवत । भवानीशङ्करप्रसादितम् ।
'सुधातनय' गेयं तं सम्यक् । भक्त्या च पदमङ्गलम् ॥३॥

## १३२. तुझे नाम गाईन वेळोवेळा

तुझे नाम गाईन वेळोवेळा । तुझे रूप पाहीन निज डोळा ।
तुझ्या चरणी गुंतला माझा हेतु । तुझी मूर्ति कोंदली हृदयांत ।
तुझे ध्यान लागले अंतर्यामी । तुझा विसर न पडो आम्हां स्वामी ।
अनाथबंधु करुणासिंधु देवा । म्हणे केशव करीन चरणसेवा ॥

## १३३. घालिन लोटांगण वंदिन चरण

घालिन लोटांगण वंदिन चरण डोळ्यांनीं पाहीन रूप तुझे ।
प्रेमे आलिंगिन आनंदे पूजिन भावे ओवाळीन म्हणे नामा ॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिस्वभावात् ।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ॥

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं भजे ।
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं श्रीरामचन्द्रं भजे ॥

हरे राम हरे राम राम राम हरे हरे ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥

## १३४. सदा सर्वदा योग तूझा घडावा

सदा सर्वदा योग तूझा घडावा
तुझे कारणी देह माझा पडावा ।
उपेक्षू नको गूणवंता अनंता
रघूनायका मागणे हेचि आता ॥१॥

उपासनेला दृढ चालवावे
भूदेव संतांसी सदा लवावे ।
सत्कर्मयोगे वय घालवावे
सर्वांमुखी मंगल बोलवावे ॥२॥

समर्थांचिया सेवका वक्र पाहे
असा सर्वभूमंडळी कोण आहे ।
जयाची लिला वर्णिती लोक तीन्ही
नुपेक्षी कदा रामदासाभिमानी ॥३॥

सदा चक्रवाकासी मार्तंड जैसा
उडी घालितो संकटी स्वामी तैसा ।
हरीभक्तिचा घाव गाजे निशाणी
नुपेक्षी कदा रामदासाभिमानी ॥४॥

ज्या ज्या स्थळी हे मन जाय माझे
त्या त्या स्थळी हे निजरूप तुझे ।
मी ठेवितो मस्तक ज्या ठिकाणी
तेथे तुझे सद्गुरुपाय दोन्ही ॥५॥

*(जय जय गुरुदेव दत्त)*

## १३५. शान्तिपाठः

हरिः ॐ

असतो मा सद्गमय ।
तमसो मा ज्योतिर्गमय ।
मृत्योर्मा अमृतं गमय ॥

हरिः ॐ

शान्तिः शान्तिः शान्तिः ॥



# भाग – ३

# देवतापूजनविधि



श्रीगुरुपूजनम्

# १३६. देवीअनुष्ठानम्

१) आचमनम्-

ॐ ऐं आत्मतत्त्वं शोधयामि नमः स्वाहा ।
ॐ ह्रीं विद्यातत्त्वं शोधयामि नमः स्वाहा ।
ॐ क्लीं शिवतत्त्वं शोधयामि नमः स्वाहा ।
ॐ ऐं ह्रीं क्लीं सर्वतत्त्वं शोधयामि नमः स्वाहा ।

२) प्राणायामः-

३) आत्मप्रोक्षणम्-

ॐ अपवित्रः पवित्रो वा सर्वाऽवस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

४) आसनशुद्धिः-

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

५) दिग्बन्धः

ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

६)सङ्कल्पः-

अस्मद्मठस्य मठीयसमाजस्य च अभिवृद्ध्यर्थं गुरुसेवायां निरतानां साधकानां सेवकवर्गाणां च कार्येषु शत्रुत्वस्वरूपीप्रत्यूहविनाशार्थं भगवतीजगदम्बाप्रसादेन उत्तरोत्तरअभिवृद्धिद्वारा सद्बुद्धिस्थिरता-पूर्वकशान्तिसमाधानलाभार्थं सपरिवारश्रीजगदम्बादेवताप्रीत्यर्थं गुर्वनुज्ञया प्रेरिताः वयं देवीमन्त्रजपअनुष्ठानाख्यं कर्म करिष्यामः ॥

| A | B | C | B | A |
|---|---|---|---|---|
| २८ | २८ | १०८ | २८ | २८ |

A) सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते।

B) शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च।।

C) सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥

समर्पणम्-

गुह्यातिगुह्यगोप्त्रि त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥

# १३७. पूजा–पूर्वाङ्गम्

आचमनम्

ॐ ऐं आत्मतत्त्वं शोधयामि नमः स्वाहा ।
ॐ ह्रीं विद्यातत्त्वं शोधयामि नमः स्वाहा ।
ॐ क्लीं शिवतत्त्वं शोधयामि नमः स्वाहा ।
ॐ ऐं ह्रीं क्लीं सर्वतत्त्वं शोधयामि नमः स्वाहा ।

प्राणायामः

स्वस्तिवाचनम्

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ १॥

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं
यज्ञ (गं) समिमं दधातु ।
विश्वेदेवाऽस इहमादयन्तामोऽम् प्रतिष्ठ ॥ २ ॥

एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते
सर्वमेव प्रतिष्ठितं भवति ॥ ३॥

प्रार्थना

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥१॥

धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेत् श्रुणुयादपि ॥२॥

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥३॥

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥४॥

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥५॥

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥६॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते ॥७॥

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥८॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥९॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥१०॥

विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् ।
सरस्वतीं प्रणम्यादौ शुभं कर्म समारभेत् ॥११॥

ॐ श्री सद्गुरुचरणकमलेभ्यो नमः।
श्रीमन्महागणाधिपतये नमः । उमामहेश्वराभ्यां नमः।
लक्ष्मीनारायणाभ्यां नमः। वाणीहिरण्यगर्भाभ्यां नमः।
शचीपुरन्दराभ्यां नमः । इष्टदेवताभ्यो नमः।
कुलदेवताभ्यो नमः । ग्रामदेवताभ्यो नमः।
स्थानदेवताभ्यो नमः। वास्तुदेवताभ्यो नमः।
एतत्कर्मप्रधानदेवताभ्यो नमः। सर्वेभ्यो देवेभ्यो नमः ।
सर्वेभ्यो महापुरुषेभ्यो नमो नमः ॥१२॥

सङ्कल्पः

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्री ब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बुद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गत देशैकदेशे ..... क्षेत्रे ..... नगरे ..... नामसंवत्सरे ..... अयने ..... ऋतौ ..... मासे ..... पक्षे ..... पुण्यतिथौ ..... वासरे सर्वेषु ग्रहेषु यथा यथा राशिस्थानस्थितेषु ..... नामा ..... गोत्रोत्पन्नोऽहं /गोत्रोत्पन्नाऽहं सर्वेषां सारस्वतमहाजनानां श्री....... प्रसादसिद्ध्यर्थे यथाज्ञानं यथाशक्ति यथामिलितोपचारैः श्री..... पूजनं करिष्ये।

घण्टापूजनम्

ॐ आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
घण्टानादं प्रकुर्वीत पश्चाद् घण्टां प्रपूजयेत् ॥
ॐ घण्टास्थदेवतायै नमः ।
सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

वरुणध्यानम्

ॐ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥

ॐ वरुणं ध्यायामि, आवाहयामि, पूजयामि ।

कलशपूजनम्

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः ॥१॥

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥२॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥
अङ्गैश्च सहिताः सर्वे कलशे तु समाश्रिताः ॥३॥

ॐ भूर्भुवः स्वः । अस्मिन्कलशे वरुणं साङ्गं सपरिवारं
सायुधं सशक्तिकम् आवाहयामि पूजयामि ॥४॥

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥५॥

सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ।

ॐ पूर्वे ऋग्वेदाय नमः । ॐ दक्षिणे यजुर्वेदाय नमः ।
ॐ पश्चिमे सामवेदाय नमः । ॐ उत्तरे अथर्वणवेदाय नमः ।
ॐ कलशमध्ये अपाम्पतये वरुणाय नमः ॥ ६॥

कलशप्रार्थना

त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव ।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥

प्रसन्नो भव । वरदो भव ।
अनया पूजया वरुणाद्यावाहिता देवताः प्रीयन्तां न मम ।

शङ्खपूजनम्

ॐ शं पाञ्चजन्याय नमः ।
सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि, नमस्करोमि ॥

प्रोक्षणम्

आत्मप्रोक्षणम्

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

आसनशुद्धिः -

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥१॥

ॐ आधारशक्तये नमः । ॐ कूर्मासनाय नमः ।
ॐ अनन्तासनाय नमः । ॐ विमलासनाय नमः ।
ॐ आत्मासनाय नमः ॥२॥

सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ।

दिग्बन्धः

ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

दीपकपूजनम्

दीपो ज्योतिः परब्रह्म दीपो ज्योतिर्जनार्दनः ।
दीपो हरतु मे ध्वान्तं संविद्दीप नमोऽस्तु ते ॥

ॐ दीपदेवतायै नमः ।
सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ।

भैरवनमस्कारः -

ॐ तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥

ॐ भं भैरवाय नमः ।
सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

# १३८. श्रीगणेशपूजनम्

ध्यानम् –

सर्वस्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं
प्रस्कन्दन्मधु-गन्ध-लुब्धमधुप-व्यालोल-गण्डस्थलम् ।
दन्ताघातविदारितारि-रुधिरैः सिन्दूरशोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कर्मसु ॥१॥

एकदन्तं शूर्पकर्णं वरदाभयहस्तकम् ।
पाशाङ्कुशधरं देवं ध्यायेत् सिद्धिविनायकम् ॥२॥

ॐ गं गणपतये नमः । ध्यानं समर्पयामि ॥

आवाहनम् –

हे हेरम्ब! त्वमेह्येहि अम्बिकात्र्यम्बकात्मज ।
सिद्धिबुद्धिपते त्र्यक्ष लक्ष्यलाभपितुः पितः ॥

ॐ गं गणपतये नमः । आवाहनं समर्पयामि ।

आसनम् –

अनेकरत्नखचितं मुक्तामणिविभूषितम् ।
दिव्यसिंहासनं चारुं गणेश प्रतिगृह्यताम् ॥

ॐ गं गणपतये नमः । आसनार्थे पुष्पं समर्पयामि ॥

पाद्यम् –

गौरीपुत्र नमस्तेऽस्तु दूर्वापद्मादिसंयुतम् ।
भक्त्या पाद्यं मया दत्तं गृहाण द्विरदानन ॥

*ॐ गं गणपतये नमः । पादयोः पाद्यं समर्पयामि ॥*

अर्घ्यम् -

विघ्नराज नमस्तेऽस्तु पार्वतीप्रियनन्दन ।
गृहाणार्घ्यं मया दत्तं गन्धपुष्पाक्षतैर्युतम् ॥

ॐ गं गणपतये नमः । हस्तयोरर्घ्यं समर्पयामि ॥

आचमनम् -

विनायक नमस्तुभ्यं सुरासुरनमस्कृत ।
गृहाणाचमनं देव भक्त्या दत्तं मया प्रभो ॥

ॐ गं गणपतये नमः । आचमनीयं जलं समर्पयामि ॥

स्नानम् -

गङ्गादिसर्वतीर्थेभ्यः आहृतैर्विमलैर्जलैः ।
स्नानं कुरुष्व भगवन् उमापुत्र नमोऽस्तु ते ॥

ॐ गं गणपतये नमः । स्नानीयं जलं समर्पयामि ॥

स्नानान्ते आचमनीयं जलं समर्पयामि ॥

वस्त्रम् -

रक्तवस्त्रद्वयं देव राजराजादिपूजित ।
भक्त्या दत्तं गृहाणेदं भगवन् हरनन्दन ॥

ॐ गं गणपतये नमः । वस्त्रोपवस्त्रं समर्पयामि ॥
तदन्ते आचमनीयं जलं समर्पयामि ॥

यज्ञोपवीतम् -

राजतं ब्रह्मसूत्रं च काञ्चनं चोत्तरीयकम् ।
गृहाण देव सर्वज्ञ गीर्वाणासुरपूजित ॥

ॐ गं गणपतये नमः । यज्ञोपवीतं समर्पयामि ॥
तदन्ते आचमनीयं जलं समर्पयामि ॥

गन्धः –

चन्दनागरुकर्पूरकस्तूरीकुङ्कुमान्वितम् ।
विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यताम् ॥

ॐ गं गणपतये नमः । गन्धं समर्पयामि ॥

अक्षताः –

अक्षतान् धवलान् दिव्यान् शालीयांस्तण्डुलान् शुभान् ।
हरिद्राचूर्णसंयुक्तान् सङ्गृहाण गणाधिप ॥

ॐ गं गणपतये नमः । अक्षतान् समर्पयामि ॥

पुष्पम् –

पुष्पैर्नानाविधैर्दिव्यैः कुमुदैरथ चम्पकैः ।
सम्पूजयामि त्वां देव पुष्पाणि प्रतिगृह्यताम् ॥

ॐ गं गणपतये नमः । पुष्पाणि समर्पयामि ॥

दूर्वाः –

ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषस्परि ।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥१॥

त्वं दूर्वेऽमृतजन्मासि वन्दितासि सुरैरपि ।
सौभाग्यं सन्ततिं देहि सर्वकामकरी भव ॥२॥

ॐ गं गणपतये नमः । दूर्वाङ्कुरान् समर्पयामि ॥

## श्रीगणेश–अष्टोत्तरशत–नामावलिः

ॐ गजाननाय नमः ।
ॐ गणाध्यक्षाय नमः ।
ॐ विघ्नराजाय नमः ।
ॐ विनायकाय नमः ।
ॐ द्वैमातुराय नमः ।
ॐ सुमुखाय नमः ।
ॐ प्रमुखाय नमः ।
ॐ सन्मुखाय नमः ।
ॐ कृतिने नमः ।
ॐ ज्ञानदीपाय नमः । (१०)
ॐ सुखनिधये नमः ।
ॐ सुराध्यक्षाय नमः ।
ॐ सुरारिभिदे नमः ।
ॐ महागणपतये नमः ।
ॐ मान्याय नमः ।
ॐ महन्मान्याय नमः ।
ॐ मृडात्मजाय नमः ।
ॐ पुराणाय नमः ।
ॐ पुरुषाय नमः ।
ॐ पूष्णे नमः । (२०)
ॐ पुष्करिणे नमः ।
ॐ पुण्यकृते नमः ।
ॐ अग्रगण्याय नमः ।
ॐ अग्रपूज्याय नमः ।
ॐ अग्रगामिने नमः ।
ॐ मन्त्रकृते नमः ।
ॐ चामीकरप्रभाय नमः ।
ॐ सर्वस्मै नमः ।
ॐ सर्वोपास्याय नमः ।
ॐ सर्वकर्त्रे नमः । (३०)
ॐ सर्वनेत्रे नमः ।
ॐ सर्वसिद्धिप्रदाय नमः ।
ॐ सर्वसिद्धाय नमः ।
ॐ सर्ववन्द्याय नमः ।
ॐ महाकालाय नमः ।
ॐ महाबलाय नमः ।
ॐ हेरम्बाय नमः ।
ॐ लम्बजठराय नमः ।
ॐ ह्रस्वग्रीवाय नमः ।
ॐ महोदराय नमः । (४०)
ॐ मदोत्कटाय नमः ।
ॐ महावीराय नमः ।
ॐ मन्त्रिणे नमः ।
ॐ मङ्गलदाय नमः ।
ॐ प्रथमाचार्याय नमः ।
ॐ प्राज्ञाय नमः ।

ॐ प्रमोदाय नमः ।
ॐ मोदकप्रियाय नमः ।
ॐ धृतिमते नमः ।
ॐ मतिमते नमः । (५०)
ॐ कामिने नमः ।
ॐ कपित्थप्रियाय नमः ।
ॐ ब्रह्मचारिणे नमः ।
ॐ ब्रह्मरूपिणे नमः ।
ॐ ब्रह्मविदे नमः ।
ॐ ब्रह्मवन्दिताय नमः ।
ॐ जिष्णवे नमः ।
ॐ विष्णुप्रियाय नमः ।
ॐ भक्तजीविताय नमः ।
ॐ जितमन्मथाय नमः । (६०)
ॐ ऐश्वर्यदाय नमः ।
ॐ गुहज्यायसे नमः ।
ॐ सिद्धसेविताय नमः ।
ॐ विघ्नकर्त्रे नमः ।
ॐ विघ्नहर्त्रे नमः ।
ॐ विश्वनेत्रे नमः ।
ॐ विराजे नमः ।
ॐ स्वराजे नमः ।
ॐ श्रीपतये नमः ।
ॐ वाक्पतये नमः । (७०)
ॐ श्रीमते नमः ।
ॐ शृङ्गारिणे नमः ।
ॐ श्रितवत्सलाय नमः ।
ॐ शिवप्रियाय नमः ।
ॐ शीघ्रकारिणे नमः ।
ॐ शाश्वताय नमः ।
ॐ शिवनन्दनाय नमः ।
ॐ बलोद्धताय नमः ।
ॐ भक्तनिधये नमः ।
ॐ भावगम्याय नमः ।(८०)
ॐ भवात्मजाय नमः ।
ॐ महते नमः ।
ॐ मङ्गलदायिने नमः ।
ॐ महेशाय नमः ।
ॐ महिताय नमः ।
ॐ सत्यधर्मिणे नमः ।
ॐ सदाधाराय नमः ।
ॐ सत्याय नमः ।
ॐ सत्यपराक्रमाय नमः ।
ॐ शुभाङ्गाय नमः । (९०)
ॐ शुभ्रदन्ताय नमः ।
ॐ शुभदाय नमः ।
ॐ शुभविग्रहाय नमः ।
ॐ पञ्चपातकनाशिने नमः ।

ॐ पार्वतीप्रियनन्दनाय नमः ।
ॐ विश्वेशाय नमः ।
ॐ विबुधाराध्यपदाय नमः ।
ॐ वीरवराग्रगाय नमः ।
ॐ कुमारगुरुवन्द्याय नमः ।
ॐ कुञ्जरासुरभञ्जनाय नमः । (१००)
ॐ वल्लभीवल्लभाय नमः ।
ॐ वराभय-कराम्बुजाय नमः
ॐ सुधाकलशहस्ताय नमः ।
ॐ सुधाकर-कलाधराय नमः ।
ॐ पञ्चहस्ताय नमः ।
ॐ प्रधानेशाय नमः ।
ॐ पुरातनाय नमः ।
ॐ वरसिद्धिविनायकाय नमः । (१०८)

## एकवीस दूर्वा अर्पण कोर्चे विधान

(दोनि दूर्वा घेव्नु एक नाम म्होण्णु अर्पण कोर्का, तश्शि वीस दूर्वा अर्पण कोर्चे)

ॐ गणाधिपाय नमः दूर्वायुग्मं समर्पयामि ।
ॐ उमापुत्राय नमः दूर्वायुग्मं समर्पयामि ।
ॐ अघनाशनाय नमः दूर्वायुग्मं समर्पयामि ।
ॐ विनायकाय नमः दूर्वायुग्मं समर्पयामि ।
ॐ ईशपुत्राय नमः दूर्वायुग्मं समर्पयामि ।
ॐ सर्वसिद्धिप्रदाय नमः दूर्वायुग्मं समर्पयामि ।
ॐ एकदन्ताय नमः दूर्वायुग्मं समर्पयामि ।
ॐ इभवक्त्राय नमः दूर्वायुग्मं समर्पयामि ।
ॐ मूषकवाहनाय नमः दूर्वायुग्मं समर्पयामि ।
ॐ कुमारगुरवे नमः दूर्वायुग्मं समर्पयामि ।

(एक एक नाम घेव्नु दोनि दोनि दूर्वा अर्पण कर्तचि
एक दूर्वा (एकवीसावो) अर्पण कर्तना हो श्लोक म्होणका)

ॐ गणाधिपाय नमस्तेऽस्तु उमापुत्राघनाशन ।
एकदन्तेभवक्त्रेति तथा मूषकवाहन ॥

विनायकेशपुत्रेति सर्वसिद्धिप्रदायक ।
कुमारगुरवेति त्वामर्पयामि प्रयत्नतः ॥

दूर्वामेकां समर्पयामि ॥

धूपः –

दशाङ्गं गुग्गुलोपेतं सुगन्धिं च मनोहरम् ।
धूपं दास्यामि देवेश गृहाण त्वं गजानन ॥

ॐ गं गणपतये नमः । धूपम् आघ्रापयामि॥

दीपः –

गृहाण मङ्गलं दीपं घृतवर्तिसमन्वितम् ।
दीपं ध्वान्तहरं देव रुद्रप्रिय नमोऽस्तु ते ॥

ॐ गं गणपतये नमः । दीपं दर्शयामि ॥

नैवेद्यम् –

ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्ति प्रचोदयात् ॥१॥

सघृतान् सगुडांश्चैव मोदकान् घृतपाचितान् ।
नैवेद्यं सफलं दत्तं गृह्यतां विघ्ननाशन ॥२॥

जम्बू-कपित्थ-कदली-नारिकेलान् गजानन ।
नाना ऋतुफलान्येव गृहाण गणनायक ॥३॥

ॐ गं गणपतये नमः ।
नैवेद्यं निवेदयामि । नाना ऋतुफलानि च समर्पयामि ॥

ताम्बूलम् –

ताम्बूलं च वरं रम्यं कर्पूरादिसुवासितम् ।
जिह्वाजाड्योच्छेदकरं ताम्बूलं प्रतिगृह्यताम् ॥

ॐ गं गणपतये नमः । मुखशुद्ध्यर्थं ताम्बूलं समर्पयामि ॥

दक्षिणा –

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

ॐ गं गणपतये नमः ।
साङ्गतासिद्ध्यर्थं हिरण्यगर्भदक्षिणां समर्पयामि ॥

नीराजनम् –

नीराजनं नीरजस्क कर्पूरेण कृतं मया।
गृहाण करुणाराशे गणेश्वर नमोस्तुऽते॥

नीराजनं निर्मलदीप्तिमद्भिर्दीपाङ्कुरैरुज्ज्वलमुच्छ्रितैश्च ।
घण्टानिनादेन समर्पयामि गजाननाय गिरिजासुताय ॥२॥

ॐ गं गणपतये नमः । नीराजनं दर्शयामि ॥

ॐ गं गणपतये नमः । जलारार्तिकं समर्पयामि ॥

मन्त्रपुष्पाञ्जलिः –

नानासुगन्धपुष्पाणि यथाकालोद्भवानि च ।
पुष्पाञ्जलिं मया दत्तं गृहाण गणनायक ॥

ॐ गं गणपतये नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

प्रदक्षिणा –

प्रदक्षिणं करिष्यामि सततं मोदकप्रिय ।
मद्विघ्नं हर मे शीघ्रं भक्तानामिष्टदायक ॥१॥

आखुवाहन देवेश विश्वव्यापिन् विनायक ।
प्रदक्षिणं करोमि त्वां प्रसीद वरदो भव ॥२॥

ॐ गं गणपतये नमः । प्रदक्षिणां समर्पयामि ॥

प्रार्थना –

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्यभावेन रक्ष मां परमेश्वर ॥

ॐ गं गणपतये नमः । प्रार्थनां समर्पयामि ॥

नमस्कारः –

भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय ।
विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते ॥१॥

नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः ।
नमस्ते रुद्ररूपाय करिरूपाय ते नमः ॥२॥

विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे ।
भक्तप्रियाय देवाय नमस्तुभ्यं विनायक ॥३॥

ॐ गं गणपतये नमः । नमस्करोमि ॥

विशेषार्घ्यम्–

द्वैमातुर कृपासिन्धो षण्मातुराग्रज प्रभो ।
विशेषार्घ्यं गृहाणेदं प्रसीद परमेश्वर ॥१॥

अर्घ्यं गृहाण हेरम्ब वरप्रद विनायक ।
गन्धपुष्पाक्षतैर्युक्तं भक्त्या दत्तं मया प्रभो ॥२॥

नमस्ते भिन्नदन्ताय नमस्ते हरसूनवे ।
इदमर्घ्यं प्रदास्यामि सङ्गृहाण गणाधिप ॥३॥

गौर्यङ्गमलसम्भूत ज्येष्ठस्वामिन् विनायक ।
गणेश्वर गृहाणार्घ्यं गजानन नमोऽस्तु ते ॥४॥

ॐ गं गणपतये नमः । विशेषार्घ्यं समर्पयामि ॥

प्रार्थनापूर्वकं क्षमापनम् –

विनायक वरं देहि महात्मन् मोदकप्रिय ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥१॥

प्रसीद देवदेवेश प्रसीद गणनायक ।
ईप्सितं मे वरं देहि परत्र च परां गतिम् ॥२॥

ॐ गं गणपतये नमः । प्रार्थनापूर्वकं क्षमां याचे ॥

समर्पणम् –

क्षमस्व विघ्नाधिपते मदीयान् सदापराधान् विविधस्वरूपान् ।
भक्तिं मदीयां सफलां कुरुष्व सम्प्रार्थयामि मनसा गणेश ॥१॥

न्यूनातिरिक्तं तु मया कृतं चेत् तदर्थमन्ते मनसा गृहाण।
दूर्वाङ्कुरान् विघ्नपते प्रदत्तान् सम्पूर्णमेवं कुरु पूजनं मे ॥२॥

निर्विघ्नमस्तु निर्विघ्नमस्तु निर्विघ्नमस्तु ।
अनेन कृतपूजनेन सिद्धिबुद्धिसहितः
श्रीगणाधिपतिः प्रीयताम् ॥

*॥ ॐ तत् सत् ब्रह्मार्पणमस्तु ॥*

# १३८. श्रीशिवपूजनम्

ध्यानम् -

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥१॥

परशुमृगहस्तं तं वराऽभीतिकरं विभुम् ।
श्लिष्यच्छक्तिं वृषाऽऽरूढं भवानीशङ्करं भजे ॥२॥

आश्रमसम्प्रदायेशं सारस्वतविनायकम् ।
चित्रापुरमठाऽऽराध्यं भवानीशङ्करं भजे ॥३॥

ॐ श्रीभवानीशङ्कराय नमः । ध्यानं समर्पयामि ॥

आवाहनम् -

एह्येहि गौरीश पिनाकपाणे शशाङ्कमौले वृषभाधिरूढ ।
देवाधिदेवेश महेश नित्यं गृहाण पूजां भगवन् नमस्ते ॥

ॐ श्रीभवानीशङ्कराय नमः । आवाहनं समर्पयामि ॥

आसनम् -

विश्वात्मने नमस्तुभ्यं चिदम्बरनिवासिने ।
रत्नसिंहासनं चारु ददामि करुणानिधे ॥

ॐ श्रीभवानीशङ्कराय नमः । आसनार्थे पुष्पं समर्पयामि ॥

पाद्यम् -

नमः शर्वाय सोमाय सर्वमङ्गलहेतवे ।
तुभ्यं सम्प्रददे पाद्यं श्रीकैलासनिवासिने ॥

ॐ श्रीभवानीशङ्कराय नमः । पादयोः पाद्यं समर्पयामि ॥

अर्घ्यम्

अनर्घफलदात्रे च शास्त्रे वैवस्वतस्य च ।
तुभ्यमर्घ्यं प्रदास्यामि द्वादशान्तनिवासिने ॥

ॐ श्रीभवानीशङ्कराय नमः । हस्तयोरर्घ्यं समर्पयामि ॥

आचमनम् -

अशेषजगदाधार निराधार महेश्वर ।
ददाम्याचमनं तुभ्यं सुन्दरेश नमोऽस्तु ते ॥

ॐ श्रीभवानीशङ्कराय नमः। आचमनीयं जलं समर्पयामि ॥

स्नानम् -

गङ्गाक्लिन्नजटाभार सोम सोमार्धशेखर ।
नद्या नीरैः समानीतैः स्नानं कुरु महेश्वर ॥

ॐ श्रीभवानीशङ्कराय नमः। स्नानीयं जलं समर्पयामि ॥
स्नानान्ते आचमनीयं समर्पयामि ।

वस्त्रम् -

दिगम्बर नमस्तुभ्यं गजाजिनधराय च ।
व्याघ्रचर्मोत्तरीयाय वस्त्रयुग्मं ददाम्यहम् ॥

ॐ श्रीभवानीशङ्कराय नमः । वस्त्रोपवस्त्रं समर्पयामि ॥
तदन्ते आचमनीयं समर्पयामि ।

यज्ञोपवीतम् -

चराचर-जगद्रत्न-प्रोतसूत्रधराय ते ।
नागयज्ञोपवीताय ह्युपवीतं ददाम्यहम् ॥

ॐ श्रीभवानीशङ्कराय नमः । यज्ञोपवीतं समर्पयामि ॥
तदन्ते आचमनीयं समर्पयामि ।

भस्म–

अग्निहोत्रसमुद्भूतं विरजाहोमपावितम् ।
गृहाण भस्म हे स्वामिन् भक्तानां भूतिदायक ॥
ॐ श्रीभवानीशङ्कराय नमः । भस्मकणान् समर्पयामि ॥

गन्धः –

नमस्सुगन्धदेहाय ह्यवन्ध्यफलदायिने ।
तुभ्यं गन्धान् प्रदास्यामि चान्धकासुरभञ्जन ॥
ॐ श्रीभवानीशङ्कराय नमः । गन्धं समर्पयामि ॥

अक्षताः –

अक्षतान् धवलान् देव सिद्धगन्धर्वपूजित ।
सुन्दरेश नमस्तुभ्यं गृहाण वरदो भव ॥
ॐ श्रीभवानीशङ्कराय नमः । अक्षतान् समर्पयामि ॥

पुष्पम् –

तुरीयवनसम्भूतं परमानन्दसौरभम् ।
पुष्पं गृहाण सोमेश पुष्पचापविभञ्जन ॥
ॐ श्रीभवानीशङ्कराय नमः । पुष्पाणि समर्पयामि ॥

बिल्वपत्रम् –

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रयायुधम् ।
त्रिजन्मपाप–संहारमेकबिल्वं शिवार्पणम् ॥
ॐ श्रीभवानीशङ्कराय नमः । बिल्वपत्रं समर्पयामि ॥

श्रीशिव–अष्टोत्तरशतनामावल्या सहित बिल्वार्चने / पुष्पार्चने विनियोगः।

# श्रीशिवाष्टोत्तरशतनामावलिः

ॐ शिवाय नमः ।
ॐ महेश्वराय नमः ।
ॐ शम्भवे नमः ।
ॐ पिनाकिने नमः ।
ॐ शशिशेखराय नमः ।
ॐ वामदेवाय नमः ।
ॐ विरूपाक्षाय नमः ।
ॐ कपर्दिने नमः ।
ॐ नीललोहिताय नमः ।
ॐ शङ्कराय नमः । (१०)
ॐ शूलपाणये नमः ।
ॐ खट्वाङ्गिने नमः ।
ॐ विष्णुवल्लभाय नमः ।
ॐ शिपिविष्टाय नमः ।
ॐ अम्बिकानाथाय नमः ।
ॐ श्रीकण्ठाय नमः ।
ॐ भक्तवत्सलाय नमः ।
ॐ भवाय नमः ।
ॐ शर्वाय नमः ।
ॐ त्रिलोकेशाय नमः । (२०)
ॐ शितिकण्ठाय नमः ।
ॐ शिवा-प्रियाय नमः ।
ॐ उग्राय नमः ।
ॐ कपालिने नमः ।
ॐ कामारये नमः ।
ॐ अन्धकासुरसूदनाय नमः ।
ॐ गङ्गाधराय नमः ।
ॐ ललाटाक्षाय नमः ।
ॐ कालकालाय नमः ।
ॐ कृपानिधये नमः । (३०)
ॐ भीमाय नमः ।
ॐ परशुहस्ताय नमः ।
ॐ मृगपाणये नमः ।
ॐ जटाधराय नमः ।
ॐ कैलासवासिने नमः ।
ॐ कवचिने नमः ।
ॐ कठोराय नमः ।
ॐ त्रिपुरान्तकाय नमः ।
ॐ वृषाङ्काय नमः ।
ॐ वृषभारूढाय नमः । (४०)
ॐ भस्मोद्धूलित-विग्रहाय नमः ।
ॐ सामप्रियाय नमः ।
ॐ स्वरमयाय नमः ।
ॐ त्रयीमूर्तये नमः ।
ॐ अनीश्वराय नमः ।
ॐ सर्वज्ञाय नमः ।

ॐ परमात्मने नमः ।
ॐ सोमसूर्याग्निलोचनाय नमः ।
ॐ हविषे नमः ।
ॐ यज्ञमयाय नमः । (५०)
ॐ सोमाय नमः ।
ॐ पञ्चवक्त्राय नमः ।
ॐ सदाशिवाय नमः ।
ॐ विश्वेश्वराय नमः ।
ॐ वीरभद्राय नमः ।
ॐ गणनाथाय नमः ।
ॐ प्रजापतये नमः ।
ॐ हिरण्यरेतसे नमः ।
ॐ दुर्धर्षाय नमः ।
ॐ गिरीशाय नमः । (६०)
ॐ गिरिशाय नमः ।
ॐ अनघाय नमः ।
ॐ भुजङ्गभूषणाय नमः ।
ॐ भर्गाय नमः ।
ॐ गिरिधन्विने नमः ।
ॐ गिरिप्रियाय नमः ।
ॐ कृत्तिवाससे नमः ।
ॐ पुरारातये नमः ।
ॐ भगवते नमः ।
ॐ प्रमथाधिपाय नमः । (७०)
ॐ मृत्युञ्जयाय नमः ।
ॐ सूक्ष्मतनवे नमः ।
ॐ जगद्व्यापिने नमः ।
ॐ जगद्गुरवे नमः ।
ॐ व्योमकेशाय नमः ।
ॐ महासेनजनकाय नमः ।
ॐ चारुविक्रमाय नमः ।
ॐ रुद्राय नमः ।
ॐ भूतपतये नमः ।
ॐ स्थाणवे नमः । (८०)
ॐ अहिर्बुध्न्याय नमः ।
ॐ दिगम्बराय नमः ।
ॐ अष्टमूर्तये नमः ।
ॐ अनेकात्मने नमः ।
ॐ सात्त्विकाय नमः ।
ॐ शुद्धविग्रहाय नमः ।
ॐ शाश्वताय नमः ।
ॐ खण्डपरशवे नमः ।
ॐ अजाय नमः ।
ॐ पाशविमोचकाय नमः । (९०)
ॐ मृडाय नमः ।
ॐ पशुपतये नमः ।
ॐ देवाय नमः ।
ॐ महादेवाय नमः ।

ॐ अव्ययाय नमः ।

ॐ हरये नमः ।

ॐ पूषदन्तभिदे नमः ।

ॐ अव्यग्राय नमः ।

ॐ दक्षाध्वरहराय नमः।

ॐ हराय नमः । (१००)

ॐ भगनेत्रभिदे नमः ।

ॐ अव्यक्ताय नमः ।

ॐ सहस्राक्षाय नमः ।

ॐ सहस्रपदे नमः ।

ॐ अपवर्गप्रदाय नमः ।

ॐ अनन्ताय नमः ।

ॐ तारकाय नमः ।

ॐ परमेश्वराय नमः । (१०८)

**अष्टपुष्पाणि**

ॐ शर्वाय क्षितिमूर्तये नमः ।

ॐ भवाय जलमूर्तये नमः ।

ॐ रुद्राय अग्निमूर्तये नमः ।

ॐ उग्राय वायुमूर्तये नमः ।

ॐ भीमाय आकाशमूर्तये नमः ।

ॐ ईशानाय सूर्यमूर्तये नमः ।

ॐ महादेवाय सोममूर्तये नमः ।

ॐ पशुपतये यजमानमूर्तये नमः ।

धूपः –

धराधरसुतानाथ धूर्जटे धवलप्रभ ।
धूपमाघ्रापयामीश दशाङ्गं गुग्गुलान्वितम् ॥

ॐ श्री भवानीशङ्कराय नमः । धूपम् आघ्रापयामि ॥

दीपः –

साज्यवर्तियुतं दीपं सर्वमङ्गलकारकम् ।
समर्पयामि पश्येदं सोमसूर्याग्निलोचन ॥

ॐ श्री भवानीशङ्कराय नमः । दीपं दर्शयामि ॥

नैवेद्यम् –

हस्तौ प्रक्षाल्य नैवेद्यं पुरतः स्थाप्य गायत्र्या सम्प्रोक्ष्य तुलसीदलैः आच्छाद्य नैवेद्यम् ..........

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥१॥

ॐ प्राणाय स्वाहा।
ॐ अपानाय स्वाहा।
ॐ व्यानाय स्वाहा।
ॐ उदानाय स्वाहा।
ॐ समानाय स्वाहा।

ॐ प्राण-अपान-व्यान-उदान-समानाः ॥२॥

ॐ श्रीभवानीशङ्कराय नमः । आचमनीयं समर्पयामि ॥

पूर्वापोषणं समर्पयामि ।

नैवेद्यं षड्रसोपेतं विषाशन घृतान्वितम् ।
मधुक्षीरापूपयुक्तं गृह्यतां सोमशेखर ॥३॥

ॐ श्रीभवानीशङ्कराय नमः ।
नैवेद्यं निवेदयामि नानाऋतुफलानि च समर्पयामि ॥

आचमनीयं समर्पयामि ।
उत्तरापोषणं समर्पयामि ।
मुखप्रक्षालनं समर्पयामि ।
हस्तप्रक्षालनं समर्पयामि।
करोद्वर्तनार्थे चन्दनं समर्पयामि।

ताम्बूलम् -

नागवल्लीदलैः पूगैः नानाचूर्णैश्च संयुतम् ।
नागेन्द्रहार ताम्बूलं मुखामोदं च गृह्यताम् ॥

ॐ श्रीभवानीशङ्कराय नमः । मुखशुद्ध्यर्थं ताम्बूलं समर्पयामि ॥

दक्षिणा -

धनदाधिप देवेश दक्षिणाद्रव्यमुत्तमम् ।
यथाशक्ति मया दत्तं गृह्यतां वृषभध्वज ॥

ॐ श्रीभवानीशङ्कराय नमः ।
साङ्गतासिद्ध्यर्थं हिरण्यगर्भदक्षिणां समर्पयामि ॥

नीराजनम्–

वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥१॥

शान्तं पद्मासनस्थं शशधरमुकुटं पञ्चवक्त्रं त्रिनेत्रं
शूलं वज्रं च खड्गं परशुमभयदं दक्षिणाङ्गे वहन्तम् ।
नागं पाशं च घण्टां डमरुकसहितं साङ्कुशं वामभागे
नानालङ्कारदीप्तं स्फटिकमणिनिभं पार्वतीशं नमामि ॥२॥

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥३॥

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देव देव ॥४॥

नीराजनं निर्मलदीप्तिमद्भिर्-
दीपाङ्कुरैरुज्ज्वलमुच्छ्रितैश्च ।
घण्टानिनादेन समर्पयामि
मृत्युञ्जयाय त्रिपुरान्तकाय ॥५॥

ॐ श्रीभवानीशङ्कराय नमः ।
नीराजनं दर्शयामि । तदन्ते जलारार्तिकं समर्पयामि ॥

देवाभिवन्दनम् । आत्माभिवन्दनम् ॥

मन्त्रपुष्पाञ्जलिः -

हर विश्वाखिलाधार निराधार निराश्रय ।
पुष्पाञ्जलिं गृहाणेश सोमेश्वर नमोऽस्तु ते ॥

ॐ श्रीभवानीशङ्कराय नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

प्रदक्षिणा -

पदे पदे दुरितघ्नं मायाभ्रमणवारकम् ।
पुरारे तव प्रीत्यर्थं प्रदक्षिणशतं मम ॥

ॐ श्रीभवानीशङ्कराय नमः । प्रदक्षिणां समर्पयामि ॥

प्रार्थना-

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्यभावेन रक्ष मां परमेश्वर ॥

ॐ श्रीभवानीशङ्कराय नमः । प्रार्थनां समर्पयामि ॥

नमस्कारः -

मृत्युञ्जयाय रुद्राय नीलकण्ठाय शम्भवे ।
अमृतेशाय शर्वाय महादेवाय ते नमः ॥

ॐ श्रीभवानीशङ्कराय नमः । नमस्करोमि ॥

विशेषार्घ्यम् -

वरद त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ।
अनेन सफलार्घ्येन फलदोऽस्तु सदा मम ॥

ॐ श्रीभवानीशङ्कराय नमः । विशेषार्घ्यं समर्पयामि ॥

प्रार्थनापूर्वकंक्षमापनम् –

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षमस्व परमेश्वर ॥१॥

क्षमस्व देवदेवेश क्षमस्व भुवनेश्वर ।
तव पादाम्बुजे नित्यं निश्चला भक्तिरस्तु मे ॥२॥

ॐ श्रीभवानीशङ्कराय नमः। प्रार्थनापूर्वकं क्षमापनं समर्पयामि॥

समर्पणम् –

सर्वं सदाशिव सहस्व ममापराधं
मग्नं समुद्धर महत्यमुमापदब्धौ ।
सर्वात्मना तव पदाम्बुजमेव दीनः
स्वामिन् अनन्यशरणः शरणं गतोऽस्मि ॥१॥

गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ।
आगता सुखसम्पत्तिः पुण्याश्च तव दर्शनात् ॥२॥

देवो दाता च भोक्ता च देवरूपमिदं जगत् ।
देवो जयति सर्वत्र यो देवः सोऽहमेव हि ॥३॥

अनेन कृतपूजाकर्मणा श्रीभवानीशङ्करो महारुद्रः प्रीयताम् ॥

ॐ तत् सत् ब्रह्मार्पणमस्तु ॥

तिष्ठ तिष्ठ परस्थाने स्वस्थाने परमेश्वर ।
यत्र ब्रह्मादयो देवाः सर्वे तिष्ठन्ति मे हृदि ॥५॥

ॐ नमः पार्वतीपतये हर हर महादेव ॥

जपः –

(जप जाय्नाफुडे इष्टदेवतानुसार)
(देवीश्लोकः) – गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥५॥

(देवश्लोकः) – गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥६॥

# १४०. श्रीगुरुपूजनम्

ध्यानम् -

द्विदलकमलमध्ये बद्धसंवित्सुमुद्रं
धृतशिवमयगात्रं साधकानुग्रहार्थम् ।
श्रुतिशिरसिविभान्तं बोधमार्तण्डमूर्तिं
शमिततिमिरशोकं श्रीगुरुं भावयामि ॥१॥

हृदम्बुजे कर्णिकमध्यसंस्थं सिंहासने संस्थितदिव्यमूर्तिम् ।
ध्यायेद्गुरुं चन्द्रकलाप्रकाशं चित्पुस्तकाभीष्टवरं दधानम् ॥२॥

ॐ श्री गुरुपादुकाभ्यो नमः । ध्यानं समर्पयामि ॥

आवाहनम् -

ॐ स्वरूपनिरूपणहेतवे श्रीगुरवे नमः ।
ॐ स्वच्छप्रकाशविमर्शहेतवे श्रीपरमगुरवे नमः ।
ॐ स्वात्मारामपञ्जरविलीनतेजसे श्रीपरमेष्ठिगुरवे नमः ।
ॐ श्रीगुरुपादुकाभ्यो नमः । आवाहयामि, पूजयामि ॥

आसनम् -

सर्वात्मभावसंस्थाय गुरवे सर्वसाक्षिणे ।
सहस्रारसरोजातमासनं कल्पयाम्यहम् ॥

ॐ श्रीगुरुपादुकाभ्यो नमः । आसनार्थे पुष्पं समर्पयामि ॥

पाद्यम् -

चलाचलनिकेताय चार्पितं पाद्यमुत्तमम् ।
सर्वधर्मपरित्यागं शरणागतितीर्थजम् ॥

ॐ श्रीगुरुपादुकाभ्यो नमः । पादयोः पाद्यं समर्पयामि ॥

अर्घ्यम् - अनन्यभक्तिसलिलं विनेयगुणमण्डितम् ।
अर्घ्यं तेऽनर्घ्यकैवल्यनाथाय परिकल्पितम् ॥

ॐ श्रीगुरुपादुकाभ्यो नमः। हस्तयोरर्घ्यं समर्पयामि ॥

आचमनम् -

मनोवाक्कायकर्माख्यं दत्तं ते निर्मलं जलम् ।
गृहीत्वा गुरुराजेन्द्र कुरुष्वाचमनं विभो ॥

ॐ श्रीगुरुपादुकाभ्यो नमः । आचमनीयं जलं समर्पयामि ॥

स्नानम् -

सर्वशास्त्रमयं तोयं सदानिर्मुक्तकल्मष ।
श्रद्धानद्यास्समानीतं स्नानार्थं प्रतिगृह्यताम् ॥

ॐ श्रीगुरुपादुकाभ्यो नमः ।
स्नानीयं जलम् अभिषेकं च समर्पयामि ॥
स्नानान्ते आचमनीयं समर्पयामि ॥

वस्त्रम् -

मायाचित्रपटाच्छन्ननिजगुह्योरुतेजसे ।
मम श्रद्धाभक्तिवासयुग्मं देशिक गृह्यताम् ॥

ॐ श्रीगुरुपादुकाभ्यो नमः । वस्त्रोपवस्त्रं समर्पयामि ॥
तदन्ते आचमनीयं समर्पयामि ॥

चन्दन-अक्षताः-

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनात् मृत्योर्मुक्षीय मामृतात् ॥१॥

महावाक्योत्थविज्ञान-गन्धाढ्यं तापमोचनम् ।
विलेपनं गुरुश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥२॥

ॐ श्रीगुरुपादुकाभ्यो नमः । चन्दनम् अक्षतान् च समर्पयामि ॥

पुष्पम् -

तुरीयवनसम्भूतं दिव्यभावमनोहरम् ।
तारादिमनुपुष्पालिं गृहाण गुरुनायक ॥

ॐ श्रीगुरुपादुकाभ्यो नमः । पुष्पं समर्पयामि ॥

बिल्वपत्रम् -

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रयायुधम् ।
त्रिजन्मपाप-संहारमेकबिल्वं शिवार्पणम् ॥

ॐ श्रीगुरुपादुकाभ्यो नमः । बिल्वपत्रं समर्पयामि ॥

श्रीगुरु-अष्टोत्तरशतनामावल्यासहित बिल्वार्चने/
पुष्पार्चने विनियोगः

## श्रीगुरु-अष्टोत्तरशतनामावलिः

ॐ सद्गुरवे नमः ।
ॐ अज्ञाननाशकाय नमः ।
ॐ अदम्भिने नमः ।
ॐ अद्वैतप्रकाशकाय नमः ।
ॐ अनपेक्षाय नमः ।
ॐ अनसूयवे नमः ।
ॐ अनुपमाय नमः ।
ॐ अभयप्रदात्रे नमः ।
ॐ अमानिने नमः ।
ॐ अहिंसामूर्तये नमः । (१०)
ॐ अहैतुकदयासिन्धवे नमः ।
ॐ अहङ्कारनाशकाय नमः ।
ॐ अहङ्कारवर्जिताय नमः ।
ॐ आचार्येन्द्राय नमः ।

ॐ आत्मसन्तुष्टाय नमः ।
ॐ आनन्दमूर्तये नमः ।
ॐ आर्जवयुक्ताय नमः ।
ॐ उचितवाचे नमः ।
ॐ उत्साहिने नमः ।
ॐ उदासीनाय नमः । (२०)
ॐ उपरताय नमः ।
ॐ ऐश्वर्ययुक्ताय नमः ।
ॐ कृतकृत्याय नमः ।
ॐ क्षमावते नमः ।
ॐ गुणातीताय नमः ।
ॐ चारुवाग्विलासाय नमः ।
ॐ चारुहासाय नमः ।
ॐ छिन्नसंशयाय नमः ।
ॐ ज्ञानदात्रे नमः ।
ॐ ज्ञानयज्ञतत्पराय नमः । (३०)
ॐ तत्त्वदर्शिने नमः ।
ॐ तपस्विने नमः ।
ॐ तापहराय नमः ।
ॐ तुल्यनिन्दास्तुतये नमः ।
ॐ तुल्यप्रियाप्रियाय नमः ।
ॐ तुल्यमानापमानाय नमः ।
ॐ तेजस्विने नमः ।
ॐ त्यक्तसर्वपरिग्रहाय नमः ।
ॐ त्यागिने नमः ।
ॐ दक्षाय नमः । (४०)
ॐ दान्ताय नमः ।
ॐ दृढव्रताय नमः ।
ॐ दोषवर्जिताय नमः ।
ॐ द्वन्द्वातीताय नमः ।
ॐ धीमते नमः ।
ॐ धीराय नमः ।
ॐ नित्यसन्तुष्टाय नमः ।
ॐ निरहङ्काराय नमः ।
ॐ निराश्रयाय नमः ।
ॐ निर्भयाय नमः । (५०)
ॐ निर्मदाय नमः ।
ॐ निर्ममाय नमः ।
ॐ निर्मलाय नमः ।
ॐ निर्मोहाय नमः ।
ॐ निर्योगक्षेमाय नमः ।
ॐ निर्लोभाय नमः ।
ॐ निष्कामाय नमः ।
ॐ निष्क्रोधाय नमः ।
ॐ निस्सङ्गाय नमः ।
ॐ परमसुखदाय नमः । (६०)
ॐ पण्डिताय नमः ।
ॐ पूर्णाय नमः ।

ॐ प्रमाणप्रवर्तकाय नमः ।
ॐ प्रियभाषिणे नमः ।
ॐ ब्रह्मकर्मसमाधये नमः ।
ॐ ब्रह्मात्मनिष्ठाय नमः ।
ॐ ब्रह्मात्मविदे नमः ।
ॐ भक्ताय नमः ।
ॐ भवरोगहराय नमः ।
ॐ भुक्तिमुक्तिप्रदात्रे नमः । (७०)
ॐ मङ्गलकर्त्रे नमः ।
ॐ मधुरभाषिणे नमः ।
ॐ महात्मने नमः ।
ॐ महावाक्योपदेशकर्त्रे नमः ।
ॐ मितभाषिणे नमः ।
ॐ मुक्ताय नमः ।
ॐ मौनिने नमः ।
ॐ यतचित्ताय नमः ।
ॐ यतये नमः ।
ॐ यदृच्छालाभसन्तुष्टाय नमः ।(८०)
ॐ युक्ताय नमः ।
ॐ रागद्वेषवर्जिताय नमः ।
ॐ विदिताखिलशास्त्राय नमः ।
ॐ विद्याविनयसम्पन्नाय नमः ।
ॐ विमत्सराय नमः ।
ॐ विवेकिने नमः ।
ॐ विशालहृदयाय नमः ।
ॐ व्यवसायिने नमः ।
ॐ शरणागतवत्सलाय नमः ।
ॐ शान्ताय नमः । (९०)
ॐ शुद्धमानसाय नमः ।
ॐ शिष्यप्रियाय नमः ।
ॐ श्रद्धावते नमः ।
ॐ श्रोत्रियाय नमः ।
ॐ सत्यवाचे नमः ।
ॐ सदामुदितवदनाय नमः ।
ॐ समचित्ताय नमः ।
ॐ समानाधिकवर्जिताय नमः ।
ॐ समाहितचित्ताय नमः ।
ॐ सर्वभूतहिताय नमः। (१००)
ॐ सिद्धाय नमः ।
ॐ सुलभाय नमः ।
ॐ सुशीलाय नमः ।
ॐ सुहृदे नमः ।
ॐ सूक्ष्मबुद्धये नमः ।
ॐ सङ्कल्पवर्जिताय नमः ।
ॐ सम्प्रदायविदे नमः ।
ॐ स्वतन्त्राय नमः । (१०८)

धूपः–

पञ्चकोशमयं दिव्यं दशाङ्गं गुग्गुलं गुरो ।
दग्ध्वा ज्ञानाग्निना नाथ धूपमाघ्रापयामि ते ॥

ॐ श्रीगुरुपादुकाभ्यो नमः । धूपम् आघ्रापयामि ॥

दीपः –

वैराग्यतैलसम्पूर्णे भक्तिवर्तिसमन्विते ।
विवेकपूर्णपात्रेऽहं बोधदीपं प्रदर्शये ॥

ॐ श्रीगुरुपादुकाभ्यो नमः । दीपं दर्शयामि ॥

नैवेद्यम् –

हस्तौ प्रक्षाल्य नैवेद्यं पुरतः स्थाप्य गायत्र्या सम्प्रोक्ष्य तुलसीदलैः आच्छाद्य नैवेद्यम् –

ॐ महापुरुषाय विद्महे परमहंसाय धीमहि ।
तन्नो गुरुः प्रचोदयात् ॥१॥

ॐ प्राणाय स्वाहा
ॐ अपानाय स्वाहा
ॐ व्यानाय स्वाहा
ॐ उदानाय स्वाहा
ॐ समानाय स्वाहा
ॐ प्राण–अपान–व्यान–उदान–समानाः ॥२॥

ॐ श्रीगुरुपादुकाभ्यो नमः । आचमनीयं समर्पयामि ॥

पूर्वापोषणं समर्पयामि ।

ॐ ब्रह्मनिष्ठाय नैवेद्यं ब्रह्माण्डाख्यं महौदनम् ।
समाधिपक्कमधुरं शिवाय गुरवेऽर्पितम् ॥३॥

ॐ श्रीगुरुपादुकाभ्यो नमः ।
नैवेद्यं निवेदयामि नानाऋतुफलानि च समर्पयामि ॥

आचमनीयं समर्पयामि ।
उत्तरापोषणं समर्पयामि ।
मुखप्रक्षालनं समर्पयामि
हस्तप्रक्षालनं समर्पयामि ।
करोद्वर्तनार्थेचन्दनं समर्पयामि।

ताम्बूल-दक्षिणा -

जीवब्रह्मैक्यविज्ञान-तृप्ताय गुरुमूर्तये ।
जीवन्मुक्तिसुखाकारं ताम्बूलं प्रतिगृह्यताम् ॥

ॐ श्रीगुरुपादुकाभ्यो नमः । सदक्षिणा-ताम्बूलं समर्पयामि ॥

नीराजनम् -

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥१॥

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देव देव ॥२॥

नीराजनं निर्मलदीप्तिमद्भिर्दीपाङ्कुरैरुज्ज्वलमुच्छ्रितैश्च ।
घण्टानिनादेन समर्पयामि मृत्युञ्जयाय गुरुनायकाय ॥३॥

ॐ श्रीगुरुपादुकाभ्यो नमः ।
नीराजनं दर्शयामि तदन्ते जलारार्तिकं समर्पयामि ॥
देवाभिवन्दनम्। आत्माभिवन्दनम् ॥

मन्त्रपुष्पाञ्जलिः –

नानासुगन्धपुष्पाणि यथाकालोद्भवानि च ।
पुष्पाञ्जलिं मया दत्तं गृहाण गुरुनायक ॥

ॐ श्रीगुरुपादुकाभ्यो नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

प्रदक्षिणा –

परिभ्रमन्ति ब्रह्माण्डकोटयः यस्य सम्पदे ।
तस्य श्रीगुरुनाथस्य संविद्–दृष्ट्या प्रदक्षिणम् ॥

ॐ श्रीगुरुपादुकाभ्यो नमः । प्रदक्षिणां समर्पयामि ॥

नमस्कार–प्रार्थना–स्तुतिः –

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥१॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥२॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात्परब्रह्म तस्मै श्रीगुरवे नमः ॥३॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादं शङ्करं लोकशङ्करम् ॥४॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥५॥

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥६॥

ॐ श्रीगुरुपादुकाभ्यो नमः ।
नमस्करोमि। प्रार्थनां स्तुतिं च समर्पयामि ॥

विशेषार्घ्यम् –

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

ॐ श्रीगुरुपादुकाभ्यो नमः । विशेषार्घ्यं समर्पयामि ॥

प्रार्थनापूर्वकं क्षमापनम् –

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व गुरुपुङ्गव ॥

ॐ श्रीगुरुपादुकाभ्यो नमः । प्रार्थनापूर्वकं क्षमां याचे ॥

समर्पणम् –

देवनाथ गुरो स्वामिन् देशिक स्वात्मनायक ।
त्राहि त्राहि कृपासिन्धो पूजां पूर्णतरां कुरु ॥१॥

अनया पूजया श्रीगुरुः प्रीयताम् ।
ॐ तत् सत् ब्रह्मार्पणमस्तु ॥२॥

तिष्ठ तिष्ठ परस्थाने स्वस्थाने परमेश्वर ।
यत्र ब्रह्मादयो देवाः सर्वे तिष्ठन्ति मे हृदि ॥३॥

ॐ नमः पार्वतीपतये हर हर महादेव ॥४॥

जपः –

(जप जाय्नाफुडे इष्टदेवतानुसार)

(देवीश्लोकः) –

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥५॥

(देवश्लोकः) –

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥६॥

# १४१. श्रीदेवीपूजनम्

ध्यानम् –

विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं
बिभ्राणाम् अनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥ १ ॥

सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्–
तारानायकशेखरां स्मितमुखीम् आपीनवक्षोरुहाम् ।
पाणिभ्याम् अलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत् पराम् अम्बिकाम्॥ २ ॥

सकुङ्कुमविलेपनाम् अलिकचुम्बिकस्तूरिकां
समन्दहसितेक्षणां सशरचापपाशाङ्कुशाम् ।
अशेषजनमोहिनीम् अरुणमाल्यभूषाम्बरां
जपाकुसुमभासुरां जपविधौ स्मरेद् अम्बिकाम् ॥ ३ ॥

ॐ श्रीमात्रे नमः । ध्यानं समर्पयामि ॥

आवाहनम् –

महापद्मवनान्तस्थे कारणानन्दविग्रहे ।
सर्वभूतहिते मातरेह्येहि परमेश्वरि ॥

ॐ श्रीमात्रे नमः । आवाहनं समर्पयामि ॥

आसनम् –

सदाशिवाङ्कसंस्थाने सर्वाधारे महेश्वरि ।
सर्वतत्त्वमयं दिव्यमासनं प्रतिगृह्यताम् ॥

ॐ श्रीमात्रे नमः । आसनार्थे पुष्पं समर्पयामि ॥

पाद्यम्

पाद्यमाद्यन्तशून्यायै वेद्यायै वेदवादिभिः ।
तुभ्यं दास्यामि पद्माक्षि सुगन्धिं निर्मलं जलम् ॥

ॐ श्रीमात्रे नमः । पादयोः पाद्यं समर्पयामि ॥

अर्घ्यम्

अघहीने गृहाणेदम् अर्घ्यम् अष्टाङ्ग-संयुतम् ।
अम्बाखिलानां जगताम् अम्बुजासन-वन्दिते ॥

ॐ श्रीमात्रे नमः । हस्तयोरर्घ्यं समर्पयामि ॥

आचमनम्

गङ्गातोयं समानीतं सुवर्णकलशे स्थितम् ।
आचम्यतां महाभागे भवानि भवभामिनि ॥

ॐ श्रीमात्रे नमः । आचमनीयं जलं समर्पयामि ॥

स्नानम्

साध्वीनामग्रतोगण्ये साधुसङ्घसमादृते ।
सर्वतीर्थमयं तोयं स्नानार्थं प्रतिगृह्यताम् ॥

ॐ श्रीमात्रे नमः । स्नानीयं जलं समर्पयामि ॥
स्नानान्ते आचमनीयं समर्पयामि ॥

वस्त्रम् -

दुकूलद्वितयं दिव्यं कञ्चुकं च मनोहरम् ।
देवदेवि गृहाणेदं दिगम्बरशिवप्रिये ॥

ॐ श्रीमात्रे नमः । वस्त्रोपवस्त्रं समर्पयामि ॥
तदन्ते आचमनीयं समर्पयामि ॥

यज्ञोपवीतम् –

उपवीतं गृहाणेदम् उपमाशून्यवैभवे ।
उमाहैमवति प्रीत्या हेमसूत्रसमन्वितम् ॥

ॐ श्रीमात्रे नमः । यज्ञोपवीतं समर्पयामि ॥
तदन्ते आचमनीयं समर्पयामि ॥

आभूषणम् –

माङ्गल्यमणिसंयुक्त–मुक्ताफलसमन्वितम् ।
दत्तं मङ्गलसूत्रं ते गृहाणाम्ब शुभं कुरु ॥

ॐ श्रीमात्रे नमः । नानालङ्काराणि समर्पयामि ॥

गन्धः –

कर्पूरागरुसंयुक्तं कपालिप्राणनायिके ।
कस्तूरीतिलकं गन्धं सर्वाङ्गे प्रतिगृह्यताम् ॥

ॐ श्रीमात्रे नमः । गन्धं समर्पयामि ॥

अक्षताः –

अक्षतान् धवलान् देवि शालीयांस्तण्डुलान् शुभान् ।
हरिद्राकुङ्कुमोपेतान् गृहाणाम्ब कृपानिधे ॥

ॐ श्रीमात्रे नमः । अक्षतान् समर्पयामि ॥

पुष्पम् –

पद्मशङ्खजपापुष्पैः पारिजातैश्च चम्पकैः ।
पूजयामि प्रसीद त्वं पद्माक्षि भुवनेश्वरि ॥

ॐ श्रीमात्रे नमः । पुष्पाणि समर्पयामि ॥

सौभाग्यद्रव्यम्

कज्जलं चैव सिन्दूरं हरिद्राकुङ्कुमानि च ।
भक्त्यार्पितानि श्रीमातः सौभाग्यानि च स्वीकुरु ॥

ॐ श्रीमात्रे नमः । सौभाग्यद्रव्याणि समर्पयामि ॥

श्रीदुर्गाष्टोत्तरशतनामावल्या सहित कुङ्कुमार्चने विनियोगः।

## श्रीदुर्गाष्टोत्तरशतनामावलिः

ॐ माहेश्वर्यै नमः ।
ॐ महादेव्यै नमः ।
ॐ जयन्त्यै नमः ।
ॐ सर्वमङ्गलायै नमः ।
ॐ लज्जायै नमः ।
ॐ भगवत्यै नमः ।
ॐ वन्द्यायै नमः ।
ॐ भवान्यै नमः ।
ॐ पापनाशिन्यै नमः ।
ॐ चण्डिकायै नमः । (१०)
ॐ कालरात्र्यै नमः ।
ॐ भद्रकाल्यै नमः ।
ॐ अपराजितायै नमः ।
ॐ महाविद्यायै नमः ।
ॐ महामेधायै नमः ।
ॐ महामायायै नमः ।
ॐ महाबलायै नमः ।
ॐ कात्यायन्यै नमः ।
ॐ जयायै नमः ।
ॐ दुर्गायै नमः । (२०)
ॐ मन्दारवनवासिन्यै नमः ।
ॐ आर्यायै नमः ।
ॐ गिरिसुतायै नमः ।
ॐ धात्र्यै नमः ।
ॐ महिषासुरघातिन्यै नमः ।
ॐ सिद्धिदायै नमः ।
ॐ बुद्धिदायै नमः ।
ॐ नित्यायै नमः ।
ॐ वरदायै नमः ।
ॐ वरवर्णिन्यै नमः । (३०)
ॐ अम्बिकायै नमः ।
ॐ सुखदायै नमः ।

ॐ सौम्यायै नमः ।
ॐ जगन्मात्रे नमः ।
ॐ शिवप्रियायै नमः ।
ॐ भक्तसन्तापसंहर्त्र्यै नमः ।
ॐ सर्वकामप्रपूरिण्यै नमः ।
ॐ जगत्कर्त्र्यै नमः ।
ॐ जगद्धात्र्यै नमः ।
ॐ जगत्पालनतत्परायै नमः। (४०)
ॐ अव्यक्तायै नमः ।
ॐ व्यक्तरूपायै नमः ।
ॐ भीमायै नमः ।
ॐ त्रिपुरसुन्दर्यै नमः ।
ॐ अपर्णायै नमः ।
ॐ ललितायै नमः ।
ॐ वेद्यायै नमः ।
ॐ पूर्णचन्द्रनिभाननायै नमः।
ॐ चामुण्डायै नमः ।
ॐ चतुरायै नमः । (५०)
ॐ चन्द्रायै नमः ।
ॐ गुणत्रयविभाविन्यै नमः ।
ॐ हेरम्बजनन्यै नमः ।
ॐ काल्यै नमः ।
ॐ त्रिगुणायै नमः ।
ॐ यशोधारिण्यै नमः ।
ॐ उमायै नमः ।
ॐ कलशहस्तायै नमः ।
ॐ दैत्यदर्पनिषूदिन्यै नमः ।
ॐ बुद्ध्यै नमः । (६०)
ॐ कान्त्यै नमः ।
ॐ क्षमायै नमः ।
ॐ शान्त्यै नमः ।
ॐ पुष्ट्यै नमः ।
ॐ तुष्ट्यै नमः ।
ॐ धृत्यै नमः ।
ॐ मत्यै नमः ।
ॐ वरायुधधरायै नमः ।
ॐ धीरायै नमः ।
ॐ गौर्यै नमः । (७०)
ॐ शाकम्भर्यै नमः ।
ॐ शिवायै नमः ।
ॐ अष्टसिद्धिप्रदायै नमः ।
ॐ वामायै नमः ।
ॐ शिववामाङ्गवासिन्यै नमः ।
ॐ धर्मदायै नमः ।
ॐ धनदायै नमः ।
ॐ श्रीदायै नमः ।
ॐ कामदायै नमः ।
ॐ मोक्षदायै नमः । (८०)

ॐ अपरायै नमः ।
ॐ चित्स्वरूपायै नमः ।
ॐ चिदानन्दायै नमः ।
ॐ जयश्रियै नमः ।
ॐ जयदायिन्यै नमः ।
ॐ सर्वमङ्गल-माङ्गल्यायै नमः ।
ॐ जगत्त्रयहितैषिण्यै नमः ।
ॐ शर्वाण्यै नमः ।
ॐ पार्वत्यै नमः ।
ॐ धन्यायै नमः । (९०)
ॐ स्कन्दमात्रे नमः ।
ॐ अखिलेश्वर्यै नमः ।
ॐ प्रपन्नार्तिहरायै नमः ।
ॐ देव्यै नमः ।
ॐ सुभगायै नमः ।
ॐ कामरूपिण्यै नमः ।
ॐ निराकारायै नमः ।
ॐ साकारायै नमः ।
ॐ महाकाल्यै नमः ।
ॐ सुरेश्वर्यै नमः । (१००)
ॐ श्रद्धायै नमः ।
ॐ ध्रुवायै नमः ।
ॐ कृत्यायै नमः ।
ॐ मृडान्यै नमः ।
ॐ भक्तवत्सलायै नमः ।
ॐ सर्वशक्तिसमायुक्तायै नमः ।
ॐ शरण्यायै नमः ।
ॐ सर्वकामदायै नमः।(१०८)

धूपः -

धूपं ददामि ते रम्यं गुग्गुलागरुमिश्रितम् ।
गृहाणेमं महादेवि भक्तानामिष्टदायिनि ॥

ॐ श्रीमात्रे नमः । धूपम् आघ्रापयामि ॥

दीपः -

आज्यवर्तियुतं दीपं नगेन्द्रकुलदीपिके ।
अम्ब पश्य मया दत्तम् अन्तर्ध्वान्तापहारिणि ॥

ॐ श्रीमात्रे नमः । दीपं दर्शयामि ॥

नैवेद्यम् -

हस्तौ प्रक्षाल्य नैवेद्यं पुरतः स्थाप्य गायत्र्या सम्प्रोक्ष्य तुलसीदलैः आच्छाद्य नैवेद्यम् ।

ॐ कात्यायनाय विद्महे कन्याकुमार्यै धीमहि ।
तन्नो दुर्गिः प्रचोदयात् ॥१॥

ॐ प्राणाय स्वाहा
ॐ अपानाय स्वाहा
ॐ व्यानाय स्वाहा
ॐ उदानाय स्वाहा
ॐ समानाय स्वाहा
ॐ प्राण-अपान-व्यान-उदान-समानाः ॥२॥

ॐ श्रीमात्रे नमः । आचमनीयं समर्पयामि ॥
पूर्वापोषणं समर्पयामि ।

नानाविधानि भक्ष्याणि व्यञ्जनानि हरप्रिये ।
यथेष्टं भुङ्क्ष्व नैवेद्यं षड्रसं च चतुर्विधम् ॥४॥

ॐ श्रीमात्रे नमः। नैवेद्यं निवेदयामि।
नानाऋतुफलानि च समर्पयामि॥

आचमनीयं समर्पयामि ।
उत्तरापोषणं समर्पयामि ।
मुखप्रक्षालनं समर्पयामि ।
हस्तप्रक्षालनं समर्पयामि ।
करोद्वर्तनार्थे चन्दनं समर्पयामि ।

ताम्बूलम् – ताम्बूलं मुक्तिकाचूर्णकर्पूरादिसमन्वितम् ।
जिह्वाजाड्योच्छेदकरं त्रिपुरे प्रतिगृह्यताम् ॥
ॐ श्रीमात्रे नमः । मुखशुद्ध्यर्थं ताम्बूलं समर्पयामि ॥

दक्षिणा – पूजापूर्णत्वसिद्ध्यर्थं पूर्णे पूर्णफलप्रदे ।
हेमरत्नमयीं द्रव्यदक्षिणां स्वीकुरुष्व मे ॥
ॐ श्रीमात्रे नमः। साङ्गतासिद्ध्यर्थं हिरण्यगर्भदक्षिणां समर्पयामि॥

नीराजनम् – कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥३॥

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देव देव ॥४॥

माया कुण्डलिनी क्रिया मधुमती काली कलामालिनी
मातङ्गी विजया जया भगवती देवी शिवा शाम्भवी ।
शक्तिः शङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी
ह्रींकारी त्रिपुरा परात्परमयी माता कुमारीत्यसि ॥१॥

अन्तस्तेजो बहिस्तेजः एकीकृत्यामितप्रभम् ।
त्रिधा देवि परिभ्राम्य नीराजनं निवेदये ॥२॥

समस्तचक्रचक्रेशीयुते देवि नवात्मिके ।
आरार्तिकं मया दत्तं गृहाणाशेषसिद्धये ॥३॥

ॐ श्रीमात्रे नमः। नीराजनं दर्शयामि।
तदन्ते जलारार्तिकं समर्पयामि॥

देवाभिवन्दनम् । आत्माभिवन्दनम् ॥

मन्त्रपुष्पाञ्जलिः –

पुष्पाञ्जलिं गृहाणेमं परब्रह्मस्वरूपिणि ।
भक्त्या समर्पितं देवि प्रसन्ना भव सर्वदा ॥

ॐ श्रीमात्रे नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

प्रदक्षिणा –

सर्वमङ्गललाभाय सर्वपापनिवृत्तये ।
प्रदक्षिणां करोम्यम्ब प्रसीद परमेश्वरि ॥

ॐ श्रीमात्रे नमः । प्रदक्षिणां समर्पयामि ॥

प्रार्थना–

चरणकमलयुग्मं पङ्कजैः पूजयित्वा
कनककमलमालां कण्ठदेशेऽर्पयित्वा ।
शिरसि विनिहितोऽयं रक्तपुष्पाञ्जलिस्ते
हृदयकमलमध्ये देवि हर्षं तनोतु ।
हृदयकमलमध्ये देवि हर्षं तनोतु ॥

ॐ श्रीमात्रे नमः । प्रार्थनां समर्पयामि ॥

नमस्कारः–

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥

ॐ श्रीमात्रे नमः । नमस्करोमि ॥

विशेषार्घ्यम् –

कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे ।
गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥

ॐ श्रीमात्रे नमः । विशेषार्घ्यं समर्पयामि ॥

प्रार्थनापूर्वकं क्षमापनम् –

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥१॥

अपराधो भवत्येव सेवकस्य पदे पदे ।
कोऽपरः सहते लोके केवलं मातरं विना ॥२॥

ॐ श्रीमात्रे नमः । प्रार्थनापूर्वकं क्षमां याचे ॥

समर्पणम् –

जपो जल्पश्शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः ।
प्रणामस्संवेशस्सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ॥१॥

अनेन कृतेन पूजाराधनाकर्मणा श्रीजगदम्बा परासंवित्
स्वरूपिणी प्रीयताम् ।
ॐ तत् सत् ब्रह्मार्पणमस्तु जगदम्बार्पणमस्तु ॥२॥

तिष्ठ तिष्ठ परस्थाने स्वस्थाने परमेश्वरि ।
यत्र ब्रह्मादयो देवाः सर्वे तिष्ठन्ति मे हृदि ॥३॥

ॐ नमः पार्वतीपतये हर हर महादेव ॥४॥

जपः –

(जप जाय्नाफुडे इष्टदेवतानुसार)

(देवीश्लोकः) – गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥५॥

(देवश्लोकः) – गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥६॥

## १४२. श्रीवल्लीभुवनेश्वर्यष्टोत्तरशतनामावलिः

ॐ ह्रीं शिरालीक्षेत्रचैतन्यायै नमो नमः।
ॐ ह्रीं श्रीचित्रापुरवासिन्यै नमो नमः।
ॐ ह्रीं मठप्रासादसाम्राज्यै नमो नमः।
ॐ ह्रीं श्रीवल्लीभुवनेश्वर्यै नमो नमः।
ॐ ह्रीं आराध्यार्धाङ्गिनीपूर्णायै नमो नमः।
ॐ ह्रीं भवानीशङ्करप्रियायै नमो नमः।
ॐ ह्रीं रामाञ्जनेयचिद्राण्यै नमो नमः।
ॐ ह्रीं गणेशस्नेहसन्धितायै नमो नमः।
ॐ ह्रीं क्षेत्रपालकजागर्य्यायै नमो नमः।
ॐ ह्रीं गुरुपरम्परागिरायै नमो नमः।(१०)
ॐ ह्रीं दक्षिणामूर्तिमौनाभायै नमो नमः।
ॐ ह्रीं भाष्यकारान्तरङ्गिण्यै नमो नमः।
ॐ ह्रीं आश्रमसम्प्रदायाद्यायै नमो नमः।
ॐ ह्रीं आश्रमवंशसूत्रिकायै नमो नमः
ॐ ह्रीं परिज्ञानेडितैश्वर्यायै नमो नमः।
ॐ ह्रीं परिज्ञानजधर्मधृते नमो नमः
ॐ ह्रीं सारस्वतसमाराध्यायै नमो नमः।
ॐ ह्रीं वात्स्ल्यपूर्णविग्रहायै नमो नमः
ॐ ह्रीं सहस्रांशुलसत्कायायै नमो नमः।
ॐ ह्रीं पीयूषनिधिकैरव्यै नमो नमः। (२०)
ॐ ह्रीं लसच्चन्द्रकलाधात्र्यै नमो नमः।
ॐ ह्रीं यौवनोत्पलसौरभ्यै नमो नमः।
ॐ ह्रीं रक्तचन्दनवर्णाङ्ग्यै नमो नमः।
ॐ ह्रीं चन्द्रार्कवह्निलोचनायै नमो नमः।
ॐ ह्रीं स्मितालङ्कृतबिम्बौष्ठायै नमो नमः।
ॐ ह्रीं पीनोत्तुङ्गकुचद्वय्यै नमो नमः।

ॐ ह्रीं वेदवेदाङ्गपादाब्जायै नमो नमः।
ॐ ह्रीं कुञ्चिततनुमध्यमायै नमो नमः।
ॐ ह्रीं वरदभीतिहामुद्रायै नमो नमः।
ॐ ह्रीं पाशाङ्कुशसुयन्त्रणायै नमो नमः। (३०)
ॐ ह्रीं नागालङ्कृतधम्मिल्लायै नमो नमः।
ॐ ह्रीं केतक्यङ्कितवेणिधृते नमो नमः।
ॐ ह्रीं पद्मनिहितपादाङ्ग्च्यै नमो नमः।
ॐ ह्रीं पन्नगेश्वरमेखलायै नमो नमः।
ॐ ह्रीं नानावर्णाम्बरोपेतायै नमो नमः।
ॐ ह्रीं नानाभावाङ्कितेक्षणायै नमो नमः।
ॐ ह्रीं दर्शनात्पापभस्मीकृते नमो नमः।
ॐ ह्रीं जपादकालमृत्युहायै नमो नमः।
ॐ ह्रीं शिवगुरुकृपापाङ्ग्च्यै नमो नमः ।
ॐ ह्रीं दीर्घजाड्यविनाशिन्यै नमो नमः । (४०)
ॐ ह्रीं मन्त्रोपदिष्टसङ्गोप्त्र्यै नमो नमः ।
ॐ ह्रीं अक्षमालाविलासिन्यै नमो नमः।
ॐ ह्रीं वाग्बीजध्यानसन्तुष्टायै नमो नमः।
ॐ ह्रीं ह्रींकाराक्षररूपिण्यै नमो नमः।
ॐ ह्रीं ह्रींकारमणिचित्राङ्ग्च्यै नमो नमः।
ॐ ह्रीं ह्रींबीजविश्वकारिण्यै नमो नमः।
ॐ ह्रीं ह्रींकारवनसारङ्ग्च्यै नमो नमः ।
ॐ ह्रीं ह्रींकारकलशामृतायै नमो नमः ।
ॐ ह्रीं ह्रींकारमन्त्रसंलभ्यायै नमो नमः ।
ॐ ह्रीं ह्रींमन्त्रोपासनास्फुरायै नमो नमः । (५०)
ॐ ह्रीं सुव्रतार्चितहृल्लेखायै नमो नमः ।
ॐ ह्रीं तापसार्चिततत्पदायै नमो नमः ।
ॐ ह्रीं विविक्तचित्तसंव्यक्तायै नमो नमः।

ॐ ह्रीं अम्बुजदलमातृकायै नमो नमः।
ॐ ह्रीं हृदम्भोजपराबीजायै नमो नमः।
ॐ ह्रीं पश्यन्तीस्फुटपल्लव्यै नमो नमः।
ॐ ह्रीं मध्यमाकलिकाभूतायै नमो नमः।
ॐ ह्रीं पूर्णफुल्लितवैखर्यै नमो नमः।
ॐ ह्रीं ह्रींकारमन्त्रचित्तस्थायै नमो नमः ।
ॐ ह्रीं क्षेत्रमण्डलिनीश्वर्यै नमो नमः । (६०)
ॐ ह्रीं आधारकुण्डलीरूपायै नमो नमः ।
ॐ ह्रीं सहस्रदलगामिन्यै नमो नमः ।
ॐ ह्रीं सुषुम्नानाडिसङ्गन्त्र्यै नमो नमः ।
ॐ ह्रीं क्षेत्रषट्चक्रभेदिन्यै नमो नमः ।
ॐ ह्रीं शाम्भववेधसद्दीक्षायै नमो नमः ।
ॐ ह्रीं द्वादशान्तनिवासिन्यै नमो नमः ।
ॐ ह्रीं जपफलप्रदायित्र्यै नमो नमः।
ॐ ह्रीं चिद्विमर्शतरङ्गिण्यै नमो नमः ।
ॐ ह्रीं श्रीसारस्वतयुक्ताङ्गच्यै नमो नमः ।
ॐ ह्रीं शब्दार्थसूक्ष्मदृष्टिदायै नमो नमः। (७०)
ॐ ह्रीं वाणीब्रह्माण्डसाम्राज्यै नमो नमः।
ॐ ह्रीं चिदाकाशतडिल्लतायै नमो नमः ।
ॐ ह्रीं त्रैलोक्यव्याप्तहृल्लेखायै नमो नमः।
ॐ ह्रीं सूक्तिवीणासुवादिन्यै नमो नमः ।
ॐ ह्रीं छन्दश्शास्त्रमहेशान्यै नमो नमः।
ॐ ह्रीं काव्यालङ्कारमोदिन्यै नमो नमः।
ॐ ह्रीं सुधामाधुर्यसम्पूर्णायै नमो नमः ।
ॐ ह्रीं सर्वशास्त्रविशारदायै नमो नमः।
ॐ ह्रीं तत्त्वातीतपराशक्त्यै नमो नमः ।
ॐ ह्रीं दहराकाशविस्तृतायै नमो नमः । (८०)

ॐ ह्रीं अवकाशप्रदायित्र्यै नमो नमः ।
ॐ ह्रीं बाह्याकाशविधायिन्यै नमो नमः ।
ॐ ह्रीं शुश्रूषुसुष्ठुताकर्त्र्यै नमो नमः ।
ॐ ह्रीं शुश्रूषुगुरुवाक्यदायै नमो नमः ।
ॐ ह्रीं सच्छिष्यकार्यसङ्कर्त्र्यै नमो नमः ।
ॐ ह्रीं सच्छिष्य गुरुलक्ष्यदायै नमो नमः ।
ॐ ह्रीं दिव्यकार्यस्थितस्फूर्त्यै नमो नमः ।
ॐ ह्रीं गुरुसङ्केतदर्शन्यै नमो नमः ।
ॐ ह्रीं गुरुकार्यस्थसन्त्वक्रायै नमो नमः
ॐ ह्रीं कार्यसिद्धिप्रदायिन्यै नमो नमः । (९०)
ॐ ह्रीं अर्पितकार्यसन्तुष्टायै नमो नमः ।
ॐ ह्रीं कृतव्रतोत्सवार्चितायै नमो नमः ।
ॐ ह्रीं क्षमायाचनसन्तृप्तायै नमो नमः ।
ॐ ह्रीं प्रायश्चित्तप्रकाशितायै नमो नमः ।
ॐ ह्रीं तपःसिद्धिददन्नित्यायै नमो नमः ।
ॐ ह्रीं नतदोषनिवारिण्यै नमो नमः ।
ॐ ह्रीं नतचित्तविवेकाच्र्च्यै नमो नमः ।
ॐ ह्रीं सेवापूतविरागदायै नमो नमः ।
ॐ ह्रीं षट्सम्पत्तिपराकोशायै नमो नमः ।
ॐ ह्रीं भवार्णवैकतारिण्यै नमो नमः । (१००)
ॐ ह्रीं सर्वतीर्थसमायुक्तायै नमो नमः ।
ॐ ह्रीं अनुग्रहवहन्नद्यै नमो नमः ।
ॐ ह्रीं स्वतन्त्रतासुगन्धाढ्यायै नमो नमः ।
ॐ ह्रीं सच्छिष्यार्हविभूतिदायै नमो नमः ।
ॐ ह्रीं सच्चिदानन्दहृल्लेखायै नमो नमः ।
ॐ ह्रीं गाम्भीर्यतोषलक्षितायै नमो नमः ।
ॐ ह्रीं स्वानन्दनिर्झरीयोन्यै नमो नमः ।
ॐ ह्रीं श्रीश्रीपूर्णकलामय्यै नमो नमः । (१०८)

## १४३. श्रीललिताष्टोत्तरशतनामावलिः

ॐ ऐं ह्रीं श्रीं

ॐ रजताचलशृङ्गाग्रमध्यस्थायै नमो नमः ।
ॐ हिमाचलमहावंशपावनायै नमो नमः ।
ॐ शङ्करार्धाङ्गसौन्दर्यशरीरायै नमो नमः ।
ॐ लसन्मरकतस्वच्छविग्रहायै नमो नमः ।
ॐ महातिशयसौन्दर्यलावण्यायै नमो नमः ।
ॐ शशाङ्कशेखरप्राणवल्लभायै नमो नमः ।
ॐ सदा-पञ्चदशात्मैक्यस्वरूपायै नमो नमः ।
ॐ वज्रमाणिक्यकटककिरीटायै नमो नमः ।
ॐ कस्तूरीतिलकोद्भासिनिटिलायै नमो नमः ।
ॐ भस्मरेखाङ्कितलसन्मस्तकायै नमो नमः । (१०)
ॐ विकचाम्भोरुहदललोचनायै नमो नमः ।
ॐ शरच्चाम्पेयपुष्पाभनासिकायै नमो नमः ।
ॐ लसत्कनकताटङ्कयुगलायै नमो नमः ।
ॐ मणिदर्पणसङ्काशकपोलायै नमो नमः ।
ॐ ताम्बूलपूरितस्मेरवदनायै नमो नमः ।
ॐ सुपक्वदाडिमीबीजरदनायै नमो नमः ।
ॐ कम्बुपूगसमच्छायकन्धरायै नमो नमः ।
ॐ स्थूलमुक्ताफलोदारसुहारायै नमो नमः ।
ॐ गिरीशबद्धमाङ्गल्यमङ्गलायै नमो नमः ।
ॐ पद्मपाशाङ्कुशलसत्कराब्जायै नमो नमः । (२०)
ॐ पद्मकैरवमन्दारसुमालिन्यै नमो नमः ।
ॐ सुवर्णकुम्भयुग्माभसुकुचायै नमो नमः ।
ॐ रमणीयचतुर्बाहुसंयुक्तायै नमो नमः ।

ॐ कनकाङ्गदकेयूरभूषितायै नमो नमः ।
ॐ बृहत्सौवर्णसौन्दर्यवसनायै नमो नमः ।
ॐ बृहन्नितम्बविलसज्जघनायै नमो नमः ।
ॐ सौभाग्यजातशृङ्गारमध्यमायै नमो नमः ।
ॐ दिव्यभूषणसन्दोहरञ्जितायै नमो नमः ।
ॐ पारिजातगुणाधिक्यपदाब्जायै नमो नमः ।
ॐ सुपद्मरागसङ्काशचरणायै नमो नमः । (३०)
ॐ कामकोटिमहापद्मपीठस्थायै नमो नमः ।
ॐ श्रीकण्ठनेत्रकुमुदचन्द्रिकायै नमो नमः ।
ॐ सचामररमावाणीवीजितायै नमो नमः ।
ॐ भक्तरक्षणदाक्षिण्यकटाक्षायै नमो नमः ।
ॐ भूतेशालिङ्गनोद्भूतपुलकाङ्ग्यै नमो नमः ।
ॐ अनङ्गजनकापाङ्गवीक्षणायै नमो नमः ।
ॐ ब्रह्मोपेन्द्रशिरोरत्नरञ्जितायै नमो नमः ।
ॐ शचीमुख्यामरवधूसेवितायै नमो नमः ।
ॐ लीलाकल्पितब्रह्माण्डमण्डलायै नमो नमः ।
ॐ अमृतादिमहाशक्तिसंवृतायै नमो नमः । (४०)
ॐ एकातपत्रसाम्राज्यदायिकायै नमो नमः ।
ॐ सनकादिसमाराध्यपादुकायै नमो नमः ।
ॐ कलशोद्भवदुर्वासपूजितायै नमो नमः ।
ॐ देवर्षिभिस्स्तूयमानवैभवायै नमो नमः ।
ॐ मत्तेभवक्त्रषड्वक्त्रवत्सलायै नमो नमः ।
ॐ चक्रराजमहायन्त्रमध्यवर्तिन्यै नमो नमः ।
ॐ चिदग्निकुण्डसम्भूतसुदेहायै नमो नमः ।
ॐ शशाङ्कखण्डसंयुक्तमुकुटायै नमो नमः ।
ॐ मत्तहंसवधूमन्दगमनायै नमो नमः ।

ॐ वन्दारुजनसन्दोहवन्दितायै नमो नमः । (५०)
ॐ अन्तर्मुखजनानन्दफलदायिन्यै नमो नमः ।
ॐ पतिव्रताङ्गनाभीष्टफलदायै नमो नमः ।
ॐ अव्याजकरुणापूरपूरितायै नमो नमः ।
ॐ निरञ्जनसच्चिदानन्दसंयुक्तायै नमो नमः ।
ॐ सहस्रसूर्यसंयुक्तप्रकाशायै नमो नमः ।
ॐ रत्नचिन्तामणिगृहमध्यस्थायै नमो नमः ।
ॐ हानिवृद्धिगुणाधिक्यरहितायै नमो नमः ।
ॐ महापद्माटवीमध्यनिवासायै नमो नमः ।
ॐ जाग्रत्स्वप्नसुषुप्तीनां साक्षिभूत्यै नमो नमः ।
ॐ महातापौघपापानां विनाशिन्यै नमो नमः । (६०)
ॐ दुष्टभीतिमहाभीतिभञ्जनायै नमो नमः ।
ॐ समस्तदेवदनुजप्रेरिकायै नमो नमः ।
ॐ समस्तहृदयाम्भोजनिलयायै नमो नमः ।
ॐ अनाहतमहापद्ममन्दिरायै नमो नमः ।
ॐ सहस्रारसरोजातवासितायै नमो नमः ।
ॐ पुनरावृत्तिरहितपुरस्थायै नमो नमः ।
ॐ वाणीगायत्रीसावित्रीसन्नुतायै नमो नमः ।
ॐ नीलारमाभूसम्पूज्यपादाब्जायै नमो नमः ।
ॐ लोपामुद्रार्चितश्रीमच्चरणायै नमो नमः ।
ॐ सहस्ररतिसौन्दर्यशरीरायै नमो नमः । (७०)
ॐ भावनामात्रसन्तुष्टहृदयायै नमो नमः ।
ॐ नतसम्पूर्णविज्ञानसिद्धिदायै नमो नमः ।
ॐ त्रिलोचनकृतोल्लासफलदायै नमो नमः ।
ॐ श्रीसुधाब्धिमणिद्वीपमध्यगायै नमो नमः ।
ॐ दक्षाध्वरविनिर्भेदसाधनायै नमो नमः ।

ॐ श्रीनाथसोदरीभूतशोभितायै नमो नमः ।
ॐ चन्द्रशेखरभक्तार्तिभञ्जनायै नमो नमः ।
ॐ सर्वोपाधिविनिर्मुक्तचैतन्यायै नमो नमः ।
ॐ नामपारायणाभीष्टफलदायै नमो नमः ।
ॐ सृष्टिस्थितितिरोधानसङ्कल्पायै नमो नमः । (८०)
ॐ श्रीषोडशाक्षरीमन्त्रमध्यगायै नमो नमः ।
ॐ अनाद्यन्तस्वयम्भूतदिव्यमूर्त्यै नमो नमः ।
ॐ भक्तहंसवतीमुख्यनियोगायै नमो नमः ।
ॐ मातृमण्डलसंयुक्तललितायै नमो नमः ।
ॐ भण्डदैत्यमहासत्त्वनाशनायै नमो नमः ।
ॐ क्रूरभण्डशिरच्छेदनिपुणायै नमो नमः ।
ॐ धात्रच्युतसुराधीशसुखदायै नमो नमः ।
ॐ चण्डमुण्डनिशुम्भादिखण्डनायै नमो नमः ।
ॐ रक्ताक्षरक्तजिह्वादिशिक्षणायै नमो नमः ।
ॐ महिषासुरदोर्वीर्यनिग्रहायै नमो नमः । (९०)
ॐ अभ्रकेशमहोत्साहकारणायै नमो नमः ।
ॐ महेशयुक्तनटनतत्परायै नमो नमः ।
ॐ निजभर्तृमुखाम्भोजचिन्तनायै नमो नमः ।
ॐ वृषभध्वजविज्ञानतपःसिद्ध्यै नमो नमः ।
ॐ कामक्रोधादिषड्वर्गनाशनायै नमो नमः ।
ॐ जन्ममृत्युजरारोगभञ्जनायै नमो नमः ।
ॐ विरक्तिभक्तिविज्ञानसिद्धिदायै नमो नमः ।
ॐ राजराजार्चितपदसरोजायै नमो नमः ।
ॐ सर्ववेदान्तसिद्धान्तसुतत्त्वायै नमो नमः ।
ॐ श्रीवीरभक्तविज्ञाननिधानायै नमो नमः । (१००)
ॐ अशेषदुष्टदनुजसूदनायै नमो नमः ।

ॐ साक्षात्श्रीदक्षिणामूर्तिमनोज्ञायै नमो नमः ।
ॐ हयमेधाग्रसम्पूज्यमहिमायै नमो नमः ।
ॐ दक्षप्रजापतिसुतावेषाढ्यायै नमो नमः ।
ॐ कुसुमबाणेक्षुकोदण्डमण्डितायै नमो नमः ।
ॐ नित्ययौवनमाङ्गल्यमङ्गलायै नमो नमः ।
ॐ महादेवसमायुक्तमहादेव्यै नमो नमः ।
ॐ चतुर्विंशतितत्त्वैकस्वरूपायै नमो नमः । (१०८)

*॥ श्रीललिताष्टोत्तरशतनामावलिः सम्पूर्णा ॥*

## १४४. श्रीगौर्यष्टोत्तरशतनामावलिः

ॐ महामनोन्मणीशक्त्यै नमः
शिवशक्त्यै नमः
शिवङ्कर्यै नमः
इच्छाशक्तिक्रियाशक्ति-
ज्ञानशक्तिस्वरूपिण्यै नमः
शान्त्यतीत-कलानन्दायै नमः
शिवमायायै नमः
शिवप्रियायै नमः
सर्वज्ञायै नमः
सुन्दर्यै नमः
सौम्यायै नमः (१०)
सच्चिदानन्दरूपिण्यै नमः
परापरामय्यै नमः
बालायै नमः
ॐ त्रिपुरायै नमः
कुण्डल्यै नमः
शिवायै नमः
रुद्राण्यै नमः
विजयायै नमः
सर्वायै नमः
शर्वाण्यै नमः (२०)
भुवनेश्वर्यै नमः
कल्याण्यै नमः
शूलिन्यै नमः
कान्तायै नमः
महात्रिपुरसुन्दर्यै नमः
मालिन्यै नमः
मानिन्यै नमः

ॐ मदनोल्लासमोहिन्यै नमः
माहेश्वर्यै नमः
मातङ्ग्यै नमः (३०)
शिवकाम्यै नमः
चिदात्मिकायै नमः
कामाक्ष्यै नमः
कमलाक्ष्यै नमः
मीनाक्ष्यै नमः
सर्वसाक्षिण्यै नमः
उमादेव्यै नमः
महाकाल्यै नमः
सामायै नमः
सर्वजनप्रियायै नमः (४०)
चित्पुरायै नमः
चिद्घनानन्दायै नमः
चिन्मय्यै नमः
चित्स्वरूपिण्यै नमः
महासरस्वत्यै नमः
दुर्गायै नमः
ज्वालादुर्गादिमोहिन्यै नमः
नकुल्यै नमः
शुध्दविद्यायै नमः
सच्चिदानन्दविग्रहायै नमः (५०)
सुप्रभायै नमः
सुप्रभाज्वालायै नमः
इन्द्राक्ष्यै नमः

ॐ सर्वमोहिन्यै नमः
महेन्द्रजालमध्यस्थायै नमः
मायायै नमः
मायाविनोदिन्यै नमः
विश्वेश्वर्यै नमः
वृषारूढायै नमः
विद्याजालविनोदिन्यै नमः (६०)
मन्त्रेश्वर्यै नमः
महालक्ष्म्यै नमः
महाकालीफलप्रदायै नमः
चतुर्वेदविशेषज्ञायै नमः
सावित्र्यै नमः
सर्वदेवतायै नमः
महेन्द्राण्यै नमः
गणाध्यक्षायै नमः
महाभैरवपूजितायै नमः
महामायायै नमः (७०)
महाघोरायै नमः
महादेव्यै नमः
मलापहायै नमः
महिषासुरसंहार्यै नमः
चण्डमुण्डकुलान्तकायै नमः
चक्रेश्वर्यै नमः
चतुर्वेद्यै नमः
सर्वदायै नमः
सुरनायिकायै नमः

ॐ षट्शास्त्रनिपुणायै नमः (८०)
नित्यायै नमः
षड्दर्शनविचक्षणायै नमः
कालरात्र्यै नमः
कलातीतायै नमः
कविराजमनोहरायै नमः
शारदातिलकाकारायै नमः
धीरायै नमः
धीरजनप्रियायै नमः
उग्रमार्यै नमः
महामार्यै नमः (९०)
क्षिप्रमार्यै नमः
रणप्रियायै नमः
अन्नपूर्णेश्वर्यै नमः
मात्रे नमः

ॐ स्वर्णाकारतटित्प्रभायै नमः
स्वरव्यञ्जनवर्णाढ्यै नमः
गद्यपद्यादिकारणायै नमः
पदवाक्यार्थनिलयायै नमः
बिन्दुनादादिकारणायै नमः
मोक्षेशमहिष्यै नमः (१००)
सत्यायै नमः
भुक्तिमुक्तिफलप्रदायै नमः
विज्ञानदायिन्यै नमः
प्रज्ञायै नमः
प्रत्यभिज्ञास्वरूपिण्यै नमः
महाव्यामोहशमन्यै नमः
महागौर्यै नमः
महाव्रतायै नमः (१०८)

## १४५. श्रीसंविदष्टोत्तरशतनामावलि

ॐ ॐ संवित्स्वरूपिण्यै नमः ।
ॐ देव्यै नमः ।
ॐ सदसद्रूपधारिण्यै नमः ।
ॐ स्वानन्दोज्जृम्भितायै नमः ।
ॐ भूम्ने नमः ।
ॐ स्वात्मभूतिप्रतिष्ठितायै नमः।
ॐ जगत्प्रविष्टायै नमः ।
ॐ स्वच्छन्दायै नमः ।
ॐ शिवायै नमः ।
ॐ चित्ताब्जहंसिकायै नमः । (१०)
ॐ शुद्धाशुद्धाध्वगायै नमः ।
ॐ स्पन्दशक्त्यै नमः ।
ॐ सोहंजपरतायै नमः ।
ॐ चिदाकाशायै नमः ।
ॐ चिन्मुकुरायै नमः ।
ॐ स्वबिम्बितजगत्-त्रयायै नमः ।
ॐ प्रतिबोधसुसंवेद्यायै नमः ।
ॐ मरीचिकृतविस्तरायै नमः ।

ॐ प्रत्यग्रूपायै नमः ।
ॐ पराकाष्ठायै नमः । (२०)
ॐ पञ्चकोशविलक्षणायै नमः ।
ॐ पञ्चकृत्यायै नमः ।
ॐ निष्प्रपञ्चायै नमः ।
ॐ प्रणवार्थायै नमः ।
ॐ परावरायै नमः ।
ॐ सर्वोपाधिविनिर्मुक्तायै नमः ।
ॐ सर्वावस्थाविवर्जितायै नमः ।
ॐ सत्तास्फूर्तिपदद्वन्द्वायै नमः ।
ॐ दग्धकर्मेन्धनानलायै नमः ।
ॐ चिदग्निकुण्डसम्भूतायै नमः। (३०)
ॐ ह्रींकार-रव-बोधितायै नमः ।
ॐ चक्रान्तस्थायै नमः ।
ॐ चेत्यलयायै नमः ।
ॐ चराचरविलासिन्यै नमः ।
ॐ चित्सभा-नर्तक्यै नमः।
ॐ विश्वचित्रभित्त्यै नमः ।
ॐ स्वयम्प्रभायै नमः ।
ॐ त्रिस्थायै नमः ।
ॐ त्रिगुणवेषाढ्यायै नमः ।
ॐ त्रिपुटी-त्रोटनोत्सुकायै नमः।(४०)
ॐ देशिकायै नमः ।
ॐ दक्षिणायै नमः ।
ॐ दीक्षायै नमः ।
ॐ दहराकाशचन्द्रिकायै नमः ।
ॐ श्रीदक्षिणामूर्तिमुद्रायै नमः ।
ॐ अनुत्तमायै नमः ।
ॐ मौनवार्त्तिकायै नमः ।
ॐ श्रीशाम्भव्यै नमः ।
ॐ शिष्यपाशच्छेददक्षार्द्र-
वीक्षणायै नमः ।
ॐ सहस्रारायै नमः । (५०)
ॐ सुधाधारायै नमः ।
ॐ सावित्र्यै नमः ।
ॐ कुलकुण्डल्यै नमः ।
ॐ सकलग्रन्थिभिदुरायै नमः ।
ॐ सोमार्कशिखिलोचन्यै नमः ।
ॐ विश्वरूपायै नमः ।
ॐ तैजसाख्यायै नमः ।
ॐ अव्यक्तसंज्ञायै नमः ।
ॐ अमृतकलायै नमः ।
ॐ विकल्पवर्जितायै नमः ।(६०)
ॐ मिथ्याकालदेशोत्थवैभवायै नमः।
ॐ विक्षेपावरणास्पृष्टायै नमः ।
ॐ निर्निमेषायै नमः ।
ॐ विमर्शिण्यै नमः ।
ॐ इदम्पदायै नमः ।
ॐ अहंवदनायै नमः ।
ॐ मायाघटितमध्यमायै नमः ।
ॐ वेदागमस्तनितायै नमः ।
ॐ मात्रे नमः ।

ॐ समरसाकृत्यै नमः । (७०)
ॐ पण्डायै नमः ।
ॐ अखण्डाकारवृत्यै नमः ।
ॐ पूर्णाहन्तायै नमः ।
ॐ ऋतम्भरायै नमः ।
ॐ जूत्यै नमः ।
ॐ मत्यै नमः ।
ॐ धृत्यै नमः ।
ॐ मेधायै नमः ।
ॐ प्रज्ञायै नमः ।
ॐ अविदितविप्लवायै नमः । (८०)
ॐ चतुष्पदायै नमः ।
ॐ अपदायै नमः ।
ॐ वर्णमालायै नमः ।
ॐ वेदान्तभूमिकायै नमः ।
ॐ श्रद्धाङ्कुरायै नमः ।
ॐ सत्यमूलायै नमः ।
ॐ निष्ठाप्रोत्तुङ्गशाखिन्यै नमः ।
ॐ निर्वेदसलिलायै नमः ।
ॐ ब्रह्मचर्यसौन्दर्यपल्लवायै नमः ।

ॐ महावाक्यप्रसूनाढ्यायै नमः।(९०)
ॐ कैवल्यफलदायिन्यै नमः ।
ॐ संसारतापशमन्यै नमः ।
ॐ शुकादिद्विजसंकुलायै नमः ।
ॐ ब्रह्मद्रुमायै नमः ।
ॐ अनन्तनीडकल्प-
ब्रह्माण्डमण्डितायै नमः ।
ॐ आबालवृद्धविदितायै नमः ।
ॐ अनूतनायै नमः ।
ॐ अन्तर्मुखाश्रयायै नमः ।
ॐ आत्मचिन्तामण्यै नमः ।
ॐ चित्यै नमः । (१००)
ॐ अध्यात्मज्ञानदीपिकायै नमः ।
ॐ अष्टधापूजितायै नमः ।
ॐ अद्वैतायै नमः ।
ॐ अनन्यभक्त्यैकसाधनायै नमः ।
ॐ निर्व्याजकरुणापूरायै नमः ।
ॐ निस्तरङ्गसुखार्णवायै नमः ।
ॐ सर्वचैतन्यरूपायै नमः ।
ॐ श्रीं नमः ।

# १४६. श्रीललितात्रिशतीनामावलिः

ॐ ककाररूपायै नमः
कल्याण्यै नमः
कल्याणगुणशालिन्यै नमः
कल्याणशैलनिलयायै नमः
कमनीयायै नमः
कलावत्यै नमः
कमलाक्ष्यै नमः
कल्मषघ्न्यै नमः
करुणामृतसागरायै नमः
कदम्बकाननावासायै नमः (१०)
कदम्बकुसुमप्रियायै नमः
कन्दर्पविद्यायै नमः
कन्दर्पजनकापाङ्गवीक्षणायै नमः
कर्पूरवीटीसौरभ्यकल्लोलित-
ककुप्तटायै नमः
कलिदोषहरायै नमः
कञ्जलोचनायै नमः
कम्रविग्रहायै नमः
कर्मादिसाक्षिण्यै नमः
कारयित्र्यै नमः
कर्मफलप्रदायै नमः (२०)
एकाररूपायै नमः
एकाक्षर्यै नमः
एकानेकाक्षराकृतये नमः

ॐ एतत्तदित्यनिर्देश्यायै नमः
एकानन्दचिदाकृतये नमः
एवमित्यागमाबोध्यायै नमः
एकभक्तिमदर्चितायै नमः
एकाग्रचित्तनिर्ध्यातायै नमः
एषणारहितादृतायै नमः
एलासुगन्धिचिकुरायै नमः (३०)
एनःकूटविनाशिन्यै नमः
एकभोगायै नमः
एकरसायै नमः
एकैश्वर्यप्रदायिन्यै नमः
एकातपत्रसाम्राज्यप्रदायै नमः
एकान्तपूजितायै नमः
एधमानप्रभायै नमः
एजदनेकजगदीश्वर्यै नमः
एकवीरादिसंसेव्यायै नमः
एकप्राभवशालिन्यै नमः (४०)
ईकाररूपायै नमः
ईशित्र्यै नमः
ईप्सितार्थप्रदायिन्यै नमः
ईदृगित्यविनिर्देश्यायै नमः
ईश्वरत्वविधायिन्यै नमः
ईशानादिब्रह्ममय्यै नमः
ईशित्वाद्यष्टसिद्धिदायै नमः

ॐ ईक्षित्र्यै नमः
ईक्षणसृष्टाण्डकोटये नमः
ईश्वरवल्लभायै नमः (५०)
ईडितायै नमः
ईश्वरार्धाङ्गशरीरायै नमः
ईशाधिदेवतायै नमः
ईश्वरप्रेरणकर्यै नमः
ईशताण्डवसाक्षिण्यै नमः
ईश्वरोत्सङ्गनिलयायै नमः
ईतिबाधाविनाशिन्यै नमः
ईहाविरहितायै नमः
ईशशक्तये नमः
ईषत्स्मिताननायै नमः (६०)
लकाररूपायै नमः
ललितायै नमः
लक्ष्मीवाणीनिषेवितायै नमः
लाकिन्यै नमः
ललनारूपायै नमः
लसद्दाडिमपाटलायै नमः
ललन्तिकालसत्फालायै नमः
ललाटनयनार्चितायै नमः
लक्षणोज्ज्वलदिव्याङ्ग्यै नमः
लक्षकोट्यण्डनायिकायै नमः(७०)
लक्ष्यार्थायै नमः
लक्षणागम्यायै नमः
लब्धकामायै नमः

ॐ लतातनवे नमः
ललामराजदलिकायै नमः
लम्बिमुक्तालताञ्चितायै नमः
लम्बोदरप्रसवे नमः
लभ्यायै नमः
लज्जाढ्यायै नमः
लयवर्जितायै नमः (८०)
ह्रींकाररूपायै नमः
ह्रींकारनिलयायै नमः
ह्रींपदप्रियायै नमः
ह्रींकारबीजायै नमः
ह्रींकारमन्त्रायै नमः
ह्रींकारलक्षणायै नमः
ह्रींकारजपसुप्रीतायै नमः
ह्रींमत्यै नमः
ह्रींविभूषणायै नमः
ह्रींशीलायै नमः (९०)
ह्रींपदाराध्यायै नमः
ह्रींगर्भायै नमः
ह्रींपदाभिधायै नमः
ह्रींकारवाच्यायै नमः
ह्रींकारपूज्यायै नमः
ह्रींकारपीठिकायै नमः
ह्रींकारवेद्यायै नमः
ह्रींकारचिन्त्यायै नमः
ह्रीं नमः

ॐ ह्रींशरीरिण्यै नमः (१००)
हकाररूपायै नमः
हलधृक्पूजितायै नमः
हरिणेक्षणायै नमः
हरप्रियायै नमः
हराराध्यायै नमः
हरिब्रह्मेन्द्रवन्दितायै नमः
हयारूढासेविताङ्घ्र्यै नमः
हयमेधसमर्चितायै नमः
हर्यक्षवाहनायै नमः
हंसवाहनायै नमः (११०)
हतदानवायै नमः
हत्यादिपापशमन्यै नमः
हरिदश्वादिसेवितायै नमः
हस्तिकुम्भोत्तुङ्गकुचायै नमः
हस्तिकृत्तिप्रियाङ्गनायै नमः
हरिद्राकुङ्कुमादिग्धायै नमः
हर्यश्वाद्यमरार्चितायै नमः
हरिकेशसख्यै नमः
हादिविद्यायै नमः
हालामदालसायै नमः (१२०)
सकाररूपायै नमः
सर्वज्ञायै नमः
सर्वेश्यै नमः

ॐ सर्वमङ्गलायै नमः
सर्वकर्त्र्यै नमः
सर्वभर्त्र्यै नमः
सर्वहन्त्र्यै नमः
सनातनायै नमः
सर्वानवद्यायै नमः
सर्वाङ्गसुन्दर्यै नमः (१३०)
सर्वसाक्षिण्यै नमः
सर्वात्मिकायै नमः
सर्वसौख्यदात्र्यै नमः
सर्वविमोहिन्यै नमः
सर्वाधारायै नमः
सर्वगतायै नमः
सर्वावगुणवर्जितायै नमः
सर्वारुणायै नमः
सर्वमात्रे नमः
सर्वभूषणभूषितायै नमः (१४०)
ककारार्थायै नमः
कालहन्त्र्यै नमः
कामेश्यै नमः
कामितार्थदायै नमः
कामसञ्जीवन्यै नमः
कल्यायै नमः
कठिनस्तनमण्डलायै नमः

ॐ करभोरवे नमः
कलानाथमुख्यै नमः
कचजिताम्बुदायै नमः (१५०)
कटाक्षस्यन्दिकरुणायै नमः
कपालिप्राणनायिकायै नमः
कारुण्यविग्रहायै नमः
कान्तायै नमः
कान्तिधूतजपावल्यै नमः
कलालापायै नमः
कम्बुकण्ठ्यै नमः
करनिर्जितपल्लवायै नमः
कल्पवल्लीसमभुजायै नमः
कस्तूरीतिलकाञ्चितायै नमः(१६०)
हकारार्थायै नमः
हंसगत्यै नमः
हाटकाभरणोज्ज्वलायै नमः
हारहारिकुचाभोगायै नमः
हाकिन्यै नमः
हल्यवर्जितायै नमः
हरित्पतिसमाराध्यायै नमः
हठात्कारहतासुरायै नमः
हर्षप्रदायै नमः
हविर्भोक्त्र्यै नमः (१७०)
हार्दसन्तमसापहायै नमः

ॐ हल्लीसलास्यसन्तुष्टायै नमः
हंसमन्त्रार्थरूपिण्यै नमः
हानोपादाननिर्मुक्तायै नमः
हर्षिण्यै नमः
हरिसोदर्यै नमः
हाहाहूहूमुखस्तुत्यायै नमः
हानिवृद्धिविवर्जितायै नमः
हय्यङ्गवीनहृदयायै नमः
हरिगोपारुणांशुकायै नमः (१८०)
लकाराख्यायै नमः
लतापूज्यायै नमः
लयस्थित्युद्भवेश्वर्यै नमः
लास्यदर्शनसन्तुष्टायै नमः
लाभालाभविवर्जितायै नमः
लङ्घ्येतराज्ञायै नमः
लावण्यशालिन्यै नमः
लघुसिद्धिदायै नमः
लाक्षारससवर्णाभायै नमः
लक्ष्मणाग्रजपूजितायै नमः(१९०)
लभ्येतरायै नमः
लब्धभक्तिसुलभायै नमः
लाङ्गलायुधायै नमः
लग्नचामरहस्तश्रीशारदापरिवीजितायै नमः
लज्जापदसमाराध्यायै नमः

ॐ लम्पटायै नमः
लकुलेश्वर्यै नमः
लब्धमानायै नमः
लब्धरसायै नमः
लब्धसम्पत्समुन्नत्यै नमः (२००)
ह्रींकारिण्यै नमः
ह्रींकाराद्यायै नमः
ह्रींमध्यायै नमः
ह्रींशिखामणये नमः
ह्रींकारकुण्डाग्निशिखायै नमः
ह्रींकारशशिचन्द्रिकायै नमः
ह्रींकारभास्कररुचये नमः
ह्रींकाराम्भोदचञ्चलायै नमः
ह्रींकारकन्दाङ्कुरिकायै नमः
ह्रींकारैकपरायणायै नमः (२१०)
ह्रींकारदीर्घिकाहंस्यै नमः
ह्रींकारोद्यानकेकिन्यै नमः
ह्रींकारारण्यहरिण्यै नमः
ह्रींकारावालवल्लर्यै नमः
ह्रींकारपञ्जरशुक्यै नमः
ह्रींकाराङ्गणदीपिकायै नमः
ह्रींकारकन्दरासिंह्यै नमः
ह्रींकाराम्भोजभृङ्गिकायै नमः
ह्रींकारसुमनोमाध्व्यै नमः

ॐ ह्रींकारतरुमञ्जर्यै नमः (२२०)
सकाराख्यायै नमः
समरसायै नमः
सकलागमसंस्तुतायै नमः
सर्ववेदान्ततात्पर्यभूमये नमः
सदसदाश्रयायै नमः
सकलायै नमः
सच्चिदानन्दायै नमः
साध्यायै नमः
सद्गतिदायिन्यै नमः
सनकादिमुनिध्येयायै नमः(२३०)
सदाशिवकुटुम्बिन्यै नमः
सकलाधिष्ठानरूपायै नमः
सत्यरूपायै नमः
समाकृतये नमः
सर्वप्रपञ्चनिर्मात्र्यै नमः
समानाधिकवर्जितायै नमः
सर्वोत्तुङ्गायै नमः
ॐ सङ्गहीनायै नमः
सगुणायै नमः
सकलेष्टदायै नमः (२४०)
ककारिण्यै नमः
काव्यलोलायै नमः
कामेश्वरमनोहरायै नमः

ॐ कामेश्वरप्राणनाड्यै नमः
कामेशोत्सङ्गवासिन्यै नमः
कामेश्वरालिङ्गिताङ्ग्यै नमः
कामेश्वरसुखप्रदायै नमः
कामेश्वरप्रणयिन्यै नमः
कामेश्वरविलासिन्यै नमः
कामेश्वरतपःसिद्ध्यै नमः (२५०)
कामेश्वरमनःप्रियायै मनः
कामेश्वरप्राणनाथायै नमः
कामेश्वरविमोहिन्यै नमः
कामेश्वरब्रह्मविद्यायै नमः
कामेश्वरगृहेश्वर्यै नमः
कामेश्वराह्लादकर्यै नमः
कामेश्वरमहेश्वर्यै नमः
कामेश्वर्यै नमः
कामकोटिनिलयायै नमः
काङ्क्षितार्थदायै नमः (२६०)
लकारिण्यै नमः
लब्धरूपायै नमः
लब्धधियै नमः
लब्धवाञ्छितायै नमः
लब्धपापमनोदूरायै नमः
लब्धाहङ्कारदुर्गमायै नमः
लब्धशक्त्यै नमः

ॐ लब्धदेहायै नमः
लब्धैश्वर्यसमुन्नत्यै नमः
लब्धवृद्ध्यै नमः (२७०)
लब्धलीलायै नमः
लब्धयौवनशालिन्यै नमः
लब्धातिशयसर्वाङ्गसौन्दर्यायै नमः
लब्धविभ्रमायै नमः
लब्धरागायै नमः
लब्धपतये नमः
लब्धनानागमस्थित्यै नमः
लब्धभोगायै नमः
लब्धसुखायै नमः
लब्धहर्षाभिपूरितायै नमः (२८०)
ह्रींकारमूर्त्यै नमः
ह्रींकारसौधशृङ्गकपोतिकायै नमः
ह्रींकारदुग्धाब्धिसुधायै नमः
ह्रींकारकमलेन्दिरायै नमः
ह्रींकारमणिदीपार्चिषे नमः
ह्रींकारतरुशारिकायै नमः
ह्रींकारपेटकमणये नमः
ह्रींकारादर्शबिम्बितायै नमः
ह्रींकारकोशासिलतायै नमः
ह्रींकारास्थाननर्तक्यै नमः (२९०)
ह्रींकारशुक्तिकामुक्तामणये नमः

ॐ ह्रींकारबोधितायै नमः
ह्रींकारमयसौवर्णस्तम्भविद्रुमपुत्रिकायै नमः
ह्रींकारवेदोपनिषदे नमः
ह्रींकाराध्वरदक्षिणायै नमः
ह्रींकारनन्दनारामनवकल्पकवल्ल्यै नमः
ॐ ह्रींकारहिमवद्गङ्गायै नमः
ह्रींकारार्णवकौस्तुभायै नमः
ह्रींकारमन्त्रसर्वस्वायै नमः
ह्रींकारपरसौख्यदायै नमः (३००)

## १४७. श्रीसरस्वती पूजन

ध्यानम्–

वार्णी पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुन्दप्रभां
चन्द्रार्धाङ्कितमस्तकां सुतिलकां सम्बिभ्रतीमादरात् ।
वीणामक्षगुणं सुधाढ्यकलशं विद्यां च तुङ्गस्तनीं
दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे ॥

ॐ श्रीसरस्वत्यै नमः । ध्यानं समर्पयामि ।।

आवाहनम्–

चतुर्भुजां चन्द्रवर्णां चतुरानन–वल्लभाम् ।
आवाहयामि वाणि त्वामाश्रितार्तिविनाशिनीम् ॥

ॐ श्रीसरस्वत्यै नमः । आवाहनं समर्पयामि ॥

आसनम्–

या श्रद्धा धारणा मेधा वाग्देवी विधिवल्लभा।
सा मे तिष्ठतु जिह्वाग्रे शमादिगुणदायिनी॥

ॐ श्रीसरस्वत्यै नमः । आसनार्थे पुष्पं समर्पयामि ।।

पाद्यम्-

पाद्यमाद्यन्तशून्यायै वेद्यायै वेदवादिभिः ।
तुभ्यं दास्यामि पद्माक्षि सुगन्धिं निर्मलं जलम् ॥

ॐ श्रीसरस्वत्यै नमः । पादयोः पाद्यं समर्पयामि ॥

अर्घ्यम्-

अघहन्त्रि गृहाणेदम् अर्घ्यम् अष्टाङ्गसंयुतम् ।
अम्बाखिलानां जगताम् अम्बुजासनवल्लभे ॥

ॐ श्रीसरस्वत्यै नमः । हस्तयोरर्घ्यं समर्पयामि ॥

आचमनम्-

आचम्यतां तोयमिदम् आश्रितार्थप्रदायिनि ।
आत्मभूवदनावासे आधिहारिणि ते नमः ॥

ॐ श्रीसरस्वत्यै नमः । आचमनीयं जलं समर्पयामि ॥

स्नानम्-

साध्वीनामग्रतोगण्ये साधुसङ्घ-समादृते ।
सर्वतीर्थमयं तोयं स्नानार्थं प्रतिगृह्यताम् ॥

ॐ श्रीसरस्वत्यै नमः । स्नानीयं जलं समर्पयामि ॥

स्नानान्ते आचमनीयं समर्पयामि ॥

वस्त्रम्-

दुकूलद्वितयं देवि दुरितापहवैभवे ।
विधिप्रिये गृहाणेदं सुधानिधिसमं शिवे ॥

ॐ श्रीसरस्वत्यै नमः । वस्त्रोपवस्त्रं समर्पयामि ॥

तदन्ते आचमनीयं समर्पयामि ॥

यज्ञोपवीतम्-

उपवीतं गृहाणेदम् उपमाशून्यवैभवे ।
हिरण्यगर्भमहिषि हिरण्मयगुणैः कृतम् ॥

ॐ श्रीसरस्वत्यै नमः । यज्ञोपवीतं समर्पयामि ॥

तदन्ते आचमनीयं समर्पयामि ॥

आभूषणम्-

वर्णरूपे गृहाणेदं स्वर्णवर्यपरिष्कृतम् ।
अर्णवोद्धृतरत्नाढ्यं कर्णभूषादिभूषणम् ॥

ॐ श्रीसरस्वत्यै नमः । नानालङ्काराणि समर्पयामि ॥

गन्धः-

अन्धकारिप्रियाराध्ये गन्धमुत्तमं सौरभम्।
गृहाण वाणि वरदे गन्धर्वपरिपूजिते॥

ॐ श्रीसरस्वत्यै नमः । गन्धं समर्पयामि ॥

अक्षताः -

अक्षतांस्त्वं गृहाणेमानहतानमरार्चिते।
अक्षतेऽद्भुतरूपाढ्ये यक्षराजादिवन्दिते ॥

ॐ श्रीसरस्वत्यै नमः । अक्षतान् समर्पयामि ॥

पुष्पम्-

पुमर्थदायिनि गिरे पुस्तकाढ्यकराम्बुजे ।
पुन्नागजातीमल्ल्यादि-पुष्पजातं गृहाण मे ॥

ॐ श्रीसरस्वत्यै नमः । पुष्पाणि समर्पयामि ॥

सौभाग्यद्रव्यम्

कुङ्कुमाञ्जनसिन्दूरकञ्चुकादिकम् अम्बिके ।
सौभाग्यद्रव्यमखिलं सुरवन्द्ये गृहाण मे ॥

ॐ श्रीसरस्वत्यै नमः । सौभाग्यद्रव्याणि समर्पयामि ॥

*श्रीसरस्वत्यष्टोत्तरशतनामावल्या सहित कुङ्कुमार्चने विनियोगः।*

## श्रीसरस्वत्यष्टोत्तरशतनामावलिः

ॐ सरस्वत्यै नमः ।
महाभद्रायै नमः ।
महामायायै नमः ।
वरप्रदायै नमः ।
श्रीप्रदायै नमः ।
पद्मनिलयायै नमः ।
पद्माक्ष्यै नमः ।
पद्मवक्त्रायै नमः ।
शिवानुजायै नमः ।
पुस्तकभृते नमः । (१०)
ज्ञानमुद्रायै नमः ।
रमायै नमः ।
परायै नमः ।
कामरूपायै नमः ।
महाविद्यायै नमः ।
महापातकनाशिन्यै नमः ।
महाश्रयायै नमः ।
मालिन्यै नमः ।
ॐ महाभोगायै नमः ।
महाभुजायै नमः । (२०)
महाभगायै नमः ।
महोत्साहायै नमः ।
दिव्याङ्ग्यै नमः ।
सुरवन्दितायै नमः ।
महाकाल्यै नमः ।
महापाशायै नमः ।
महाकारायै नमः ।
महाङ्कुशायै नमः ।
पीतायै नमः ।
विमलायै नमः । (३०)
विश्वायै नमः ।
विद्युन्मालायै नमः ।
वैष्णव्यै नमः ।
चन्द्रिकायै नमः ।
चन्द्रवदनायै नमः ।
चन्द्रलेखाविभूषितायै नमः।

ॐ सावित्र्यै नमः ।
सुरसायै नमः ।
देव्यै नमः ।
दिव्यालङ्कारभूषितायै नमः। (४०)
वाग्देव्यै नमः ।
वसुदायै नमः ।
तीव्रायै नमः ।
महाभद्रायै नमः ।
महाबलायै नमः ।
भोगदायै नमः ।
भारत्यै नमः ।
भामायै नमः ।
गोविन्दायै नमः ।
गोमत्यै नमः । (५०)
शिवायै नमः ।
जटिलायै नमः ।
विन्ध्यवासिन्यै नमः ।
विन्ध्याचलविराजितायै नमः।
चण्डिकायै नमः ।
वैष्णव्यै नमः ।
ब्राह्म्यै नमः ।
ब्रह्मज्ञानैकसाधनायै नमः ।
सौदामिन्यै नमः ।
सुधामूर्त्यै नमः । (६०)
सुभद्रायै नमः ।
सुरपूजितायै नमः ।

ॐ सुवासिन्यै नमः ।
सुनासायै नमः ।
विनिद्रायै नमः ।
पद्मलोचनायै नमः ।
विद्यारूपायै नमः ।
विशालाक्ष्यै नमः ।
ब्रह्मजायायै नमः ।
महाफलायै नमः । (७०)
त्रयीमूर्तये नमः ।
त्रिकालज्ञायै नमः ।
त्रिगुणायै नमः ।
शास्त्ररूपिण्यै नमः ।
शुम्भासुरप्रमथिन्यै नमः ।
शुभदायै नमः ।
स्वरात्मिकायै नमः ।
रक्तबीजनिहन्त्र्यै नमः ।
चामुण्डायै नमः ।
अम्बिकायै नमः ।(८०)
मुण्डकायप्रहरणायै नमः ।
धूम्रलोचनमर्दनायै नमः ।
सर्वदेवस्तुतायै नमः ।
सौम्यायै नमः ।
सुरासुरनमस्कृतायै नमः ।
कालरात्र्यै नमः ।
कलाधरायै नमः ।
रूपसौभाग्यदायिन्यै नमः ।

ॐ वाग्देव्यै नमः ।
वरारोहायै नमः ।(९०)
वाराह्यै नमः ।
वारिजासनायै नमः ।
चित्राम्बरायै नमः ।
चित्रगन्धायै नमः ।
चित्रमालया विभूषितायै नमः।
कान्तायै नमः ।
कामप्रदायै नमः ।
वन्द्यायै नमः ।

ॐ विद्याधरसुपूजितायै नमः ।
श्वेताननायै नमः ।(१००)
नीलभुजायै नमः ।
चतुर्वर्गफलप्रदायै नमः ।
चतुराननसाम्राज्यायै नमः ।
रक्तमध्यायै नमः ।
निरञ्जनायै नमः ।
हंसासनायै नमः ।
नीलजङ्घायै नमः ।
ब्रह्मविष्णुशिवात्मिकायै नमः।(१०८)

धूपः -

गुग्गुल्वगरुसंयुक्तं भक्त्या दत्तं विधिप्रिये ।
धूपं गृहाण देवेशि मातृमण्डलपूजिते ॥

ॐ श्रीसरस्वत्यै नमः । धूपम् आघ्रापयामि ॥

दीपः-

घृताक्तवर्तिसंयुक्तं वाणि चैतन्यदीपितम् ।
दीपं गृहाण वरदे चिदाभे ध्वान्तहारिणि॥

ॐ श्रीसरस्वत्यै नमः । दीपं दर्शयामि ॥

नैवेद्यम्-

हस्तौ प्रक्षाल्य नैवेद्यं पुरतः स्थाप्य गायत्र्या
सम्प्रोक्ष्य तुलसीदलैः आच्छाद्य नैवेद्यम् ।

ॐ महादेव्यै च विद्महे ।ब्रह्मपत्न्यै च धीमहि ।

तन्नो वाणी प्रचोदयात् ।

ॐ प्राणाय स्वाहा
ॐ अपानाय स्वाहा
ॐ व्यानाय स्वाहा
ॐ उदानाय स्वाहा
ॐ समानाय स्वाहा
ॐ प्राणापान-व्यान-उदान-समानाः।

ॐ श्रीसरस्वत्यै नमः । आचमनीयं समर्पयामि ॥
पूर्वापोषणं समर्पयामि ।

नैवेद्यं षड्रसोपेतं नानाभक्ष्यसमन्वितम् ।
सरस्वति तव प्रीत्यै ददामि प्रतिगृह्यताम् ॥

ॐ श्रीसरस्वत्यै नमः । नैवेद्यं निवेदयामि ।
नानाऋतुफलानि च समर्पयामि ।

आचमनीयं समर्पयामि ।
उत्तरापोषणं समर्पयामि ।
हस्तप्रक्षालनं समर्पयामि। मुखप्रक्षालनं समर्पयामि।
करोद्वर्तनार्थे चन्दनं समर्पयामि।

ताम्बूलम्

ताम्बूलं मुक्तिकाचूर्णकर्पूरादिसमन्वितम् ।
जिह्वाजाड्योच्छेदकरं त्रिपुरे प्रतिगृह्यताम् ॥

ॐ श्रीसरस्वत्यै नमः । मुखशुद्ध्यर्थं ताम्बूलं समर्पयामि॥

दक्षिणा

पूजापूर्णत्वसिद्ध्यर्थं पूर्णे पूर्णफलप्रदे ।
हेमरत्नमयीं द्रव्य-दक्षिणां स्वीकुरुष्व मे ॥

ॐ श्रीसरस्वत्यै नमः। साङ्गतासिद्ध्यर्थं हिरण्यगर्भदक्षिणां समर्पयामि॥

नीराजनम्-

नीराजनं नीरजाक्षि नीरजासनवल्लभे ।
कर्पूरखण्डकलितं गृहाण करुणार्णवे ॥

ॐ श्रीसरस्वत्यै नमः। नीराजनं दर्शयामि ॥

जलारार्तिकं समर्पयामि। तदन्ते आचमनीयं समर्पयामि।
देवाभिवन्दनम् । आत्माभिवन्दनम् ॥

मन्त्रपुष्पाञ्जलिः-

पुष्पाञ्जलिं मया दत्तं गृहाण वर्णमालिनि ।
शारदे लोकमातस्त्वं आश्रितेष्टप्रदायिनि ॥

ॐ श्रीसरस्वत्यै नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

प्रदक्षिणा -

सर्वमङ्गललाभाय सर्वपापनिवृत्तये ।
प्रदक्षिणां करोम्यम्ब प्रसीद परमेश्वरि ॥

ॐ श्रीसरस्वत्यै नमः । प्रदक्षिणां समर्पयामि ॥

प्रार्थना-

चतुर्दशसु विद्यासु रमते या सरस्वती ।
सा देवी कृपया युक्ता पूजां पूर्णां करोतु मे ॥१॥

पाहि मां पावने देवि यक्षोरगादिनाशिनि ।
अव माम्बुजावासे त्राहि मां तुहिनप्रभे ॥२॥

ॐ श्रीसरस्वत्यै नमः । प्रार्थनां समर्पयामि॥

नमस्कारः-

शुक्लां ब्रह्मविचारसारपरमाम् आद्यां जगद्व्यापिनीम् ।
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् ॥१॥

हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थिताम् ।
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥२॥

ॐ श्रीसरस्वत्यै नमः । नमस्करोमि ॥

विशेषार्घ्यम्-

अघहीने गृहाणेदमर्घ्यमष्टाङ्गसंयुतम् ।
अम्बाखिलानां जगतामम्बुजासनवल्लभे ॥

ॐ श्रीसरस्वत्यै नमः । विशेषार्घ्यं समर्पयामि ॥

प्रार्थनापूर्वकं क्षमापनम्-

तत्सपर्या विधौ देवि यत्किञ्चित्साधितं मया ।
क्षमस्व तदिदं सर्वं कृपालि शुभलक्षणे ॥

समर्पणम्-

त्वमेव वाणि निखिलाश्च वेदा
त्वं शब्दशक्तिश्च तदार्थशक्तिः ।
त्वं ब्रह्मविद्यासि परा परेशि
त्वां चिद्स्वरूपां शरणं प्रपद्ये ॥१॥

मंत्रहीनं क्रियाहीनं भक्तिहीनं महेश्वरि ।
यत्पूजितं मया देवि परिपूर्णं तथास्तु मे ॥२॥

अनया पूजया श्रीसरस्वती प्रीयताम् ।
ॐ तत्सत् ब्रह्मार्पणमस्तु ॥

# १४८. दीपावली श्रीलक्ष्मीपूजनम्

ध्यानम्

पद्मासनां पद्मकरां पद्ममालाविभूषिताम् ।
क्षीरसागरसम्भूतां हेमवर्णसमप्रभाम् ॥

क्षीरवर्णसमं वस्त्रं दधानां हरिवल्लभाम् ।
भावये भक्तियोगेन भार्गवीं कमलां शुभाम् ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । ध्यानं समर्पयामि ॥

आवाहनम्

सर्वमङ्गलमाङ्गल्ये विष्णुवक्षःस्थलालये ।
आवाहयामि देवि त्वां क्षीरसागरसम्भवे ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । आवाहनं समर्पयामि ॥

आसनम्

पद्मासने पद्मकरे सर्वलोकैकपूजिते ।
नारायणप्रिये देवि सुप्रीता भव सर्वदा ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । आसनार्थे पुष्पं समर्पयामि ॥

पाद्यम्

पाद्यमाद्यन्तशून्यायै वेद्यायै वेदवादिभिः ।
तुभ्यं दास्यामि पद्माक्षि सुगन्धिं निर्मलं जलम् ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । पादयोः पाद्यं समर्पयामि ॥

अर्घ्यम्

अघहीने गृहाणेदमर्घ्यमष्टाङ्गसंयुतम् ।
अम्बाखिलानां जगताम्बुजासनवन्दिते ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । हस्तयोरर्घ्यं समर्पयामि ॥

आचमनम्

गङ्गातोयं समानीतं सुवर्णकलशे स्थितम् ।
आचम्यतां महाभागे भगवति हरिवल्लभे ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । आचमनीयं जलं समर्पयामि ॥

स्नानम्

साध्वीनामग्रतोगण्ये साधुसङ्गसमादृते ।
सर्वतीर्थमयं तोयं स्नानार्थं प्रतिगृह्यताम् ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । स्नानीयं जलं समर्पयामि ॥
तदन्ते आचमनीयं समर्पयामि ॥

वस्त्रम्

दुकूलद्वितयं दिव्यं कञ्चुकं च मनोहरम् ।
देवदेवि गृहाणेदं प्रसन्ना भव सर्वदा ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । वस्त्रोपवस्त्रं समर्पयामि ॥
तदन्ते आचमनीयं समर्पयामि ॥

यज्ञोपवीतम्

उपवीतं गृहाणेदम् उपमाशून्यवैभवे ।
भक्त्या समर्पितं देवि हेमसूत्रसमन्वितम् ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । यज्ञोपवीतं समर्पयामि ॥
तदन्ते आचमनीयं समर्पयामि ॥

आभूषणम्

माङ्गल्यमणिसंयुक्तमुक्ताफलसमन्वितम् ।
दत्तं मङ्गलसूत्रं ते गृहाणाम्ब शुभं कुरु ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । नानालङ्काराणि समर्पयामि॥

गन्धः

कर्पूरागरु–कस्तूरी–कुङ्कुमादि–समन्वितम् ।
गन्धं ददाम्यहं देवि सर्वमङ्गलदायिनि ॥

ॐ श्रीलक्ष्मीदेव्यै नमः। गन्धं समर्पयामि ।

अक्षताः

अक्षतान् धवलान् देवि शालीयांस्तण्डुलान् शुभान् ।
हरिद्राकुङ्कुमोपेतान् गृहाणाम्ब कृपानिधे ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । अक्षतान् समर्पयामि ॥

पुष्पम्

मन्दारपारिजाताब्जैः मल्लिकाबकुलैरपि ।
केतक्युत्पलकह्लारैः पूजयामि हरिप्रिये ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । पुष्पाणि समर्पयामि ॥

सौभाग्यद्रव्यम्

कज्जलं चैव सिन्दूरं हरिद्राकुङ्कुमानि च ।
भक्त्यार्पितानि श्रीमातः सौभाग्यानि च स्वीकुरु ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । सौभाग्यद्रव्याणि समर्पयामि ॥

श्रीलक्ष्म्यष्टोत्तरशतनामावल्या सहित–कुङ्कुमार्चने विनियोगः

# श्रीलक्ष्म्यष्टोत्तरशतनामावलिः

ॐ प्रकृत्यै नमः ।
ॐ विकृत्यै नमः ।
ॐ विद्यायै नमः ।
ॐ सर्वभूतहितप्रदायै नमः ।
ॐ श्रद्धायै नमः ।
ॐ विभूत्यै नमः ।
ॐ सुरभ्यै नमः ।
ॐ परमात्मिकायै नमः ।
ॐ वाचे नमः ।
ॐ पद्मालयायै नमः । (१०)
ॐ पद्मायै नमः ।
ॐ शुचये नमः ।
ॐ स्वाहायै नमः ।
ॐ स्वधायै नमः ।
ॐ सुधायै नमः ।
ॐ धन्यायै नमः ।
ॐ हिरण्मय्यै नमः ।
ॐ लक्ष्म्यै नमः ।
ॐ नित्यपुष्टायै नमः ।
ॐ विभावर्यै नमः । (२०)
ॐ अदित्यै नमः ।
ॐ दित्यै नमः ।
ॐ दीप्तायै नमः ।
ॐ वसुधायै नमः ।
ॐ वसुधारिण्यै नमः ।
ॐ कमलायै नमः ।
ॐ कान्तायै नमः ।
ॐ कामाक्ष्यै नमः ।
ॐ क्रोधसम्भवायै नमः ।
ॐ अनुग्रहप्रदायै नमः । (३०)
ॐ बुद्ध्यै नमः ।
ॐ अनघायै नमः ।
ॐ हरिवल्लभायै नमः ।
ॐ अशोकायै नमः ।
ॐ अमृतायै नमः ।
ॐ विद्यायै नमः ।
ॐ लोकशोकविनाशिन्यै नमः ।
ॐ धर्मनिलयायै नमः ।
ॐ करुणायै नमः ।
ॐ लोकमात्रे नमः । (४०)
ॐ पद्मप्रियायै नमः ।
ॐ पद्महस्तायै नमः ।
ॐ पद्माक्ष्यै नमः ।
ॐ पद्मसुन्दर्यै नमः ।
ॐ पद्मोद्भवायै नमः ।
ॐ पद्ममुख्यै नमः ।
ॐ पद्मनाभप्रियायै नमः ।
ॐ रमायै नमः ।

ॐ पद्ममालाधरायै नमः ।
ॐ दिव्यायै नमः । (५०)
ॐ पद्मिन्यै नमः ।
ॐ पद्मगन्धिन्यै नमः ।
ॐ पुण्यगन्धायै नमः ।
ॐ सुप्रसन्नायै नमः ।
ॐ प्रसादाभिमुख्यै नमः ।
ॐ प्रभायै नमः ।
ॐ चन्द्रवदनायै नमः ।
ॐ चन्द्रायै नमः ।
ॐ चन्द्रसहोदर्यै नमः ।
ॐ चतुर्भुजायै नमः । (६०)
ॐ चन्द्ररूपायै नमः ।
ॐ इन्दिरायै नमः ।
ॐ इन्दुशीतलायै नमः ।
ॐ आह्लादजनन्यै नमः ।
ॐ पुष्ट्यै नमः ।
ॐ शिवायै नमः ।
ॐ शिवङ्कर्यै नमः ।
ॐ सत्यै नमः ।
ॐ विमलायै नमः ।
ॐ विश्वजनन्यै नमः । (७०)
ॐ तुष्ट्यै नमः ।
ॐ दारिद्र्यनाशिन्यै नमः ।
ॐ प्रीतिपुष्करिण्यै नमः ।
ॐ शान्तायै नमः ।
ॐ शुक्लमाल्याम्बरायै नमः ।
ॐ श्रियै नमः ।
ॐ भास्कर्यै नमः ।
ॐ बिल्वनिलयायै नमः ।
ॐ वरारोहायै नमः ।
ॐ यशस्विन्यै नमः । (८०)
ॐ वसुन्धरायै नमः ।
ॐ उदाराङ्गायै नमः ।
ॐ हरिण्यै नमः ।
ॐ हेममालिन्यै नमः ।
ॐ धनधान्यकर्यै नमः ।
ॐ सिद्ध्यै नमः ।
ॐ स्त्रैणसौम्यायै नमः ।
ॐ शुभप्रदायै नमः ।
ॐ नृपवेश्मगतानन्दायै नमः ।
ॐ वरलक्ष्म्यै नमः । (९०)
ॐ वसुप्रदायै नमः ।
ॐ शुभायै नमः ।
ॐ हिरण्यप्राकारायै नमः ।
ॐ समुद्रसम्भवायै नमः ।
ॐ जयायै नमः ।
ॐ मङ्गलादेव्यै नमः ।
ॐ विष्णुवक्षःस्थलस्थितायै नमः ।
ॐ विष्णुपत्न्यै नमः ।
ॐ प्रसन्नाक्ष्यै नमः ।
ॐ नारायणसमाश्रितायै नमः।१००

ॐ दारिद्र्यध्वंसिन्यै नमः ।
ॐ देव्यै नमः ।
ॐ सर्वोपद्रववारिण्यै नमः ।
ॐ नवदुर्गायै नमः ।
ॐ महाकाल्यै नमः ।
ॐ ब्रह्मविष्णुशिवात्मिकायै नमः ।
ॐ त्रिकालज्ञानसम्पन्नायै नमः ।
ॐ भुवनेश्वर्यै नमः । (१०८)

धूपः

धूपं ददामि ते देवि सुगन्धं च मनोहरम् ।
गृहाण त्वं महालक्ष्मि भक्तानामिष्टदायिनि ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । धूपम् आघ्रापयामि॥

दीपः

साज्यवर्तित्रयोपेतं प्राज्यमङ्गलदायिनि ।
गृहाण मङ्गलं दीपं वरलक्ष्मि नमोऽस्तु ते ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । दीपं दर्शयामि॥

नैवेद्यम्

ॐ महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥१॥

नानामोदकभक्ष्यैश्च संयुतं फललड्डुकैः ।
नैवेद्यं गृह्यतां देवि नारायणकुटुम्बिनि ॥२॥

ॐ श्रीलक्ष्मीदेव्यै नमः । नैवेद्यं निवेदयामि। नानाऋतुफलानि च समर्पयामि। नैवेद्यमध्ये पानीयं समर्पयामि । नैवेद्यान्ते आचमनीयं समर्पयामि। उत्तरापोषणं समर्पयामि। मुखप्रक्षालनं समर्पयामि। हस्तप्रक्षालनं समर्पयामि।

श्रीलक्ष्मीदेव्यै नमः। करोद्वर्तनार्थे चन्दनं समर्पयामि ॥

ताम्बूलम्

ताम्बूलं मुक्तिकाचूर्णकर्पूरादिसमन्वितम् ।
जिह्वाजाड्योच्छेदकरं त्रिपुरे प्रतिगृह्यताम् ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । मुखशुद्ध्यर्थं ताम्बूलं समर्पयामि॥

दक्षिणा

पूजापूर्णत्वसिद्ध्यर्थं पूर्णे पूर्णफलप्रदे ।
हेमरत्नमयीं द्रव्य-दक्षिणां स्वीकुरुष्व मे ॥

ॐ श्रीलक्ष्मीदेव्यै नमः ।
साङ्गतासिद्ध्यर्थं हिरण्यगर्भदक्षिणां समर्पयामि॥

नीराजनम्

नीराजनं समानीतं क्षीरसागरसम्भवे ।
गृह्यतामर्पितं भक्त्या गरुडध्वजभामिनि ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । नीराजनं दर्शयामि ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । जलारार्तिकं समर्पयामि॥

मन्त्रपुष्पाञ्जलिः

पुष्पाञ्जलिं गृहाणेमं पुरुषोत्तमवल्लभे ।
भक्त्या समर्पितं देवि सुप्रीता भव सर्वदा ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

प्रदक्षिणा

सर्वमङ्गललाभाय सर्वपापनिवृत्तये ।
प्रदक्षिणां करोम्यम्ब प्रसीद परमेश्वरि ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । प्रदक्षिणां समर्पयामि ॥

प्रार्थना

विष्णुप्रिये नमस्तुभ्यं नमस्तुभ्यं जगद्धिते ।
आर्तिहन्त्रि नमस्तुभ्यं समृद्धिं कुरु मे सदा ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । प्रार्थनां समर्पयामि ॥

नमस्कारः

लक्ष्मी – नमोऽस्तु नालीकनिभाननायै नमोऽस्तु नारायणवल्लभायै ।
नमोऽस्तु रत्नाकरसम्भवायै नमोऽस्तु लक्ष्म्यै जगतां जनन्यै॥१॥

इन्द्रः – शतक्रतो नमस्तुभ्यं सहस्राक्ष सुराधिप ।
शचीपते गृहाणेदं पूजनं वरदो भव ॥२॥

कुबेरः – यक्षाधिप नमस्तुभ्यं महादेवसख प्रभो ।
सुखं मे देहि समृद्धिं गृहीत्वा पूजनं मम ॥३॥

ॐ श्रीलक्ष्मीदेव्यै नमः । नमस्करोमि ॥

विशेषार्घ्यम्

लक्ष्मी – धनदायै नमस्तुभ्यं निधिपद्माधिपे शुभे ।
भवन्तु त्वत्प्रसादेन धनधान्यादि सम्पदः ॥

इन्द्रः – ऐरावतसमारूढो वज्रहस्तो महाबलः ।
शतयज्ञाधिपो देवः तस्माद् इन्द्राय ते नमः ॥

कुबेरः – वज्रहस्तः पुरन्दरः धनाध्यक्षश्च यक्षराट् ।
मम पूजां प्रगृह्णातु कुबेरो नरवाहनः ॥
ॐ श्रीलक्ष्मीदेव्यै नमः । विशेषार्घ्यं समर्पयामि ॥

प्रार्थनापूर्वकं क्षमापनम्

प्रसीद मे महालक्ष्मि सुप्रसीद महाशिवे ।
अचला भव सम्प्रीत्या सुस्थिरा भव मद्गृहे ॥

ॐ श्रीलक्ष्मीदेव्यै नमः । प्रार्थनापूर्वकं क्षमापनं समर्पयामि॥

समर्पणम्

मातर्नमामि कमले कमलायताक्षि
श्रीविष्णुहृत्कमलवासिनि विश्वमातः ।

क्षीरोदजे कमलकोमलगर्भगौरि
श्रीलक्ष्मि प्रसीद सततं नमतां शरण्ये ॥

अनया पूजया श्रीवरलक्ष्मीदेवी प्रीयताम् ।
ॐ तत् सत् ब्रह्मार्पणमस्तु ॥

# १४९. श्रीशङ्कराचार्यपूजनम्

ध्यानम् –

श्रीमच्छोणसरोजपादयुगलं आजानुबाहुद्वयं
रुद्राक्षाञ्चितकम्बुकण्ठममलं गङ्गाझरीवाग्झरीम् ।
मन्दस्मेरमुखाम्बुजं शशिकलाभस्मत्रिरेखावलिं
वन्दे सर्वविदासनस्थमसकृत् श्रीशङ्कराख्यं महः ॥

ॐ श्रीशङ्कराचार्याय नमः । ध्यानं समर्पयामि ॥

आवाहनम् –

ॐ स्वरूपनिरूपणहेतवे श्रीगुरवे नमः ।
ॐ स्वच्छप्रकाशविमर्शहेतवे श्रीपरमगुरवे नमः ।
ॐ स्वात्मारामपञ्जरविलीनतेजसे श्रीपरमेष्ठिगुरवे नमः ।
ॐ श्रीशङ्कराचार्याय नमः । आवाहयामि, पूजयामि ॥

आसनम् –

सर्वात्मभावसंस्थाय गुरवे सर्वसाक्षिणे ।
सहस्रारसरोजातमासनं कल्पयाम्यहम् ॥

ॐ श्रीशङ्कराचार्याय नमः । आसनार्थे पुष्पं समर्पयामि ॥

पाद्यम् –

चलाचलनिकेताय चार्पितं पाद्यमुत्तमम् ।
सर्वधर्मपरित्यागं शरणागतितीर्थजम् ॥

ॐ श्रीशङ्कराचार्याय नमः । पादयोः पाद्यं समर्पयामि ॥

अर्घ्यम् –

अनन्यभक्तिसलिलं विनेयगुणमण्डितम् ।
अर्घ्यं तेऽनर्घ्यकैवल्यनाथाय परिकल्पितम् ॥

ॐ श्रीशङ्कराचार्याय नमः । हस्तयोरर्घ्यं समर्पयामि ॥

आचमनम् – मनोवाक्कायकर्माख्यं दत्तं ते निर्मलं जलम् ।
गृहीत्वा गुरुराजेन्द्र कुरुष्वाचमनं विभो ॥
ॐ श्रीशङ्कराचार्याय नमः । आचमनीयं जलं समर्पयामि ॥

स्नानम् – सर्वशास्त्रमयं तोयं सदा निर्मुक्तकल्मष ।
श्रद्धानद्याः समानीतं स्नानार्थं प्रतिगृह्यताम् ॥
ॐ श्रीशङ्कराचार्याय नमः । स्नानीयं जलम् अभिषेकं च समर्पयामि ॥

स्नानान्ते आचमनीयं जलं समर्पयामि ॥

वस्त्रम् – मायाचित्रपटाच्छन्ननिजगुह्योरुतेजसे ।
मम श्रद्धाभक्तिवासयुग्मं देशिक गृह्यताम् ॥
ॐ श्रीशङ्कराचार्याय नमः । वस्त्रोपवस्त्रं समर्पयामि ॥
तदन्ते आचमनीयं समर्पयामि ॥

चन्दनम् , अक्षताः –
महावाक्योत्थविज्ञान – गन्धाढ्यं तापमोचनम् ।
विलेपनं गुरुश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥
ॐ श्रीशङ्कराचार्याय नमः ।
चन्दनम् अक्षतान् च समर्पयामि ॥

पुष्पम् –
तुरीयवनसम्भूतं दिव्यभावमनोहरम् ।
तारादिमनुपुष्पालिं गृहाण गुरुनायक ॥
ॐ श्रीशङ्कराचार्याय नमः । पुष्पं समर्पयामि ॥

बिल्वपत्रम् – त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रयायुधम् ।
त्रिजन्मपापसंहारमेकबिल्वं शिवार्पणम् ॥
ॐ श्रीशङ्कराचार्याय नमः । बिल्वपत्रं समर्पयामि ॥

# श्रीशङ्कराचार्याष्टोत्तरशतनामावलिः

ॐ वेदमार्गप्रतिष्ठात्रे नमः ।
ॐ ब्रह्मानन्दप्रदायकाय नमः ।
ॐ अज्ञानतिमिरादित्याय नमः ।
ॐ सुज्ञानाम्बुधिचन्द्रमसे नमः ।
ॐ वर्णाश्रमप्रतिष्ठात्रे नमः ।
ॐ जीवनमुक्तिप्रदायकाय नमः ।
ॐ शिष्योपदेशनिरताय नमः ।
ॐ भक्ताभीष्टप्रदायकाय नमः ।
ॐ सूक्ष्मतत्त्वरहस्यज्ञाय नमः ।
ॐ कार्याकार्यप्रबोधकाय नमः ।(१०)
ॐ ज्ञानमुद्राञ्चितकराय नमः ।
ॐ शिष्यहृत्तापहारकाय नमः ।
ॐ परिव्राज्याश्रमोद्धर्त्रे नमः ।
ॐ सर्वतन्त्रस्वतन्त्रधिये नमः ।
ॐ अद्वैतस्थापनाचार्याय नमः ।
ॐ दक्षिणामूर्तिरूपभृते नमः ।
ॐ षण्मतस्थापनाचार्याय नमः ।
ॐ त्रयीमार्गप्रकाशकाय नमः ।
ॐ वेदसिद्धान्ततत्त्वज्ञाय नमः ।
ॐ दुर्वादिमतखण्डनाय नमः।(२०)
ॐ वैराग्यनिरताय नमः ।
ॐ शान्ताय नमः ।
ॐ संसारार्णवतारकाय नमः ।
ॐ प्रसन्नवदनाम्भोजाय नमः ।
ॐ परमार्थप्रकाशकाय नमः ।
ॐ निगमागमसारज्ञाय नमः ।
ॐ नित्यतृप्ताय नमः ।
ॐ महामुनये नमः ।
ॐ नित्यानन्दाय नमः ।
ॐ निरातङ्काय नमः । (३०)
ॐ निस्सङ्गाय नमः ।
ॐ निर्मलाय नमः ।
ॐ गुरवे नमः ।
ॐ निर्ममाय नमः ।
ॐ निरहङ्काराय नमः ।
ॐ विश्ववन्द्यपदाम्बुजाय नमः ।
ॐ सत्यप्रधानाय नमः ।
ॐ सद्भावाय नमः ।
ॐ सङ्ख्यातीतगुणोज्ज्वलाय नमः ।
ॐ अनघाय नमः । (४०)
ॐ सारहृदयाय नमः ।
ॐ सद्यः सारस्वतप्रदाय नमः ।
ॐ शुद्धसत्त्वमयाय नमः ।
ॐ धीराय नमः ।
ॐ दारिद्र्योन्मूलनक्षमाय नमः ।
ॐ तपोराशये नमः ।
ॐ महातेजसे नमः ।
ॐ मन्त्रशास्त्रविशारदाय नमः।

ॐ कलिघ्नाय नमः ।
ॐ कालकर्मज्ञाय नमः । (५०)
ॐ तमोगुणनिवारकाय नमः ।
ॐ क्रोधघ्नाय नमः ।
ॐ लोभरहिताय नमः ।
ॐ सर्वभूतहिते रताय नमः ।
ॐ नादबिन्दुकलाभिज्ञाय नमः ।
ॐ योगिहृत्पद्मभास्कराय नमः ।
ॐ अतीन्द्रियज्ञाननिधये नमः ।
ॐ क्षेमदायिने नमः ।
ॐ क्षमाकराय नमः ।
ॐ चिदानन्दाय नमः । (६०)
ॐ चिन्मयात्मने नमः ।
ॐ वाच्यलक्ष्यार्थभेदकृते नमः ।
ॐ भव्याय नमः ।
ॐ भद्रप्रदाय नमः ।
ॐ भूरिमहिम्ने नमः ।
ॐ विश्वरञ्जकाय नमः ।
ॐ स्वप्रकाशाय नमः ।
ॐ सदाधाराय नमः ।
ॐ विश्वबन्धवे नमः ।
ॐ शुभोदयाय नमः । (७०)
ॐ विशालकीर्तये नमः ।
ॐ वागीशाय नमः ।
ॐ सर्वलोकहितोत्सुकाय नमः ।
ॐ काषायवसनोपेताय नमः ।
ॐ जगत्पूज्याय नमः ।
ॐ जगद्गुरवे नमः ।
ॐ अक्षमालालसत्कण्ठाय नमः ।
ॐ त्रिपुण्ड्राङ्कितमस्तकाय नमः ।
ॐ ज्ञानात्मकैकदण्डाढ्याय नमः ।
ॐ कमण्डलुपरिग्रहाय नमः । (८०)
ॐ व्याख्यासिंहासनाधीशाय नमः।
ॐ सिंहासनविराजिताय नमः ।
ॐ द्विसप्ततिमतोच्छेत्रे नमः ।
ॐ प्रतिपक्षेभकेसरिणे नमः ।
ॐ तत्त्वमस्यादिवेदान्तमहावाक्योप-
देशकाय नमः ।
ॐ अव्याजकरुणामूर्तये नमः ।
ॐ परमहंसाश्रमस्थिताय नमः ।
ॐ कन्दर्पकोटिलावण्याय नमः ।
ॐ परार्थैकप्रयोजकाय नमः ।
ॐ कवये नमः । (९०)
ॐ शिवाय नमः ।
ॐ गुणग्राहिणे नमः ।
ॐ शरण्याय नमः ।
ॐ सुगतिप्रदाय नमः ।
ॐ अचिन्त्याय नमः ।
ॐ मधुरालापाय नमः ।
ॐ महेशाय नमः ।
ॐ भक्तवत्सलाय नमः ।
ॐ प्रत्यगात्मने नमः ।

ॐ पूर्णभिषजे नमः । (१००)

ॐ पूर्णभूम्ने नमः ।

ॐ परात्पराय नमः ।

ॐ प्रणवार्थोपदेशकाय नमः ।

ॐ भवानीप्रीतिवर्धकाय नमः ।

ॐ श्रीब्रह्मसूत्रोपनिषद्गीताभाष्यादिकल्पकाय नमः ।

ॐ सौन्दर्यलहरीमुख्यबहुस्तोत्रविधायकाय नमः ।

ॐ चतुर्दिक्चतुराम्नाय दशनामविधायकाय नमः ।

ॐ श्रीमच्छङ्करयोगीन्द्रभगवत्पादसंज्ञकाय नमः । (१०८)

धूपः

पञ्चकोशमयं दिव्यं दशाङ्गं गुग्गुलं गुरो ।
दग्ध्वा ज्ञानाग्निना नाथ धूपमाघ्रापयामि ते ॥

ॐ श्रीशङ्कराचार्याय नमः । धूपम् आघ्रापयामि ॥

दीपः

वैराग्यतैलसम्पूर्णे भक्तिवर्तिसमन्विते ।
विवेकपूर्णपात्रेऽहं बोधदीपं प्रदर्शये ॥

ॐ श्रीशङ्कराचार्याय नमः । दीपं दर्शयामि ॥

नैवेद्यम्

ॐ महापुरुषाय विद्महे परमहंसाय धीमहि ।
तन्नो गुरुः प्रचोदयात् ॥

ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा,
ॐ व्यानाय स्वाहा, ॐ उदानाय स्वाहा,
ॐ समानाय स्वाहा ॥

ॐ श्रीशङ्कराचार्याय नमः । आचमनीयं समर्पयामि ॥
पूर्वापोषणं समर्पयामि ॥

ब्रह्मनिष्ठाय नैवेद्यं ब्रह्माण्डाख्यं महौदनम् ।
समाधिपक्वमधुरं शिवाय गुरवेऽर्पितम् ॥

ॐ श्रीशङ्कराचार्याय नमः । नैवेद्यं निवेदयामि ॥
नानाऋतुफलानि च समर्पयामि ॥

श्रीशङ्कराचार्याय नमः । मध्ये पानीयं समर्पयामि ।
नैवेद्यान्ते आचमनीयं समर्पयामि । उत्तरापोषणं समर्पयामि ।
मुखप्रक्षालनं समर्पयामि । हस्तप्रक्षालनं समर्पयामि ॥

ॐ श्रीशङ्कराचार्याय नमः । करोद्वर्तनार्थे चन्दनं समर्पयामि ॥

## ताम्बूलम्, दक्षिणा

जीवब्रह्मैक्यविज्ञानतृप्ताय गुरुमूर्तये ।
जीवन्मुक्तिसुखाकारं ताम्बूलं प्रतिगृह्यताम् ॥

ॐ श्रीशङ्कराचार्याय नमः ।
सदक्षिणाताम्बूलं समर्पयामि ॥

## नीराजनम्

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥१॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥२॥

नीराजनं निर्मलदीप्तिमद्भिर्दीपाङ्कुरैरुज्ज्वलमुच्छ्रितैश्च ।
घण्टानिनादेन समर्पयामि मृत्युञ्जयाय गुरुनायकाय ॥३॥

ॐ श्रीशङ्कराचार्याय नमः । नीराजनं दर्शयामि ॥
ॐ श्रीशङ्कराचार्याय नमः । जलारार्तिकं समर्पयामि ॥

मन्त्रपुष्पाञ्जलिः

नानासुगन्धपुष्पाणि यथाकालोद्भवानि च ।
पुष्पाञ्जलिं मया दत्तं गृहाण गुरुनायक ॥

ॐ श्रीशङ्कराचार्याय नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

प्रदक्षिणा

परिभ्रमन्ति ब्रह्माण्डकोटयो यस्य सम्पदे ।
तस्य श्रीगुरुनाथस्य संविद्-दृष्ट्या प्रदक्षिणम् ॥
ॐ श्रीशङ्कराचार्याय नमः । प्रदक्षिणां समर्पयामि ॥

नमस्कारप्रार्थनास्तुतिः

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥१॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥२॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात्परब्रह्म तस्मै श्रीगुरवे नमः ॥३॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादं शङ्करं लोकशङ्करम् ॥४॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम्
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥५॥

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥६॥

शिवं हरिं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥७॥

श्रीशङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम् ।
तं तोटकं वार्तिककारमन्यानस्मद्गुरून्सन्ततमानतोऽस्मि ॥८॥

नारोग्यमद्य कलये न च भोग्यजातं
भाग्यं न वा विषयलम्पटतानिदानम् ।
वैराग्यमेव सुतरामुपलम्भयन् मां
स्वामिन् समुद्धर भवाम्बुनिधेर्दुरन्तात् ॥९॥

ॐ श्रीशङ्कराचार्याय नमः । नमस्करोमि ।
प्रार्थनां स्तुतिं च समर्पयामि ॥

## विशेषार्घ्यम्

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

ॐ श्रीशङ्कराचार्याय नमः । विशेषार्घ्यं समर्पयामि ॥

## प्रार्थनापूर्वकं क्षमापनम्

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व गुरुपुङ्गव ॥

ॐ श्रीशङ्कराचार्याय नमः । प्रार्थनापूर्वकं क्षमां याचे ॥

## समर्पणम्

देवनाथ गुरो स्वामिन् देशिक स्वात्मनायक ।
त्राहि त्राहि कृपासिन्धो पूजां पूर्णतरां कुरु ॥

अनया पूजया श्रीगुरुः प्रीयताम् ॥
ॐ तत् सत् ब्रह्मार्पणमस्तु ॥

# १४७. श्रीमद्भगवद्गीतापूजनम्

ध्यानम्

हिरण्यवर्णां चिति सुन्दराङ्गीं
प्रपन्नभक्तार्तिहरां प्रसन्नाम् ।
कृष्णामृतं वाक्यमुदीरयन्तीं
ध्यायामि गीतां श्रुतिसारभूताम् ॥

ॐ श्रीगीतायै नमः । ध्यानं समर्पयामि ॥

आवाहनम्

श्रीकृष्णहृदयान्तस्थे परमानन्दविग्रहे ।
सर्वभूतहिते मातरेह्येहि परमेश्वरि ॥

ॐ श्रीगीतायै नमः । आवाहनं समर्पयामि ॥

पाद्यम्, अर्घ्यम्, आचमनीयं, स्नानीयं जलं च समर्पयामि ।
सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ।

श्रीमगवद्गीताष्टोत्तरशतनामावल्या सहितैः
पुष्पैः/तुलसीदलैः/कुङ्कुमकणैः अर्चनां समर्पयामि।

## श्रीमद्भगवद्गीताष्टोत्तरशतनामावलिः

ॐ गीतायै नमः ।
ॐ गोविन्दहृद्गङ्गायै नमः ।
ॐ गुरुगेयायै नमः ।
ॐ गिरामृतायै नमः ।
ॐ गायत्र्यै नमः ।
ॐ गोपितायै नमः ।
ॐ गूढायै नमः ।
ॐ गुडाकेशार्तिहारिण्यै नमः ।
ॐ मधुसूदनमुखाम्भोजसुधायै नमः ।
ॐ सर्वार्थमञ्जर्यै नमः । (१०)
ॐ महाभारतमध्यस्थायै नमः ।
ॐ मुकुन्दघनदामिन्यै नमः ।

ॐ हरिझङ्कृतचिद्वीणायै नमः ।
ॐ त्रिषट्तन्त्रीवरस्वरायै नमः ।
ॐ प्रस्थानप्रमुखायै नमः ।
ॐ प्रत्यग्दीपिकायै नमः ।
ॐ प्रणवात्मिकायै नमः ।
ॐ प्रपत्त्यङ्कुरितायै नमः ।
ॐ सीतायै नमः ।
ॐ सत्यायै नमः । (२०)
ॐ कृष्णाब्जशारदायै नमः ।
ॐ कृष्णापतिसमुद्धर्त्र्यै नमः ।
ॐ कार्पण्याधिमहौषधये नमः ।
ॐ अम्बायै नमः ।
ॐ अचिन्त्यपदायै नमः ।
ॐ अमात्रायै नमः ।
ॐ चिन्मात्रायै नमः ।
ॐ आनन्दवर्षिण्यै नमः ।
ॐ अष्टादशभुजायै नमः ।
ॐ अनन्तायै नमः । (३०)
ॐ अध्यात्मशस्त्रास्त्रधारिण्यै नमः ।
ॐ वरदायै नमः ।
ॐ अभयदायै नमः ।
ॐ ज्ञानमुद्रायै नमः ।
ॐ मन्त्राक्षमालिकायै नमः ।
ॐ वेणुगानरतायै नमः ।
ॐ शूलशङ्खचक्रगदाधरायै नमः ।
ॐ विद्याकुम्भोलसत्पाणये नमः ।
ॐ बाणकोदण्डमण्डितायै नमः ।
ॐ करताललयोपेतायै नमः। (४०)
ॐ पद्मपाशाङ्कुशोज्ज्वलायै नमः ।
ॐ अनुष्टुप्सङ्कुलायै नमः ।
ॐ नानाछन्दालङ्कारसुन्दर्यै नमः ।
ॐ इन्द्रोपेन्द्रसंवलितायै नमः ।
ॐ उपजातिसुसज्जितायै नमः ।
ॐ विपरीतवृत्तियुक्तायै नमः ।
ॐ वर्णमङ्गलविग्रहायै नमः ।
ॐ व्यासप्रियायै नमः ।
ॐ सप्तशत्यै नमः ।
ॐ वासुदेवप्रसादजायै नमः।(५०)
ॐ विषादघ्न्यै नमः ।
ॐ विरागिण्यै नमः ।
ॐ विद्यायै नमः ।
ॐ व्यामोहनाशिन्यै नमः ।
ॐ विनेयवत्सलायै नमः ।
ॐ श्रेयायै नमः ।
ॐ निश्चितार्थप्रकाशिन्यै नमः ।
ॐ देहीदेहविवेकाढ्यायै नमः ।
ॐ बुद्धिद्वयविलासिन्यै नमः ।
ॐ निर्द्वन्द्वायै नमः । (६०)

ॐ नित्यसत्त्वस्थायै नमः ।
ॐ निःस्पृहायै नमः ।
ॐ संशयापहायै नमः ।
ॐ ब्राह्मीस्थित्यै नमः ।
ॐ स्थितप्रज्ञायै नमः ।
ॐ ब्रह्मस्पर्शसुखास्पदायै नमः ।
ॐ ब्रह्मयोनये नमः ।
ॐ यज्ञमय्यै नमः ।
ॐ ब्रह्मनिर्वाणदायिन्यै नमः ।
ॐ कर्मान्तायै नमः । (७०)
ॐ कामदायै नमः ।
ॐ काम्यायै नमः ।
ॐ सौम्यायै नमः ।
ॐ योगत्रयाश्रयायै नमः ।
ॐ धर्मक्षेत्रोद्भवायै नमः ।
ॐ धर्म्यायै नमः ।
ॐ ध्यानस्थायै नमः ।
ॐ भक्तिनिर्झर्यै नमः ।
ॐ ज्ञानविज्ञानसोपानायै नमः ।
ॐ दिव्यस्मरणसन्तत्यै नमः । (८०)
ॐ राजविद्यायै नमः ।
ॐ राजगुह्यायै नमः ।
ॐ प्रत्यक्षायै नमः ।
ॐ सुलभागत्यै नमः ।
ॐ विभूतिभूषितायै नमः ।
ॐ अनन्तायै नमः ।
ॐ विश्वरूपप्रदर्शिन्यै नमः ।
ॐ अद्वेष्ट्टत्वादिसन्दोहायै नमः ।
ॐ क्षेत्रक्षेत्रज्ञपालिन्यै नमः ।
ॐ गुणज्ञायै नमः । (९०)
ॐ त्रिगुणातीतायै नमः ।
ॐ क्षराक्षरविमर्शिन्यै नमः ।
ॐ पुरुषोत्तमपरायै नमः ।
ॐ पूर्णायै नमः ।
ॐ कृतकृत्यपदप्रदायै नमः ।
ॐ दिव्यसम्पत्प्रसवे नमः ।
ॐ दुर्गायै नमः ।
ॐ दुराचारविघातिन्यै नमः ।
ॐ संन्याससरसिकायै नमः ।
ॐ मुक्तायै नमः । (१००)
ॐ सर्वपापप्रमोचिन्यै नमः ।
ॐ श्रीशङ्करादृतायै नमः ।
ॐ अद्वैतायै नमः ।
ॐ श्रीनिवासनिवासभुवे नमः ।
ॐ सर्वशास्त्रमय्यै नमः ।
ॐ संविदे नमः ।
ॐ स्मृत्यै नमः ।
ॐ समरसाकृत्यै नमः।(१०८)

धूप–दीपः –

धूपम् आघ्रापयामि । दीपं दर्शयामि ॥

नैवेद्यम् –

ॐ सर्वशास्त्रस्वरूपां तां ब्रह्मविद्यां च धीमहि ।
सा नो गीता प्रचोदयात् ॥

ॐ श्री गीतायै नमः । नैवेद्यं निवेदयामि
नाना ऋतुफलानि च समर्पयामि ॥

नीराजनम्

ॐ न तत्र सूर्यो भाति न चन्द्रतारकम्
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥१॥
अन्तस्तेजो बहिस्तेजः एकीकृत्यामितप्रभम् ।
त्रिधा देवि परिभ्राम्य नीराजनं निवेदये ॥२॥
ॐ श्री गीतायै नमः । नीराजनं समर्पयामि ॥

मन्त्रपुष्पाञ्जलिः –

पुष्पाञ्जलिं गृहाणेमं परब्रह्मस्वरूपिणि ।
भक्त्या समर्पितं देवि प्रसन्ना भव सर्वदा ॥

ॐ श्री गीतायै नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

नमस्कारः –

व्यासस्तुतां विषादघ्नीं वेदान्तज्ञानमातरम् ।
नमामि भगवद्गीतां संसारार्णवतारिणीम् ॥
ॐ श्री गीतायै नमः । नमस्करोमि ॥

समर्पणम् –

संविन्मये परे देवि कृष्णप्रज्ञारसात्मिके ।
स्वीकृत्य मम पूजनं प्रसन्ना भव सर्वदा ॥
ॐ तत् सत् कृष्णार्पणमस्तु ॥

## १५१. श्रीकृष्णपूजनम्

ध्यानम् -

फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥

ॐ श्रीकृष्णाय नमः । ध्यानं समर्पयामि ॥

आवाहनम् -

आवाहयामि देवेशं देवकीगर्भसम्भवम् ।
बालरूपधरं कृष्णं सच्चिदानन्दविग्रहम् ॥

ॐ श्रीकृष्णाय नमः । आवाहनं समर्पयामि ॥

आसनम् -

रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम् ।
आसनं च मया दत्तं गृहाण परमेश्वर ॥

ॐ श्रीकृष्णाय नमः । आसनार्थे पुष्पं समर्पयामि ॥

पाद्यम् -

उष्णोदकं निर्मलं च सर्वसौगन्ध्यसंयुतम् ।
पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥

ॐ श्रीकृष्णाय नमः । पादयोः पाद्यं समर्पयामि ॥

अर्घ्यम् -

नमस्ते देवदेवेश नमस्ते करुणाम्बुधे ।
करुणां कुरु मे देव गृहाणार्घ्यं नमोऽस्तु ते ॥

ॐ श्रीकृष्णाय नमः । हस्तयोरर्घ्यं समर्पयामि ॥

आचमनम् -

सर्वतीर्थसमायुक्तं सुगन्धिं निर्मलं जलम् ।
आचम्यतां मया दत्तं गृहाण परमेश्वर ॥

ॐ श्रीकृष्णाय नमः । आचमनीयं जलं समर्पयामि ॥

स्नानम् -

गङ्गासरस्वतीरेवापयोष्णीनर्मदाजलैः ।
स्नापितोऽसि मया देव ततः शान्तिं प्रयच्छ मे ॥

ॐ श्रीकृष्णाय नमः । स्नानीयं जलं समर्पयामि,
स्नानान्ते आचमनीयं समर्पयामि ॥

वस्त्रम् -

सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे ।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्येताम् ॥

ॐ श्रीकृष्णाय नमः । वस्त्रोपवस्त्रं समर्पयामि,
तदन्ते आचमनीयं जलं समर्पयामि ॥

यज्ञोपवीतम् -

नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ।
उपवीतं मया दत्तं गृहाण परमेश्वर ॥

ॐ श्रीकृष्णाय नमः । यज्ञोपवीतं समर्पयामि,
तदन्ते आचमनीयं जलं समर्पयामि ॥

गन्धः -

गन्धं कुङ्कुमकस्तूरीघनसारसमन्वितम् ।
विलेपनं गृहाणेदं कुब्जानुग्रहकारिणे ॥

ॐ श्रीकृष्णाय नमः । गन्धं समर्पयामि ॥

अक्षताः –

अक्षतान् धवलान् दिव्यान् अक्षय्यफलदायक ।
गृहाण करुणाराशे शकटासुरभञ्जन ॥

ॐ श्रीकृष्णाय नमः । अक्षतान् समर्पयामि ॥

पुष्पम् –

जातीचम्पकपुन्नागमालतीमल्लिकादिभिः ।
कुसुमैः पूजयामि त्वां कुन्तीपुत्रसमर्चित ॥

ॐ श्रीकृष्णाय नमः । पुष्पाणि समर्पयामि ॥

तुलसी –

तुलसीं हेमरूपाञ्च रत्नरूपाञ्च मञ्जरीम् ।
भवमोक्षप्रदां तुभ्यमर्पयामि हरिप्रियाम् ॥

ॐ श्रीकृष्णाय नमः । तुलसीपत्रं समर्पयामि ॥

श्रीकृष्णाष्टोत्तरशतनामावल्या सहितैः तुलसीदलैः अर्चनां समर्पयामि।

## श्रीकृष्णाष्टोत्तरशतनामावलिः

ॐ श्रीकृष्णाय नमः ।
ॐ कमलानाथाय नमः ।
ॐ वासुदेवाय नमः ।
ॐ सनातनाय नमः ।
ॐ वसुदेवात्मजाय नमः ।
ॐ पुण्याय नमः ।
ॐ लीलामानुषविग्रहाय नमः ।
ॐ श्रीवत्सकौस्तुभधराय नमः ।
ॐ यशोदावत्सलाय नमः ।
ॐ हरये नमः । (१०)
ॐ चतुर्भुजात्तचक्रासिगदा-
शङ्खाद्यायुधाय नमः ।
ॐ देवकीनन्दनाय नमः ।
ॐ श्रीशाय नमः ।

ॐ नन्दगोपप्रियात्मजाय नमः ।
ॐ यमुनावेगसंहारिणे नमः ।
ॐ बलभद्रप्रियानुजाय नमः ।
ॐ पूतनाजीवितहराय नमः ।
ॐ शकटासुरभञ्जनाय नमः ।
ॐ नन्दव्रजजनानन्दाय नमः ।
ॐ सच्चिदानन्दविग्रहाय नमः । (२०)
ॐ नवनीतविलिप्ताङ्गाय नमः ।
ॐ नवनीतनटाय नमः ।
ॐ अनघाय नमः ।
ॐ नवनीतनवाहाराय नमः ।
ॐ मुचुकुन्दप्रसादकाय नमः ।
ॐ षोडशस्त्रीसहस्रेशाय नमः ।
ॐ त्रिभङ्गललिताकृतये नमः ।
ॐ शुकवागमृताब्धीन्दवे नमः ।
ॐ गोविन्दाय नमः ।
ॐ गोविन्दां पतये नमः । (३०)
ॐ वत्सवाटचलाय नमः ।
ॐ अनन्ताय नमः ।
ॐ धेनुकासुरखण्डनाय नमः ।
ॐ तृणीकृततृणावर्ताय नमः ।
ॐ यमलार्जुनभञ्जनाय नमः ।
ॐ उत्तालतालभेत्त्रेनमः ।
ॐ तमालश्यामलाकृतये नमः ।
ॐ गोपगोपीश्वराय नमः ।
ॐ योगिने नमः ।
ॐ कोटिसूर्यसमप्रभाय नमः ।(४०)
ॐ इलापतये नमः ।
ॐ परञ्ज्योतिषे नमः ।
ॐ यादवेन्द्राय नमः ।
ॐ यदूद्वहाय नमः ।
ॐ वनमालिने नमः ।
ॐ पीतवाससे नमः ।
ॐ पारिजातापहारकाय नमः।
ॐ गोवर्धनाचलोद्धर्त्रे नमः ।
ॐ गोपालाय नमः ।
ॐ सर्वपालकाय नमः । (५०)
ॐ अजाय नमः ।
ॐ निरञ्जनाय नमः ।
ॐ कामजनकाय नमः ।
ॐ कञ्जलोचनाय नमः ।
ॐ मधुघ्ने नमः ।
ॐ मथुरानाथाय नमः ।
ॐ द्वारकानायकाय नमः ।
ॐ बलिने नमः ।
ॐ वृन्दावनान्तःसञ्चारिणे नमः ।
ॐ तुलसीदामभूषणाय नमः।(६०)
ॐ मुष्टिकासुरचाणूरमल्ल-
युद्धविशारदाय नमः ।
ॐ संसारवैरिणे नमः ।

ॐ कंसारये नमः ।
ॐ मुरारये नमः ।
ॐ नरकान्तकाय नमः ।
ॐ स्यमन्तकमणिहर्त्रे नमः ।
ॐ नरनारायणात्मकाय नमः ।
ॐ कुब्जाकृष्णाम्बरधराय नमः ।
ॐ मायिने नमः ।
ॐ परमपुरुषाय नमः । (७०)
ॐ अनादिब्रह्मचारिणे नमः ।
ॐ कृष्णाव्यसनकर्षकाय नमः ।
ॐ शिशुपालशिरच्छेत्त्रे नमः ।
ॐ दुर्योधनकुलान्तकाय नमः ।
ॐ विदुराक्रूरवरदाय नमः ।
ॐ विश्वरूपप्रदर्शकाय नमः ।
ॐ सत्यवाचे नमः ।
ॐ सत्यसङ्कल्पाय नमः ।
ॐ सत्यभामारताय नमः ।
ॐ जयिने नमः । (८०)
ॐ सुभद्रापूर्वजाय नमः ।
ॐ विष्णवे नमः ।
ॐ भीष्ममुक्तिप्रदायकाय नमः ।
ॐ जगद्गुरवे नमः ।
ॐ जगन्नाथाय नमः ।
ॐ वेणुनादविशारदाय नमः ।
ॐ वृषभासुरविध्वंसिने नमः ।
ॐ बाणासुरबलान्तकाय नमः ।
ॐ युधिष्ठिरप्रतिष्ठात्रे नमः ।
ॐ बर्हिबर्हावतंसकाय नमः। (९०)
ॐ पार्थसारथये नमः ।
ॐ अव्यक्ताय नमः ।
ॐ गीतामृतमहोदधये नमः ।
ॐ कालियफणिमाणिक्यरञ्जित-
श्रीपदाम्बुजाय नमः ।
ॐ दामोदराय नमः ।
ॐ यज्ञभोक्त्रे नमः ।
ॐ दानवेन्द्रविनाशकाय नमः ।
ॐ नारायणाय नमः ।
ॐ परब्रह्मणे नमः ।
ॐ पन्नगाशनवाहनाय नमः।(१००)
ॐ जलक्रीडासमासक्त-
गोपीवस्त्रापहारकाय नमः ।
ॐ पुण्यश्लोकाय नमः ।
ॐ तीर्थपदाय नमः ।
ॐ वेदवेद्याय नमः ।
ॐ दयानिधये नमः ।
ॐ सर्वभूतात्मकाय नमः ।
ॐ सर्वग्रहरूपिणे नमः ।
ॐ परात्पराय नमः ।(१०८)

धूपः -

धूपं गृहाण देवेश दशाङ्गेन सुवासितम् ।
गोविन्द गोकुलाधीश गोवर्धनधराव्यय ॥

ॐ श्रीकृष्णाय नमः । धूपम् आघ्रापयामि ॥

दीपः

साज्यवर्तिसमायुक्तं ज्योतिर्मय जनार्दन ।
मङ्गलायतनं दीपं जगन्मङ्गल गृह्यताम् ॥

ॐ श्रीकृष्णाय नमः । दीपं दर्शयामि ॥

नैवेद्यम्

ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नः कृष्णः प्रचोदयात् ॥१॥

निवेदयामि नैवेद्यं नानाभक्ष्यफलादिकम् ।
गोक्षीरं नवनीतं च गोविन्द प्रतिगृह्यताम् ॥२॥

ॐ श्रीकृष्णाय नमः । नैवेद्यं निवेदयामि
नानाऋतुफलानि च समर्पयामि ॥

ताम्बूलम् -

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
एलालवङ्गसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

ॐ श्रीकृष्णाय नमः । मुखशुद्ध्यर्थं ताम्बूलं समर्पयामि ॥

दक्षिणा -

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदम् अतः शान्तिं प्रयच्छ मे ॥

ॐ श्रीकृष्णाय नमः ।
साङ्गतासिद्ध्यर्थं हिरण्यगर्भदक्षिणां समर्पयामि ॥

नीराजनम् –

नीराजनं गृहाणेदं नारायण निरामय ।
नीरजाक्ष नमस्तुभ्यं नताभीष्टफलप्रद ॥१॥

नीराजनं निर्मलदीप्तिमद्भिर्दीपाङ्कुरैरुज्ज्वलमुच्छ्रितैश्च ।
घण्टानिनादेन समर्पयामि नारायणाय नरकान्तकाय ॥२॥

ॐ श्रीकृष्णाय नमः । नीराजनं दर्शयामि ॥
ॐ श्रीकृष्णाय नमः । जलारार्तिकं समर्पयामि ॥

मन्त्रपुष्पाञ्जलिः –

पुष्पाञ्जलिं गृहाणाद्य मया भक्त्या समर्पितम् ।
पुरुषोत्तम पूर्णात्मन् पुण्यमूर्ते परात्पर ॥

ॐ श्रीकृष्णाय नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

प्रदक्षिणा –

प्रकृष्टपापनाशाय प्रकृष्टफलसिद्धये ।
प्रदक्षिणं करोमि त्वां प्रसीद पुरुषोत्तम ॥

ॐ श्रीकृष्णाय नमः । प्रदक्षिणां समर्पयामि ॥

प्रार्थना –

देवदेव दयासिन्धो देहि मे वरमीप्सितम् ।
त्वयि भक्तिं परां देहि सर्वदा रक्ष मां प्रभो ॥

ॐ श्रीकृष्णाय नमः । प्रार्थनां समर्पयामि ॥

नमस्कारः –

कृष्णाय वासुदेवाय हरये परमात्मने ।
प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ॥

ॐ श्रीकृष्णाय नमः । नमस्करोमि ॥

विशेषार्घ्यम् –

जातः कंसवधार्थाय भूभारोत्तारणाय च ।
पाण्डवानां हितार्थाय धर्मसंस्थापनाय च ॥

वासुदेवाश्रितानां च भक्तानां मुक्तिहेतवे ।
विशेषार्घ्यं मया दत्तं गृहीत्वा वरदो भव ॥

ॐ श्रीकृष्णाय नमः । विशेषार्घ्यं समर्पयामि ॥

प्रार्थनापूर्वकं क्षमापनम् –

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षमस्व पुरुषोत्तम ॥

ॐ श्रीकृष्णाय नमः । प्रार्थनापूर्वकं क्षमां याचे ॥

समर्पणम् –

नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्भाव्यं तद्भवतु भगवन् पूर्वकर्मानुरूपम् ।

एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि
त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥

अनया पूजया श्रीकृष्णपरमात्मा प्रीयताम् ॥
ॐ तत् सत् कृष्णार्पणमस्तु ॥

# १५२. श्रीदक्षिणामूर्त्यष्टोत्तरशतनामावलिः

ॐ ओङ्कारसिंहसर्वेन्द्राय नमः ।
ॐ ओङ्कारोद्यानकोकिलाय नमः ।
ॐ ओङ्कारनीडशुकराजे नमः ।
ॐ ओङ्कारारण्यकुञ्जराय नमः ।
ॐ नगराजसुताजानये नमः ।
ॐ नगराजनिजालयाय नमः ।
ॐ नवमाणिक्यमालाढ्याय नमः ।
ॐ नवचन्द्रशिखामणये नमः ।
ॐ नन्दिताशेषमौनीन्द्राय नमः ।
ॐ नन्दीशादिमदेशिकाय नमः।(१०)
ॐ मोहानलसुधासाराय नमः ।
ॐ मोहाम्बुजसुधाकराय नमः ।
ॐ मोहान्धकारतरणये नमः ।
ॐ मोहोत्पलनभोमणये नमः ।
ॐ भक्तज्ञानाब्धिशीतांशवे नमः ।
ॐ भक्ताज्ञानतृणानलाय नमः ।
ॐ भक्ताम्भोजसहास्रांशवे नमः ।
ॐ भक्तकेकिघनाघनाय नमः ।
ॐ भक्तकैरवराकेन्दवे नमः ।
ॐ भक्तकोकदिवाकराय नमः।(२०)
ॐ गजाननादिसम्पूज्याय नमः ।
ॐ गजचर्मोज्ज्वलाकृतये नमः ।
ॐ गङ्गाधवलदिव्याङ्गाय नमः ।
ॐ गङ्गापङ्कलसज्जटाय नमः ।
ॐ गगनाम्बरसंवीताय नमः ।
ॐ गगनामुक्तमूर्धजाय नमः ।
ॐ वदनाब्जजिताब्जश्रिये नमः ।
ॐ वदनेन्दुस्फुरद्दिशाय नमः ।
ॐ वरदानैकनिपुणाय नमः ।
ॐ वरवीणोज्ज्वलत्कराय नमः ।(३०)
ॐ वनवाससमुल्लसाय नमः ।
ॐ वनवीरैकलोलुपाय नमः ।
ॐ तेजःपुञ्जघनाकाराय नमः ।
ॐ तेजसामपि भासकाय नमः ।
ॐ विनेयानां तेजःप्रदाय नमः ।
ॐ तेजोमयनिजाश्रमाय नमः।
ॐ दमितानङ्गसङ्ग्रामाय नमः ।
ॐ दरहासजिताङ्गनाय नमः ।
ॐ दयारससुधासिन्धवे नमः ।
ॐ दरिद्रधनशेवधये नमः ।
ॐ क्षीरेन्दुस्फटिकाकाराय नमः ।
ॐ क्षीरेन्दुमुकुटोज्ज्वलाय नमः ।
ॐ क्षीरोपहाररसिकाय नमः ।
ॐ क्षिप्रैश्वर्यफलप्रदाय नमः ।
ॐ नानाभरणमुग्धाङ्गाय नमः ।
ॐ नारीसम्मोहनाकृतये नमः।
ॐ नादब्रह्मरसास्वादिने नमः ।
ॐ नागभूषणभूषिताय नमः ।

ॐ मूर्तिनिन्दितकन्दर्पाय नमः ।
ॐ मूर्तामूर्तजगद्वपुषे नमः । (५०)
ॐ मूलाज्ञानतमोभानवे नमः ।
ॐ मूर्तिमत्कल्पपादपाय नमः ।
ॐ तरुणादित्यसङ्काशाय नमः ।
ॐ तन्त्रीवादनतत्पराय नमः ।
ॐ तरुमूलैकनिलयाय नमः ।
ॐ तप्तजाम्बूनदप्रभाय नमः ।
ॐ तत्त्वपुस्तोल्लसत्पाणये नमः ।
ॐ तपनोडुपलोचनाय नमः ।
ॐ यमसन्नुतसत्कीर्तये नमः ।
ॐ यमसंयमसंयुताय नमः ।(६०)
ॐ यतिरूपधराय मौनिने नमः ।
ॐ यतीन्द्रोपास्यविग्रहाय नमः।
ॐ मन्दारहाररुचिराय नमः ।
ॐ मदनायुतसुन्दराय नमः ।
ॐ मन्दस्मितलसद्वक्त्राय नमः ।
ॐ मधुराधरपल्लवाय नमः ।
ॐ मञ्जीरमञ्जुपादाब्जाय नमः ।
ॐ मणिपट्टोलसत्कटये नमः ।
ॐ हस्ताङ्कुरितचिन्मुद्राय नमः ।
ॐ हठयोगपरोत्तमाय नमः। (७०)
ॐ हंसजप्याक्षमालाढ्याय नमः ।
ॐ हंसेन्द्राराध्यपादुकाय नमः ।
ॐ मेरुशृङ्गतटोल्लासाय नमः ।
ॐ मेघश्याममनोहराय नमः ।
ॐ मेधाङ्कुरालवालाग्र्याय नमः ।
ॐ मेधापक्कफलद्रुमाय नमः ।
ॐ धार्मिकान्तर्गुहावासाय नमः ।
ॐ धर्ममार्गप्रवर्तकाय नमः ।
ॐ धामत्रयनिजारामाय नमः ।
ॐ धर्मोत्तममनोरथाय नमः । (८०)
ॐ प्रबोधोद्गारदीपश्रिये नमः ।
ॐ प्रकाशितजगत्त्रयाय नमः ।
ॐ प्रज्ञाचन्द्रशिलाचन्द्राय नमः ।
ॐ प्रज्ञामणिवराकराय नमः ।
ॐ ज्ञानान्तरभासात्मने नमः ।
ॐ ज्ञातृज्ञादिविदूरगाय नमः ।
ॐ ज्ञानज्ञाद्वैतदिव्याङ्गाय नमः ।
ॐ ज्ञातृज्ञादिकुलागताय नमः ।
ॐ प्रपन्नपारिजाताश्रयाय नमः ।
ॐ प्रणतार्त्यब्धिवाडवाय नमः।(९०)
ॐ भूतानां प्रमाणभूताय नमः ।
ॐ प्रपञ्चहितकारकाय नमः ।
ॐ यत्तत्त्वमसिसंवेद्याय नमः ।
ॐ यज्ञगेयात्मवैभवाय नमः ।
ॐ यज्ञादिदेवतामूर्तये नमः ।
ॐ यजमानवपुर्धराय नमः ।
ॐ छत्राधिपतिविश्वेशाय नमः ।
ॐ छत्रचामरसेविताय नमः ।
ॐ छन्दश्शास्त्रादिनिपुणाय नमः ।
ॐ छलजात्यादिदूरगाय नमः। (१००)

ॐ स्वाभाविकसुखैकात्मने नमः ।
ॐ स्वानुभूतिरसोदधये नमः ।
ॐ स्वाराज्यसम्पदध्यक्षाय नमः ।
ॐ स्वात्मारामसहामतये नमः ।
ॐ हाटकाभजटाजूटाय नमः ।
ॐ हासोदस्तारिमण्डलाय नमः ।
ॐ हालाहलोज्ज्वलगलाय नमः ।
ॐ हार्दग्रन्थिविमोचकाय नमः।(१०८)

## १५३. श्रीवेदव्यासाष्टोत्तरशतनामावलिः

ॐ नारायणाय नमः ।
ॐ नराकाराय नमः ।
ॐ तपोभूताय नमः ।
ॐ तपोनिधये नमः ।
ॐ वेदव्यासाय नमः ।
ॐ नीलभासाय नमः ।
ॐ संसारार्णवतारकाय नमः ।
ॐ ज्ञानावताराय नमः ।
ॐ पुरुधिये नमः ।
ॐ शास्त्रयोनये नमः । (१०)
ॐ चिदाकृतये नमः ।
ॐ पराशरात्मजाय नमः ।
ॐ पुण्याय नमः ।
ॐ मुनिवंशशिखामणये नमः ।
ॐ कालीपुत्राय नमः ।
ॐ कलिध्वंसकाय नमः ।
ॐ कानीनाय नमः ।
ॐ करुणार्णवाय नमः ।
ॐ कीटमुक्तिप्रदाय नमः ।
ॐ कृष्णाय नमः । (२०)
ॐ कुरुवंशविवर्धकाय नमः ।
ॐ कुरुक्षेत्रनिजावासाय नमः ।
ॐ हिमाचलकृतालयाय नमः ।
ॐ कमण्डलुधराय नमः ।
ॐ संविन्मुद्राय नमः ।
ॐ अभीतिप्रदायकाय नमः ।
ॐ विशालवक्षसे नमः ।
ॐ शुचिवाससे नमः ।
ॐ कृष्णाजिनविराजिताय नमः ।
ॐ महाललाटविलसत्त्रिपुण्ड्राय नमः(३०)
ॐ पद्मलोचनाय नमः ।
ॐ भूतिभूषितसर्वाङ्गाय नमः ।
ॐ रुद्राक्षभरणान्विताय नमः ।
ॐ दण्डपाणये नमः ।
ॐ दीर्घकायाय नमः ।
ॐ जटावलयशोभिताय नमः ।
ॐ महायोगिने नमः ।
ॐ महामतये नमः ।

ॐ भक्तिधाराधराय नमः ।
ॐ विभवे नमः । (४०)
ॐ वेदोद्धर्त्रे नमः ।
ॐ जितप्राणाय नमः ।
ॐ चिरजीविने नमः ।
ॐ जयप्रदाय नमः ।
ॐ वैशम्पायनवन्द्याङ्घ्रये नमः ।
ॐ पैलजैमिनिपूजिताय नमः ।
ॐ सुमन्तुशिक्षकाय नमः ।
ॐ सूतपुत्रानुग्रहकारकाय नमः ।
ॐ वेदशाखाविनिर्मात्रे नमः ।
ॐ काण्डत्रयविधायकाय नमः। (५०)
ॐ वेदान्तपुण्यचरणाय नमः ।
ॐ आम्नायनसुपालकाय नमः ।
ॐ अचिन्त्यरचनाशक्तये नमः ।
ॐ अखण्डैकात्मसंस्थितये नमः ।
ॐ अष्टादशपुराणाब्जसूर्याय नमः ।
ॐ सूरिजनेश्वराय नमः ।
ॐ महाभारतकर्त्रे नमः ।
ॐ ब्रह्मसूत्रप्रणायकाय नमः ।
ॐ द्वैपायनाय नमः ।
ॐ अद्वैतगुरवे नमः । (६०)
ॐ ज्ञानसूर्याय नमः ।
ॐ सदिष्टदाय नमः ।
ॐ विद्यापतये नमः ।
ॐ श्रुतिपतये नमः ।
ॐ वाक्पतये नमः ।
ॐ नतभूपतये नमः ।
ॐ वेदाङ्गाधिपतये नमः ।
ॐ राष्ट्रपतये नमः ।
ॐ गणपतेः पतये नमः ।
ॐ मात्राज्ञापालकाय नमः।(७०)
ॐ अमानिने नमः ।
ॐ त्रिकालज्ञाय नमः ।
ॐ अमितद्युतये नमः ।
ॐ धृतराष्ट्रशुकपाण्डुविदुरात्म-
विभावकाय नमः ।
ॐ धर्मगोप्त्रे नमः ।
ॐ धर्ममूर्तये नमः ।
ॐ कुधर्मपरिहारकाय नमः ।
ॐ प्रतिस्मृत्याख्यविद्याविदे नमः।
ॐ पार्थकार्यसहायकाय नमः ।
ॐ युधिष्ठिरप्रतिष्ठात्रे नमः। (८०)
ॐ जनमेजयचोदकाय नमः ।
ॐ शुकानुशासकाय नमः ।
ॐ श्रीमते नमः ।
ॐ ब्रह्मपुत्रप्रबोधिताय नमः ।
ॐ देशिकौघप्रतिनिधये नमः ।
ॐ दर्शिताद्भुतवैभवाय नमः ।
ॐ दिव्यदृष्टिप्रदे नमः ।
ॐ कुन्तीगान्धारीतापहारकाय नमः।

ॐ सत्यवतीसुताय नमः ।

ॐ सौम्याय नमः । (९०)

ॐ सत्यकान्ताय नमः ।

ॐ सदोत्थिताय नमः ।

ॐ सुस्मिताय नमः ।

ॐ संशितव्रताय नमः ।

ॐ श्रुतिमन्थनमन्दराय नमः ।

ॐ सर्वदेवमयाय नमः ।

ॐ सर्वदेवैक्यप्रतिपादकाय नमः ।

ॐ संविद्देवीपदासक्ताय नमः ।

ॐ संविद्दीपप्रबोधकाय नमः ।

ॐ व्याख्यासिंहासनारूढाय नमः। (१००)

ॐ ज्ञानवैराग्यशेवधये नमः ।

ॐ चराचरजगद्-बन्धवे नमः ।

ॐ शङ्करस्यापिशङ्कराय नमः ।

ॐ भारतानां परायणाय नमः ।

ॐ भुवनैकगुरोर्गुरवे नमः ।

ॐ ब्रह्मसंविद्-रसघनाय नमः ।

ॐ भगवते नमः ।

ॐ बादरायणाय नमः । (१०८)

# भाग–४
# श्रीचित्रापुर–नित्यपाठ



## १५४. दीपनमस्कारः

ॐ नमो ज्ञानदीपाय शिवाय ब्रह्मतेजसे ।
कविष्णुहररूपाय नमः श्रीगुरुमूर्तये ॥१॥

अज्ञानध्वान्तपटलविध्वंसनदिवाकरान् ।
सच्चिदानन्दबोधैकसुधाम्बुधिकलानिधीन् ॥२॥

आधिव्याधिभयग्रस्त प्रपन्नजनरक्षकान् ।
वन्दे बद्धाञ्जलिः श्रीमत्परिज्ञानाश्रमान् गुरून् ॥३॥

इलापातालनाकस्थपूजित श्रीशिवेशितुः ।
चरणाम्बुरुहन्यस्त मनोवाक्कायसम्भ्रमान् ॥४॥

ईश्वरान् वेदवेदाङ्गवेदान्तज्ञानिनां धुरि ।
छात्रवृन्दसुखाधारान् भजे श्रीशङ्कराश्रमान् ॥५॥

उपमाभावमहिमजितसर्वारिमण्डलान् ।
सारस्वतद्विजवरैराराधितपदाम्बुजान् ॥६॥

ऊर्जस्वलान्महामोहग्राहग्रासैककर्मणि ।
नमाम्यानन्दरूपान् श्रीपरिज्ञानाश्रमान् गुरून् ॥७॥

एकस्मिन्नद्वितीये च ब्रह्मण्याविष्टमानसान् ।
यमादियोगसम्पत्तिभ्राजमानमुनीश्वरान् ॥८॥

ऐश्वर्याद्यखिलार्थानां दायकान् करुणानिधीन् ।
ईडे योगाम्बुधिक्रीडासक्तान् श्रीशङ्कराश्रमान् ॥९॥

ओजस्विनः सुतपसा द्वैताब्धिवडवानलान् ।
स्वाङ्घ्र्यब्जशरणोद्धर्तॄन् स्तौमि श्रीकेशवाश्रमान् ॥१०॥

औपाधिके कर्मगर्ते मोहितभ्रान्तचेतसाम् ।
समुद्धरणधौरेयान् वन्दे श्रीवामनाश्रमान् ॥११॥

अञ्जसा तमसः पारमनायासेन सर्वदा ।
नृपशून्नयतो नौमि कृष्णाश्रमयतीश्वरान् ॥१२॥

अहं वन्दे मनोवाग्भ्यां पाण्डुरङ्गाश्रमान्मुहुः ।
संस्तवैः परया भक्त्या विविधैर्भक्तिलक्षणैः ॥१३॥

करकञ्जभवांस्तेषां वन्दे धर्मधुरन्धरान् ।
आनन्दरूपिणः श्रीमदानन्दाश्रमसद्गुरून् ॥१४॥

खब्रह्माविष्टहृदयान् द्वैतध्वान्त दिवाकरान् ।
प्रशान्त दान्तोपरतान् परिज्ञानाश्रमान्नुमः ॥१५॥

गरिमा दृश्यते येषां वेदान्तार्थनिरूपणे ।
संवित् ज्ञानतपोदीप्तान् निगमागमपारगान् ॥१६॥

संविद्देवी समासक्तान् श्रुत्यन्तपथदर्शकान् ।
सद्योजातान् नमाम्यत्र शङ्कराश्रमदेशिकान् ॥१७॥

*॥ भोः पराक् स्वामिन् पराक् ॥*

# १५५. श्रीशङ्करनारायणगीतम्

श्रीगणप गौरीकुमारक भोगिभूषणबालक
योगिसङ्कुलवरद करुणासागर सुमतिदायक ।
नागवाहनविनुतपदयुग नागसूत्रालङ्कृत
नागवदन सुभक्तवत्सल नागवन्दित ते नमः ॥१॥

शङ्करा नारायणा शिव शङ्करा नारायणा
शङ्करा नारायणा शिव शङ्करा नारायणा ॥धृ॥

वारिजाम्बके वरसरस्वति वारिजासनमोहिनि
वारिधरनिभवसने मन्मुख वारिजान्तर्वासनं कुरु ।
शारदाम्बिके सकलशास्त्रविशारदेऽम्बुजनिभकरे
शारदामृतकरवदने परशारदे त्वं पाहि माम् ॥२॥

श्रीविनायकजनकसश्चित्याविनायकवाह कमला-
देविनायक सुजनजनवरदाविनायकवन्दित ।
देव देवाधीश वर वसुदेवनन्दन शुभंकर
देवकीसुत विहतपूर्वसुपर्ववृन्द दयां कुरु ॥३॥

कमलसम्भवे कमललोचने कमलनाभार्धाङ्गिनि
कमलजातनवाम्बरे धृतकमले कमलोपमकरे ।
कमलसम्भवजननि मुनिहृत्कमलवासिनि मङ्गले
कमलमित्रसुहास्ये मृदुपदकमले मां परिपाहि जननि॥४॥

पङ्कजाक्ष शशाङ्कमौलि त्रिलोचनस्तुत शुभकर
कुङ्कुमाङ्कित पार्वतीतनुकुङ्कुमार्द्रशरीर भो ।
शङ्कर सकल पापसंहर किङ्करारि भयङ्कर
शङ्कराश्रमनुत भवानीशङ्कराय नमो नमः ॥५॥

सर्वमङ्गले सर्वसाक्षिणि सर्वमातृसदाशिवे
सर्वरूपिणि सर्वरक्षिणि दर्विकरवेणि मृडानि ।
शर्वमोहिनि पर्वतात्मजे स्वर्वधूवरवन्दिते
शर्वरीपतिवदने शाश्वते शर्वे सर्वात्मिके भवानि ॥६॥

स्नानजपनिगमादि संस्तुतमौनयमनियमादि सकल
ध्यानधारणवर समाधिज्ञानयोगदृढव्रत ।
ज्ञानवारिधिसकलशास्त्रविशारदाद्वय विषयक
अज्ञानतिमिरादित्यसुपरिज्ञानवरगुरवे नमः ॥७॥

नित्यतृप्त निराहार नित्यशुद्ध निराकार
सत्य नित्यानित्यमामव नित्यसच्चिद्रूपक ।
तत्त्वनिधि तत्त्वार्थ नुतजनमुक्तिदायक वन्दित
स्तुत्यगुरुशङ्कराश्रम परतत्त्वमूर्ते रक्ष माम् ॥८॥

स्वानुभवसुखरसभरित विश्वानुरञ्जितपदयुग
मौनिजनमातङ्ग परमनिधान सद्गुणवारिधे ।
दीनजनकृतकलुषघनसन्दोहनाशकपदयुग
अज्ञानतिमिरदिवाकर परिज्ञानवरगुरवे नमः ॥९॥

ईश मदनविनाश वरदाधीश त्रैगुणरूपक
दोषरहित विशेष योगाभ्यास कुमतिविनाशक ।
केशवाश्रमपूजिताङ्घ्रिविरोषमोहविदारिताशा-
पाशहर शङ्कराश्रम सुविलास सद्गुरवे नमः ॥१०॥

सुरुचिभस्मविलिप्तभाल शरणजनवत्सल सुशील
दुरितगजमृगराज करुणाकर शुभङ्करपूजक ।
हरनयनमालासुशोभित तरुणतुलसीदामभूषित
परमपूरुष केशवाश्रम गुरुवरोत्तम पाहि माम् ॥११॥

वामनयनसरोजसुरुचिरकामदहननिरामये
रामनामध्यानभूषितकामरोषविवर्जिते ।
वामभागउमासुशोभितश्यामकन्धरशङ्करे
प्रेमरसविश्राममानस वामनाश्रम पाहि माम् ॥१२॥

क्लिष्टजनसङ्कष्टनाशक इष्टवर्गप्रदायक
अष्टयोगसुतुष्टमानस श्रेष्ठमुनिजनपूजित ।
अष्टभावाक्लिष्टवृत्तिविशिष्टजनपरिपालक
शिष्टजनसन्तुष्टिद श्रीकृष्णगुरुवर पाहि माम् ॥१३॥

पाण्डुराद्रिनिवासकरब्रह्माण्डपालकशैलजा –
मण्डिताङ्गदिनादिशत मार्तण्डछविपदसेवक ।
मण्डलेश्वर निजपदजुषाखण्डलश्रीदातृसद्भू-
मण्डलस्थित गुरुवर श्रीपाण्डुरङ्ग नमोऽस्तु ते ॥१४॥

सोमशेखर ललितपदयुग तामरसरत मानसं
प्रेमिजनमानसकुमुदिनी सोममिन्दुसमाननम् ।
काममोहमदादि षडरिस्तोमगिरिसुपविं कविं
श्रीमदानन्दाश्रम श्रीस्वामिनाथमुपास्महे ॥१५॥

शिष्यवृन्दाज्ञानतिमिरविनाशनोऽद्यद्रविवरम्
शिष्टजनसङ्घातवारिधिशारदेन्दुनिभं गुरुम् ।
धर्मरक्षणसिद्धये वरचरममाश्रममाश्रितं
ब्रह्मसंस्थितमानसं प्रणुमः परिज्ञानाश्रमम् ॥१६॥

सङ्गवर्जितहेतवेवरपरमयोगमलङ्कृतं
रागद्वेषविवर्जितं स्थितप्रज्ञभूषितमानसम् ।
नीलकण्ठपदाश्रितं चित्तान्धकारनिवारकम्
तत्पदं प्रणमामि सद्योजात शङ्कराश्रमम् ॥१७॥

सुरविनुतचरणाम्बुजाय शरजनिभरुचिशरीराय
परममङ्गलपवित्राय दुरितसंहरचरित्राय ।
तरणिशशिशिखिनेत्राय सुरनरोरगस्तोत्राय
निरतकेशवगुरुवराय वरभवानीशङ्कराय ॥१८॥

मङ्गलं मुरमर्दनाय मङ्गलं बुधवर्धनाय ।
मङ्गलं त्रिपुरान्तकाय मङ्गलं नरकान्तकाय ।
मङ्गलं वृषभध्वजाय मङ्गलं गरुडध्वजाय ।
मङ्गलं लक्ष्मीवराय मङ्गलं गङ्गाधराय ॥१९॥

शङ्करा नारायणा शिव शङ्करा नारायणा
शङ्करा नारायणा शिव शङ्करा नारायणा
पार्वतीपतये हर हर महादेव ॥

## १५६. श्रीभवानीशङ्कराष्टावधानश्लोकाः

*(वत्सगोत्रोत्पन्नगणपतिशर्मणा विरचिताः)*

विप्राणामुपकारकान् शुभकरान् ऋग्वेदमन्त्रानिमान्
नानार्थाभिहितांस्त्वया प्रकटितान् भक्त्या मया भाषितान् ।
स्वर्गाधिष्ठितवासवादिविबुधैः सम्पूजिताङ्घ्रिद्वय
भक्तानामभयप्रदायक शिव त्वं शङ्कराकर्णय ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
ऋग्वेदप्रिय ऋग्वेदसेवामवधारय ॥

दिव्यं सुस्वर शोभनार्थकमिमं भक्त्या मया भाषितं
यज्ञानामुपयोगिनं शृणु यजुर्वेदं तवाह्लादकम् ।
स्वाहाकारयुजं सुरादिसुखदं दक्षाध्वरध्वंसक
साधूनां भवभीतिनाशनकर श्रीमद्भवानीपते ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
यजुर्वेदप्रिय यजुर्वेदसेवामवधारय ॥

वेदानां परमं मया निगदितं कर्णामृतं तोषदं
दुष्टानां क्रथने विशारद चिरं त्रैलोक्यनाथाग्रणीः ।
भक्तानां परिपालनोत्सुकतम प्याट् सामगानप्रिय
हेमाद्रिस्थितयोगिवन्दितपद त्वं सामगानं शृणु ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
सामवेदप्रिय सामवेदसेवामवधारय ॥

नानार्थाभिहितांस्त्वया प्रकटितांश्चाथर्ववेदोदयान्
मन्त्रान्वीर्ययुतानभीष्टफलदान् लोके त्वया विस्तृतान् ।

कैलासस्थितनन्दिमुख्यगणपैः स्तोत्रैः सदा वन्दित
लोकाभीष्टफलप्रदातृ गिरिश त्वं कृत्तिवासः शृणु ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
अथर्ववेदप्रिय अथर्ववेदसेवामवधारय ॥

षट्त्रिंशात्मकतत्त्वसाधनकरं वेदान्तवेद्याव्यय
विश्वोत्पादक विश्वतोमुखमिदं त्वल्पाक्षरं सारवत् ।
अस्तोभं त्वनवद्यसूत्रममलं सर्वार्थसम्पादकं
शश्वत्संश्रुतिसागरं समुदितं वेदान्तशास्त्रं शृणु ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
वेदान्तशास्त्रप्रिय वेदान्तशास्त्रसेवामवधारय ॥

भस्मोद्धूलितविग्रहोपनिषदां वाक्यैरुपबृंहितं
पाराशर्यकृतं पुराणमुदितं नित्यं मया भक्तितः ।
एतत्पञ्चसुलक्षणान्वितपदं ह्यध्यात्मतत्त्वं परं
शश्वत्संश्रुतिसागरोद्धर विभो त्वं सेतिहासं शृणु ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
पुराणप्रिय पुराणसेवामवधारय ॥

विश्वाधारक विश्वपोषक भवन् विश्वाद्य विश्वेश्वर
विश्वेषां स्थितिसृष्टिनाशनविधे विश्वात्मकाधीश्वर ।
विद्याधारक विश्वरूपक गुरो विद्याप्रदातः प्रभो
विद्वद्भिर्नुत वन्द्यमानचरण त्वं गद्यमाकर्णय ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
गद्यपद्यप्रिय गद्यपद्यसेवामवधारय ॥

मातङ्गासुरकन्धरापहर भो माराङ्गसन्दाहक
माया पारग मान्य माधवसुहृन् मायागुणैर्मोहक ।
मायातीत निरञ्जनात्मक सदा माहेन्द्रवन्द्याद्य भो
मार्कण्डेयमुनीन्द्रपूजितपद सोमाष्टकं त्वं शृणु ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
अष्टकप्रिय अष्टकसेवामवधारय ॥
श्रुत्यादिस्तुतिभिः प्रकाशित जटिन् विध्वग्निसूर्याम्बक
नानालङ्कृतभोऽधकासुररिपो विद्याधराख्यापितम् ।
भो स्वामिंस्तवमानसप्रियमिदं षड्जादिभेदान्वितं
श्रीरागादियुतं शुभं सुरुचिरं सङ्गीतमाकर्णय ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
सङ्गीतप्रिय सङ्गीतसेवामवधारय ॥

दैत्योन्मन्थविधौ पराक्रमनिधे हे शीर्षमालाधर
साधूनां हृदयाम्बुजस्थ सततं रुद्राक्षमालाधर ।
रक्षोहृद्भयकारकं शुभकरं दुग्धाच्छशङ्खोत्थितं
ॐकारध्वनिमीश कर्णमधुरं शम्भो सदाकर्णय ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
शङ्खवाद्यप्रिय शङ्खवाद्यसेवामवधारय ॥

श्रीमच्छङ्करदेशिकादिगुरुभिः स्वाराधितानन्दद
श्रीमद्भक्तजनोत्तमैः कृतमिदं नादेन संशोभितम् ।
सप्तध्वानयुतं शुभं सुरुचिरं श्रीमन् मृडानीपते
शृङ्गालङ्कृतरागनादसहितं वेणुं सदा त्वं शृणु ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
वेणुवाद्यप्रिय वेणुवाद्यसेवामवधारय ॥

त्रिपुरदहनमूर्ते पावनापारकीर्ते
त्रिभुवनधरमूर्ते शूलपाणे त्रिमूर्ते ।
डमरुकधरमूर्ते विश्वमूर्तेऽष्टमूर्ते
भवभयहरमूर्ते मौरिवाद्यं श्रुणु त्वम् ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
मौरिवाद्यप्रिय मौरिवाद्यसेवामवधारय ॥

भेरिदुन्दुभिझर्झरोर्ध्वकतुरीशङ्खानकाङ्कीतत
ढक्कामर्दलतालवेणुडमरुश्रुत्यादिवाद्यारवान् ।
नानाभेदयुतान् जडीकृतककुभ्घोषाश्रवो रन्ध्रकान्
श्रीवल्याख्यपुराधिवास भगवन् श्रीशङ्कराकर्णय ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
सर्ववाद्यप्रिय सर्ववाद्यसेवामवधारय ॥

## १५७. मङ्गलपद (१)

मङ्गल शुभकर शङ्करगे । मङ्गल विबुधवन्दित पदगे ॥
मङ्गल सुजनर रङ्गदिच्छेयनीव । रङ्गसद्रु महालिङ्गनिगे
मङ्गलं जय मङ्गलम् ॥पल्लवि॥

नन्दियनेरिद पुरहरगे । कन्दुगोरळ गिरिजावरगे ॥
चन्ददि सुरमुनिवृन्दवन्दितनिगे । इन्दुशेखर गङ्गाधरगे ॥२॥

पञ्चवदन विरुपाक्षनिगे । पञ्चबाणान्तक रुद्रनिगे॥
पञ्चभूताधिपनेनिसुत जगदोळु । सञ्चरिसुव महामहिमनिगे ॥३॥

दाशरथिय मनोल्हासनिगे । वासवार्चित महेशनिगे ॥
भासुरकोटिप्रकाशभरितनिगे । वासुकिशेषाभरणनिगे ॥४॥

युक्तियोळु जनरनु करिसुवगे । भक्तिमार्गदोळु निलिसुवगे ॥
मुक्तिय गृहविदेयेन्दु तोरिसलासक्तियनवरोळु तरिसुवगे ॥५॥

धरेयोळु वरचित्रापुरदोळगे । मेरेव भवानीशङ्करगे ॥
गुरुपाण्डुरङ्गनोळेरकवागिरुव । परम परात्पर शङ्करगे ॥६॥

# १५८. मङ्गलपद (२)

मङ्गलं श्रीमहादेवं मङ्गलं श्री ॥धृ॥

मङ्गलं श्रीमहादेवम् । मङ्गलं दिव्यप्रभावम् ॥
मङ्गलं मदनदग्धारम् । मङ्गलं जयवीरवीरम् ॥१॥

बालसुधाकरकृतावतंसम् । शैलपुत्रिकामिलितांसम् ॥
नतजनभवदवहरणसुधांशुम् । श्री राजंवरपरमहंसम् ॥२॥

ढक्काविष्कृत वाङ्मयभूतिम् । करवरधृतमृगवरदाभीतिम् ॥
दिगिभकराग्राब्जायितकीर्तिम् । प्रसादितानन्दाश्रममूर्तिम् ॥३॥

रविशशिकान्ति प्रकाशकरूपम् । भवभयहर जगज्योति स्वरूपम् ॥
दुरित विनाशक प्रणवस्वरूपम् । परिज्ञानाश्रम श्रीगुरुरूपम् ॥४॥

श्रीपरिज्ञानानुग्रहभाजम् । तत्पश्चात् स्वीकृतसंन्यासम् ॥
शङ्कराश्रम सद्योजातम् । भूषितश्रीचित्रापुरपीठम् ॥५॥

कोमलबिल्वदलार्चितलिङ्गम् । स्नापितपञ्चामृतदिव्याङ्गम् ॥
भक्तजनाहितकरुणापाङ्गम् । दिव्यकपर्दसुदीव्यद्गाङ्गम् ॥६॥

मङ्गलं श्रीमहादेवं मङ्गलं श्री ॥धृ॥

*पार्वतीपतये हर हर महादेव ॥*

## १५९. श्रीचित्रापुर मठ गुरुपरंपरा समूह गीत

गुरुदेवों की अमर शक्ति से निकले प्रेम प्रवाह की जय हो
(गुरु) परंपरा स्थित भक्तिगर्व से उमड रहे उत्साह की जय हो
भवानी शंकर अनुग्रहित चित्रापुर मठ संस्थान की जय हो
विद्या विनय विवेक समन्वित सरस्वती संतान की जय हो

सारस्वत समाज की जय हो
सरस्वती संतान की जय हो
जय हो, जय हो, जय हो

**अंतरा**

दिव्य ज्योति हर दिल में जगाकर मठ की कीर्ति बढाते रहेंगे
गुरु आज्ञा पर नतमस्तक हो साधना पथ पर बढते रहेंगे
भ्रांति भंवर से बचानेवाले नाव को पार लगानेवाले
हम सब के गुरुराज की जय हो

## ॥ सभा–समाप्ति–प्रार्थना ॥

नन्दन्तु साधकाः सर्वे विनश्यन्तु विदूषकाः ।
अवस्था शाम्भवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा ॥१॥

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखमाप्नुयात् ॥२॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥३॥

# Shrī Chitrāpur Maṯẖ Publications

## Books

- Ānand-Bodhāmṛta - I Devanāgarī
- Ānand-Bodhāmṛta - II English
- Antaraṅga- Reflections of Parama Pūjya Parijñānāshram Swāmījī -2008
- Anugraha
- Atha Devatārchana-Vidhiḥ - Devanāgarī
- Chitrāpur-Guruparamparā-Charitra (Ārūr)
- Chitrāpur-Gurucharitra-Sārāmṛta (Marbaḷḷī)
- Gītā Series (Bhagawad-gītā, Shiva-gītā, Devī-gītā, Guru-gītāmṛta)
- Guru-pūjana
- Manāche Shloka - English, Marāṯẖī, Kannaḍa
- Navarātra-Nityapāṯẖa
- Nitya-Devatārchana-Vidhiḥ - Kannaḍa
- Oṁ Namo Jñāna-dīpāya - Devanāgarī
- Oṁ Namo Jñāna-dīpāya - Kannaḍa
- Pādaprakṣẖālana to Phalamantrākṣẖata
- Parijñān-Bodhāmṛta
- Rathotsava - Kannaḍa
- Records of Shrī Chitrāpur Maṯẖ
- Sadguru-Bodhāmṛta - Part II
- Sādhanā-Pañchakam - Vol. 1 and II
- Sādhanā-Shṛṅkhalā -2008
- Sadyojāt-Swādhyāya-Sudhā - Hindī
- Sandhyā-Vandana - English
- Saṅkīrtana-Sāra - Kannada
- Sārtha-Mantrapuṣẖpāñjaliḥ - Devanāgarī
- Sārtha-Mantrapuṣẖpāñjaliḥ - Kannaḍa
- Shivānanda-Laharī
- Shrī Chitrāpur Rathotsava
- Shrī Sadyojāt-Bodhāmṛta- I
- Stuti-Mañjarī - Devanāgarī, Kannaḍa
- Swarṇa Sudhā
- Tamaso Mā Jyotirgamaya

## Audio CDs & Cassettes

- Antaraṅgiṇī - I
- Antaraṅgiṇī - II
- Antaraṅgiṇī - III
- Dhyāna Praveshikā - Koṅkaṇī

- Navarātra-Nityapā<u>th</u>a
- SCM - Nitya Nema 2CDs
- Stotrāvalī - I
- Stotrāvalī - II
- Stotrāvalī - III, 2008

## Audio Cassettes only

- A<u>sh</u>taka-stotrāvalī
- Devī-pūjana
- Laghu-Sandhyā-Vandana
- Shiva-pūjana

## Audio CDs only

- Antaraṅgiṇī IV - Twin Pack
- Dhyāna Praveshikā and A<u>sh</u>tamūrti Upasanā - English
- Jai-Guru-Parijñān
- Shiva-Saṅkalpa-Sūkta- Āshīrvachana by Parama Pūjya Shrīmat Parijñānāshram Swāmījī
- Shrī-Lalitā-Sahasranāma
- Tercentenary Signature Tune and Rāga-2008

## DVDs

- Apāra Mahimā Guru Mahimā
- Chitrāpur Raṅg Rañjini
- Parijñānodaya Zālā
- Saraswatī-Yātrā, 2008
- Photographs of Gurujyoti-Yātrā, 2008
- Gurujyoti-Yātrā 6DVD set, 2008
- Pu<u>sh</u>pālaṅkāra, 2008

Photos and other pūjā-sāhitya available at Parama Pūjya Swāmījī's official camps

Audio Cassettes / CDs of talks on 'RUDRA' by Dharmaprachāraka Shrī V Rājagopāl Bhaṭ given free to all those who perform Rudra Sevā at the Ma<u>th</u>.

## Shrī Chitrāpur Ma<u>th</u> Publications are available at

- Shrī Chitrāpur Ma<u>th</u>, Shirālī
- Shrī Chitrāpur Ma<u>th</u>, Beṅgaḷūru
- Shrī Samādhi Ma<u>th</u>, Maṅgaḷūru
- Shrī Chitrāpur Ma<u>th</u>, Puṇe, Tel: 020-25284572
- Parama Pūjya Swāmījī's official camps
- Hyderabad: Smt. Vinatī Udiyāvar, Tel 040-2341 4015
- Mumbaī, Borivalī: Smt. Sharayu Haḷdipur, Tel: 022- 2899 0820
- Mumbaī, Vile Pārle: Shrī Shrikar Talgerī, Tel: 022 - 2611 5156
- Mumbaī, Tālmakīwāḍī: Shrī Prakāsh N. Gokarn, 022 -2381 3955
- Chennaī, Shrī Aruṇ Hoskoṭe Tel 044-2670 3125 (saraswat.chennai@vsnl.net)

**SHRĪ CHITRĀPUR MAṮH**
Shirālī, Uttara Kannaḍa, Karnāṭaka, India, 581354
Tel: 08385-258368 Fax: 08385-258612
E-mail: scmath@sancharnet.in Website: www.chitrapurmath.net